No. २५६८ क

Title योगिनी हृदयटीका (अजड प्रमातृ सिद्धिः)

Author उत्पल देवः

Extent ६० Age सं. १९५८

Subject तन्त्र.

योगिनीहृदय

नं॰ १४७८

8

5925

No. F. — 69

Complete

1

Shri

[illegible]

योगिनीहृदय

वि॰ भै॰ टी १

ॐ श्रीगणेशाय नमः ॐ नमः शिवाय ॐ नमो गुरवे ॐ जगद्गुरवे
नौ गणपवटुकौ विश्ववनितौ जगद्धात्रीलोकजयविरतणादिश्वर
दौ रथांगे मन्त्रेष्ठौ रविशशिकृशाणुज्ज्वलद्दृशौ मयि स्यातां रक्षाय
रवशाधिपौ सद्गुरुमयौ यन्नित्यं स्फातिमज्ज्योतिर्लयमेकमद्भुतम
म् ततद्भासयते सूर्यो न शशांको न तारकाः विमर्शरूपिणी श-
क्तिरस्य विश्वगुरोः परा परिस्फुरति मे कापि नाना नामानुरूपि
णी पश्यन्त्यादिक्रमादेतो ज्ञानेच्छेतरात्मना तन्त्रावतारं त
स्मात्सर्वज्ञानुजिघृक्षया तद्वामकेश्वरे तन्त्रे सूचितार्थमशेष
तान् स्फुटीकर्तुं प्रयतते योगिनीहृदयेष्वतां मातृकाहृदयं
मम्नो वेत्ति लोकेपि नत्वतः योगिनीहृदयं ज्ञातं कः समर्थः शिव
विना अन्नमेद्वृत्तिं तं दिव्यागमकोशगृहान्तरम् उद्घाटयतेम
येदानीं महार्थाष्टप्पलताकुंचैः तदनेकार्थसंदर्भनानासंज्ञितस
कलम् विद्वणोस्म् ज्ञानन्दः शिवपरेवशासनात् अमथा
नादिसंसारे केनेदं व्याकृतं पुरा तदा न सन्ति सन्तः किं किं वा ना
त्र प्रयोजनम् शिवादिगुरुपर्यन्तपारंपर्यक्रमागतम् एतज्ज्ञानम
यालब्धमक्रमाणामगोचरम् । इह खलु भगवान्प्रकाशमूर्तिः
परमशिवः स्वात्मानं विमर्शांशेन विभाव्य पश्यन्त्यादिक्रमात्
च्छति श्रीदेव्युवाचेति शिवपदाद्देवदेवीपर्यन्तव्याप्तं विम-
र्शांशेन स्पष्टवानिति यावत् उवाचेति लिटुत्तमपुरुषस्यैकव
चनं भूतत्वेनच्छद्रूपस्य सदा नवत्वात् अनघनत्वमकालक
लितत्वात् परोक्षत्वमनिन्द्रियगोचरत्वात् अनेन श्रीभैरव
उवाचेत्येतदपि व्याख्यातम् प्रकाशात्मकः परमशिवोहमेव वि
षानुग्रहपरः परापश्यन्तीमध्यमावैखरीक्रमेण स्वात्मानं वि
मर्शांशेन पृष्टा भूत्वा प्रकाशांशेन प्रतिवचनदातापि सन् तं
त्रं समवतारयामीत्यर्थः तदुक्तं श्रीमहास्वच्छन्दे गुरुशिष्यप
देस्थित्वा स्वयं देवः सदाशिवः पूर्वोत्तरपदैर्वाक्यैस्तन्त्रं समवता

रयदिति देवदेव महादेव परिपूर्णप्रथमय वामकेश्वरतंत्रेस्मिन्ना
ज्ञाताश्चार्थाप्यनेकशः तांस्तानर्थानशेषेण वक्तुमर्हसि भैरवेति ।
विश्वस्य भरणाद्रमणाद्वमनित्वात् स्थितिसंहारसृष्टिकारी भैर
वः देवदेवेति देवा द्योतनात्मानो ब्रह्मादयस्तेषां देवः प्रकाशकः म
हादेव महाप्रकाशात्मन् इत्ययमर्थः तव महाप्रकाशात्मकत्वात्
त्वमेव विश्वं भासयसि न त्वां कोपि भासयितुमनसिति तत्र श्रुतिः
न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति प
रिपूर्णप्रथामय प्रथा ज्ञानं परिपूर्णप्रथमविश्वविषयिणी ज्ञ
प्तिस्तन्मय तद्रूप तव सर्वज्ञत्वात्त्वमेव सर्वं बोधयितुमर्हसि
न त्वां कोपि बोधयितुमलमिति अतो वामकेश्वरतंत्रे चतु
श्शतीशास्त्रे अज्ञाताश्चार्था अविदितार्था बहवः सन्तीत्यर्थः तांस्ता
नशेषेण साकल्येन वक्तुं व्यक्तीकर्तुमर्हसि मम विमर्शरूपदे
वी प्रबोधयितुमर्हसीत्यर्थः प्रकाशांशेन प्रतिवदति श्रीभैर
व उवाच शृणु देवि महाभागे योगिनीहृदयं परम् त्वत्प्रीत्या
कथयाम्यद्य गोपितव्यं विशेषतः इति । देवि विश्वसर्जनादि
व्यवहारक्रीडापरे हे विमर्शविग्रहे परं महाभागे लोके गोपनीय
यद्वस्तु यावत्तावत्कालमतीन्द्रियगोचरं भवति अस्मात्सर्वं
दा मनोवागिन्द्रियातीतत्वात् महागुह्यन्तद्योगिनीहृदयं यो
गिनः स्वसंविदो हृदयमिवाविर्भावभूमित्वाद्धृदयम् अत्र तु
योगो नाम सर्ववस्तुसमवायसंबन्धस्तेन भासत इति योगिनी
तद्गर्भमभिधत्ते देशकालपदार्थास्तद्वस्तु यथा तथा तम् त
तद्रूपेण या भाति तामाश्रये संविदं कलामिति परमतत्त्वं सर्व
ज्ञानेतरत्वात् अत एव वक्ष्यति एतज्ज्ञात्वा वरारोहे सद्यः खेचर
तां व्रजेदिति । एतच्छृणु विमर्शरूपदेवी प्राप्यत्वमीप्सात्वदेकरह
स्यहेतोः कथयामि अद्य इदानीं कस्यचिदाख्यातमपि रहस्यत्वा

यो॰ वा॰
टी॰
२
2

त्वात् अतो विशेषतो गोपितमम आत्माहं भावभावनया भावित
मित्यर्थः अत्यन्तगोपनीयतामेव द्रढयितुमाह कर्णात्कर्णोपदे
शेन संप्राप्तमवनीतलमिति । कर्णात्कर्णेति मत्तोपपञ्चमीकः
र्णं प्राप्य पुनः कर्णप्रवेशोपदेशक्रमेणैव पारंपर्यक्रमेण संप्राप्तमा
दिकर्मणिष्ठः अवनीतलशब्देन तत्रस्था मनुष्या लक्ष्यन्ते यथा म
ञ्चाः क्रोशन्तीति तेनायमर्थः संप्रयन्ते दिव्यसिद्धमानवक्रमेणेति
रहस्यत्वाद्धक्रागतत्वात्कर्णपरंपरामात्रगम्यमेवेदमिति अत्र मान
वग्रहणं सिद्धदिव्यानामुपलक्षणार्थम् अनर्थेभ्यो न देयमित्याह न
देयं परशिष्येभ्यो नास्तिकेभ्यो नचैव हि नाशुश्रूषापतानां च नैवा
नर्थप्रदायिनाम् इति । परशिष्येभ्य इति परशिष्या एव के येभ्यो
न देयमित्यत आह ये विद्यान्तरेषु पारंपर्येणाधिगताशेषरहस्य
परमार्था अप्राप्तसंपूर्णविशेषकास्ते परशिष्याः तेभ्यो न देयं
तैरपि न ग्राह्यं येन दृष्टाः न तु परशिष्यास्तेभ्यो देयं तैरपि ग्राह्य
मधुलब्धो यथा भृङ्गः पुष्पात्पुष्पान्तरं व्रजेत ज्ञानलब्धस्तथा
शिष्यो गुरोर्गुर्वन्तरं व्रजेदिति वचनान्नापि तच्छिष्याः श्रेणाभिषे
ककर्ता यो गुरुस्तस्यैव पादुकामिति वचनात् नास्तिकेभ्यो ना
स्ति परलोक इति ये मन्यन्ते ते नास्तिकाः श्रद्धाविहीना अथ न धा
स्मायपेत्यपि तेषां हविश्रुत्याप्यनदेयमित्यर्थः तदुक्तं भगवद्गीता
याम् न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् जोषयेत्सर्वक
र्माणि विद्वान्युक्तः समाचरन्निति नाशुश्रूषारतानां च ये शुश्रू
षालवस्तेभ्यो न देयं नाकनर्थप्रदायिनाम् शुश्रूषालवस्या
पि यं न वहितरन्ति तेभ्यो देयं ये शुश्रूषालवमात्रमपि न वितर
न्ति तेभ्यो न देयमित्यर्थः तदुक्तं गुरुशुश्रूषया वा पुष्कलेन
धनेन वा अथवा विद्यया विद्या चतुर्थो नोपपद्यते इति परी
क्षार्थाय देयमित्याह परीक्षिताय दातव्यं वत्सरार्धोषिताय चेति
परशिष्यत्वादिदोषपरीक्षणं वत्सरार्धेन सहवासेन कर्तव्यमा

कात्वे गुरोर्विवेकितत्वात् उक्तार्थमेव द्रढयञ्छिष्यप्रवृत्तये फल
माह एतज्ज्ञात्वा वरारोहे सद्यः खेचरतां व्रजेदिति अप्यनेन महार्थत्वा
परीक्षितायदेयं एतस्य परिज्ञानेनैव शिष्यः खेचरतां खे परमव्यो
म्नि चरतीति खेचरः परशिवः तदुक्तं चिद्गगनचन्द्रिकायां दृक्क्रि
यात्मशशिभानुमध्यगः खेचरोऽनलदृष्टिधामयः एतदर्थशि
खे परं नभस्तदर्शयं शिवत्वमविके इति सद्यस्तत्क्षणे जीव
न्मुक्तो भवेदित्यर्थः तदुक्तं वेदरहस्ये तस्यैवात्मा पदवित्तं विदित्वा
न कर्मणा लिप्यते पातकेनेति शास्त्रमारभते एकं संकेतकोऽसं
त्रयञ्ज्ञात्वा संकेतकस्तथा त्रिविधः त्रिपुरादेव्याः संकेतः परमेश्वरी
ति । संकेतवत् संकेतः संकेतः समयः यथा कृतिसमयो कामि
नीकामुकयोः यत्र क्वापि निवसतः एवमस्मिन्नपीति एकं सं
केतकोऽसत्रसंकेतकः सज्ञा संकेतकश्च एवं त्रिविधः संकेतः
त्रिपुरादेव्याः आमनत्वपीठलिंगमातृकादिष्वपि हि अत्योपि त्रिपुरा या
विद्यते सा देवी प्रकाशविमर्शसामरस्यरूपिणी परा अस्याश्च त्रिवि
धः संकेतः परमेश्वरीति परशुत्कृष्टमिन्द्रियादिभिरपि परिपाल्य
मानमैश्वर्यमाज्ञा यस्याः तदुक्तं वेदरहस्ये भीषास्माद्वातः पवते
भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचमः इति
एतज्ज्ञानविहीनस्य फलवैपरीत्यमाह यावदेतन्न जानाति संकेत
त्रयमुत्तमम् तावत्त्रिपुराचक्रे परमाज्ञाधरो भवेदिति । यावदेत
दुत्तमं संकेतत्रयं यो न जानाति तावत्त्रिपुरायाः परायाः स्वसंवि
दृश्चक्रे मातृमानमेयलक्षणे तत्त्वसमूहे परमाज्ञाधरो न भवेत्
आज्ञा नाम निग्रहसामर्थ्यं तदाज्ञामपि लोकेऽस्ति तदुच्यते परमेति
परमा सर्वलोकेष्वप्रतिहता परमेश्वर्यैव परमाज्ञा यरः परमेश्व
रो भवेत् येनैतद्धि जानाति न तद्रूपं व्रजेदित्यन्वयव्यतिरेकसिद्धः
सिमर्थः अथैतत्प्रयोजनकीर्तनमधिकारिविषयसंबन्धानामप्यु
पलक्षणं अत्राधिकारी संविद्देवता विषयः मोक्षः प्रयोजनं

प्रतिपाद्यप्रतिपादकभावः संबन्धः अत्रादौ चक्रसंकेतं वक्तुमुपक्रम
ते तस्य शक्तिपंचकं सृष्ट्यालयेनाग्निचतुष्टयम् पंचशक्तिचतुर्वह्नि
संयोगाच्चक्रसंभवः । तच्चक्रं सृष्टिरूपेण शक्तिपंचकं स्वाभिमुखा
ग्रत्रिकोणं शक्तिरुच्यते तादृशं शक्तिपंचकं लयेनाग्निचतुष्टयं
लयेन संहाररूपेण पराङ्मुखाग्रत्रिकोणमग्निरुच्यते तच्चतुष्
टयमेवं पंचशक्तीनां चतुर्वह्नीनां संयोगात् सम्यग्योगः संयोगः श
क्त्याशक्तिविनिर्भिन्ने स्यादिवक्तुःशान्तीशाद्यक्षरीत्या शक्तिभेद
क्रमेण समष्टिकोणशाखाग्रमर्मरेखयच्छा भवति तथालेखनं संयो
गस्तस्माच्चक्रस्य संभवो भवति सामान्यतश्चक्रसमुदायरूपस्याये दृ
नीयमवयवशः संभवं प्रतिजानीते एतस्यावतारं तु कथयामि
तवानघेऽइति । एतस्य श्रीमहात्रिपुरसुन्दर्याश्चक्रस्य सृष्टाचक्र
स्य सृष्टाचक्रस्यावतारं अवतारो नाम लोके सोपानपङ्क्तया प्रदेशान्नि
म्नदेशप्राप्तिः अत्र तु विश्वोत्तीर्णप्रकाशात्मनः परमशिवात्तत्क्र
मेण प्रसारस्तादृशं चक्राकारमनवच्छिन्नपरिपूर्णत्वादिदोषरहितेन वप्र
काशात्मने मयं शम्भुनाथायाः विमर्शशक्तेः कथयामि कथमक्रि
यात्परमशिवात्तन्मयं चक्रं संभवतीत्याह यदा सा परमा शक्तिः
स्वेच्छया विश्वरूपिणी स्फुरत्तामात्मनः पश्येत्तदा चक्रस्य संभव इति
यदा यस्मिन्काले प्राणिनामदृष्टवशात् स्वान्तः संहृतविश्वसिसृक्ष
या सैव परा शक्तिर्विमर्शरूपिणी स्वेच्छया विश्वरूपिणी विश्वं स्वत
तिरिक्तवस्तुदृश्यदासीनवृत्तिः अत्र श्रुतिः न तस्य कार्यं करणं च
विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च इति श्रुत्यन्तरेऽप्युक्तम् स्वेच्छ
यैव जगत्सर्वं निर्मितं सृष्टिरसावपि इति विश्वसर्जनमेव पराशक्तेः
स्फुरत्ता सृष्टिरूपत्वात् तदा षट्त्रिंशत्तत्त्वात्मकविश्वसृष्टिकाले च
क्रस्य परदेवताचक्रस्य विश्वमयस्य संभवः एतदेव स्फुरत्ताकारा
द्विसर्वार्थादिनप्रस्पन्दसंवित्ः प्रसारपरमार्थत्वात्स्फुरत्तान्तरी

घुनात् प्रसृतंविश्वलहरीस्थानंमातृत्रयान्वितम् वैन्दवचक्रमिति
सूक्ष्मशामावकारश्चेति सूक्ष्माकारः सूक्ष्मत्वपुनरत्रतत्रनिरस्तनिः
खिलप्रपञ्चत्वात् अतएवपरमशिवः तदुक्तंसंकेतपद्धत्यां अका
रःसर्ववर्णाग्र्यः प्रकाशः परमः शिव इति अत्रश्रुतिः अः इति त्रयेति
विसर्गान्तात् विसर्गान्तेयस्मात्तस्माद्विसर्गान्ताद्विन्दुप्रस्पन्दंसवि
दः विन्दुरग्नीषोमात्मकः कामाख्योरविः शिवशक्तिसामरस्यात्म
वाच्यज्ञानः तदुक्तंचिद्गगनचन्द्रिकायां भोक्तृभोग्यमयोगोविसर्ग
गोदेवि मांचिद्रसे धेर्ढ्याद्रशाम् अर्थयत्नलेसाममिश्रणस्तद्विम
र्शी इह भाति जृम्भणः इति शिवशक्तिसामरस्यरूपकामाख्यसंस्कारः
प्रस्पन्दः इहनेनुरूपमितशोणविन्दुद्वयात्मकः अकारहकारसाम
रस्यविन्दोः प्रस्पन्दात् सितशोणविन्दुयुगलात् संविष्टिमयीदृ
नेन्दुरूपाकलाजायतइत्यर्थः प्रसारपरमार्थत्वात्स्फुरत्तालहरी
धुनात् स्फुरत्तायाविमर्शशक्तेः लहरीविन्दुद्वयान्तरालमिश्र
ताहार्धकलारूपानयायुक्तात् एवंभूतात्कामकलाक्षरात् प्रसृ
तंविश्वलहरीस्थानंमातृत्रयात्मकं वन्धेवंचक्रं विश्वलहर्यो वीचः
यः षट्त्रिंशत्तत्त्वरूपास्तासांस्थानमुत्पत्तिहेतुत्वात् मातृत्रयान्वितं
पश्यन्तीमध्यमावैखरीरूपंएवंतत्समष्टिरूपपरमात्मकसदाशि
वाख्यतुरीयविन्दोःरूपमन्नत्वाद्बैन्दवचक्रमध्यत्रिकोणंप्रसृतमेतद्
त्रवद्वसति आत्मनःस्फुरणंपश्येत्सादिदेवेविशीविश्वविग्रहेस्मिन्ने
न वक्रंकामकलारूपंप्रसारपरमार्थेत इसेतत्कामकलावि
लासेप्यस्मद्गुरुभिः प्रपञ्चितम् स्फुटशिवशक्तिसमागमबीजा
ङ्कुररूपिणीपराशक्तिः अणुतनुरूपानन्दविमर्शलिपिलक्ष्यविग्र
हाभाति परशिवरविकरनिकरेप्रतिफलति विमर्शदर्पणोविश
दे प्रतिरुचिरुचिरे कुड्ये चित्तमयेनिविशतेमहाविन्दुः चित्तमयो
हंकारःसाव्यक्तहार्णसमरसाकारः शिवशक्तिमिथुनपिण्डः
कवलीकृतत्रिभुवनमण्डलोजयति सितशोणविन्दुयुगलंविवि

यो॰हृ॰
टी॰
४

क्रशिवशक्तिसंघट्टरूपं तत्परम् वागर्थसृष्टिहेतुः परंपरात्मविग्रहवि
स्पष्टम् बिन्दुरहंकारात्मा रविरेतन्मिथुनसमरसाकारः कामः क
मनीयतया कला च दहनेन्दुविग्रहौ बिन्दू इति कामकलाविद्यादे
वीचक्रक्रमात्मा कामेयं विदिता येन स मुक्तो भवति महात्रिपुरसु
न्दरीरूप इति एकस्य त्रिरूपत्वं पुनर्भवेदिति । एकस्य त्रिकोणात्म
नस्य चक्रस्य पुनर्नवरूपत्वं भवेत् पुनःशब्दो न पूर्वोक्तस्यैव ग्रहणान्तर
कथनं गम्यते इदमेव त्रिकोणात्मकं भूयोपि शक्तित्वसृष्टिस्थि
तिसंहारात्मना प्रपञ्चतस्त्रिधाभूदित्यर्थः एवं कृते सति सकामन
नवयोनिचक्रं निष्पद्यत इत्याह धर्माधर्मौ तथात्मानो मातृमेयौ
तथा प्रमा नवयोन्यात्मकमिदं चिदानन्दघनं महदिति । धर्मा
धर्मौ पुण्यपापे आत्मानः आत्मा अन्तरात्मा परमात्मा ज्ञानात्मा
चेति चत्वारः मातृमेयौ माता जीवः मेयो ग्राह्यवर्गः प्रमाप्रमितिः प
वमेतन्नवमयं नवयोन्यात्मकं चक्रं चिदानन्दघनं विशिष्टं तत्सकला
ज्ञानतो विश्वाहन्तापरिणामस्वाभ्यासनवहिरन्तर्निविडं यथा ल
वणघनम् महदिति देशकालाकारैरनाकलितचिन्मयत्वात् प्र
थमं त्रिकोणस्य प्रपञ्चत्वादित्रितयहेतुत्वात्तन्मयतां प्रतिपाद्य इदा
नीं वामादिचक्रस्यैव वैखरीमयतां तत्र स्थितानां तद्रूपतां च कथयति च
क्रं नवात्मकमिदं नवधा भिन्नमन्त्रकम् इत्यादिना वामारूपणि
मित्रयमित्यन्तेन इदं चक्रं त्रिकोणत्रयरूपेण नवात्मकं त्रैलोक्य
मोहनादिनवचक्रात्मना संतं नवधा भिन्नमन्त्रकम् वक्ष्यमाणकर
शुद्धादिनवचक्रेश्वरीमन्त्रनवकभेदवत् बैन्दवासनसंरूढसंवर्त्ता
नलचित्कलम् । बैन्दवासनं देवि महाबिन्द्वात्मकसदाशिवास
नमत्र वक्ष्यति सदाशिवासनं देवि महाबिन्दुमयं परमिति ।
शिवशक्त्योः सदाशिवतत्त्वोपरिस्थितत्वात् बैन्दवासनसंरूढ
संवर्त्तानलो लयानलः यत्र क्षित्यादिशिवपर्यन्तं लीयते तद्व
त्स्वपररूपसकलवर्णाद्यमृतमनन्तभम् प्रकाशात्मकं संवर्त्ता

नलः चिदेवकलाचित्कलाः विमर्शात्मिका सर्ववर्णात्मकत्वाद्धार्धक
ला तदुक्तं संकेतपद्धत्यां अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तित इति वैन्यवासनं सत्
त्वं सर्वतीनलचित्कलेयस्मिंस्तदैव त्रिकोणम् अविकारूपसंवेद
महारस्थो सवरावृतम् । शिवशक्तिसामरस्यरूपमहाविन्दुमयः
मध्यचक्रोत्पन्नत्वादविकारूपमष्टारस्थं त्रिकोणस्यान्तरयस्तु
स्पन्नत्वादष्टकोणस्य ततोष्टारस्थं सवरावृतम् अकारादिविन्दुन्त
पंचदशस्वरस्वयाविभक्तैराकलितरेखात्रयं अः स्वराक्रान्तमध्यं
तदुक्तमभियुक्तैः विभाग्यचमहाप्रसमरेखास्वरोदरमिति
अयमर्थः इदमेव त्रिकोणचक्रं नवचक्रात्मनापरिणतं त्रिपुरा
दिनवचक्रेश्वरीकरणमुद्रादितत्त्वं तेन वककलितमष्टको
णगतं षोडशस्वरावृतमं विकाशान्तासमरसरूपमहावि
न्दुमयसदाशिवासनारूढप्रकाशविमर्शात्मककामेश्वरा
कामेश्वर्याधिष्ठितमिति उपचक्रं सवासनमुत्पादयति नवत्रि
कोणस्फुरितप्रभारूपदशारकम् शक्त्यादिनवपर्यन्तदशार
स्फूर्तिकारणम् भूततन्मात्रदशकप्रकाशात्मकत्वत इति
नवत्रिकोणानि च नवत्रिकोणानीति कोणशब्देन त्रिकोणम्
एवेन्दवं लसते नवकोणानां वैन्दवस्य च स्फुरिताः प्रतीयमा
नाः प्रभाः तद्रूपं दशारं यत्रयत्र यथापरिणमते तत्तथाविधं शा
क्तिः रेफः तदुक्तं मध्यासिद्धान्ते रमाशक्तिबीजहारे चन्द्रः शक्ति
र्महाशक्तिर्व्रह्माणीकालिकादिकमिति शक्तेरेफस्यादिघी
कारः शान्त्यादिवकारसारभूतवानां पर्यन्तगः लकारस्तेषां
दशानां स्फूर्तिकारकम् स्फूर्तिविमर्शः यकारादिक्षकारान्त
दशवर्णविमर्शकमित्यर्थः भूततन्मात्रमिति भूतानि पृथि
व्यप्तेजोवाय्वाकाशास्तन्मात्राः पंच गन्धरूपरसस्पर्शशब्दास्ते
षां दशानां प्रकाशात्मा शतेषां मालस्यकत्वात् शिवात्मकत्वात्

यो॰ हृ॰ टी॰ ५

5

ष्टिमायथार्नाशरूपात्मकत्वाद्यकारादिवर्णानां तदुभयप्रकाशवि॰
मर्शमयदशकोणरूपत्वमिदं चक्रमित्यर्थः ष्टिन्यादिलकारान्तवर्ण
दशकमयत्वात्कथनेन प्रथमदशारादिचक्रत्रयस्य स्थितिरूपताद्यो
त्यते द्वितीयं दशारमाह द्विदशारस्फुरद्रूपं क्रोधीशादि दशार्णक
म् । द्वितीयं दशारं द्विदशारं द्वितीयदशारं तया स्फुरन्तो रूप्यन्त
इति रूपा इन्द्रियार्थाः दशशब्दद्वयोर्वचनाद्यस्य द्वितीयास्फुरन्ते
रूपा यस्य तत्तथाविधम् क्रोधीशः ककारः ककारादिदशवर्ण
वत् कोष्ठैः ऐन्द्रवत्रिकोणाष्टकोणचक्रे भ्रमत्प्रस्थितप्रकाशवि
मर्शमयद्वीपहृदयदीपितेषु तद्दशकप्रभाछायादशकहृदयमय॰
यकारादिष्टिन्यादिककारादिदशकहृदयात्मकं दशारचक्रहृ
यात्मनाहृष्टमिति ननु भूततन्मात्रदशकप्रकाशात्वं नत्व॰
तरस्यैव शब्दादीनामुक्तत्वात् पुनर्द्विदशारस्फुररूपमित्यत्रा
पि रूपशब्देनापि कथं गृह्यन्तेमेवं तन्मात्रपदेन भूतसूक्ष्मणा॰
मतीन्द्रियगोचराणां ग्रहणम् रूपशब्देन भूतगुणाः शब्दादयः
श्रोत्रादिग्राह्या गृह्यन्ते अतो विरोधः चतुर्दशारमाह चतुश्चक्रप्र
भारूपं सप्तचक्रपरिणामतः चतुर्दशाररूपेण संवित्तिकरणात्मना
विवर्यादितयान्तार्णेयपरमार्थप्रथामयमिति । चतुरादिचक्राणि
वैन्दवत्र्यस्रकोणाष्टकोणप्रथमदशाररूपाणीति तेषां प्रभामयत्व
स्याविप्रकृष्टत्वात् प्रभारूपमेव गम्यते यथावहृदये इत्यव
नमितिमात्रवयवभेदतस्य चक्रभेदः तथा तस्य चक्रप्रभावतुष्टयसं॰
युक्तस्य द्वितीयदशारस्य सन्निकृष्टत्वात् अवयवप्रतीतिः
तत्प्रभाचतुष्टयसमेतद्वितीयदशारात्मयवश्चतुर्दशाररूपेण
संवित्तिकरणात्मना संवित्तिर्ज्ञानं संवित्तिशब्देन क्रियापि लक्ष्यते
करणानीन्द्रियदशकं श्रोत्रादिकं वागादिकं च मनबुद्ध्यहंकार
वित्तानि चतुर्दशतदात्मना विवरीटकारः जयाभकाराः टक
पादिठकारान्ताश्चतुर्दशवर्णास्तेषां परमार्थप्रथाकरणभूता

प्रथाविमर्शात्ममयकोष्ठः मध्यचक्रमेव त्रिकोणाष्टकोणद्विदशा।
कोणक्रमेण श्रोत्रादिज्ञानेन्द्रियवागादिकर्मेन्द्रियमनोबुद्ध्यहंकार
चित्तात्मककरणचतुर्दशकटकारादिङकारान्तवर्णचतुर्दशकप्र-
काशाविमर्शमयचतुर्दशारूपेण परिणतमित्यर्थः त्रिकोणचक्रस्या
विकारूपमेवेदमष्टारस्थस्वरावृतमित्यत्राविकारूपतामुक्त्वा इदानी
मष्टारादिचतुर्दशारपर्यन्तस्य रौद्रीरूपतामाह पंचशक्त्या नलाका
रस्फुरद्रौद्रीप्रथामयमिति । एवमुक्तप्रकारेण शक्त्यनलाकारेण
पंचशक्तिचतुर्वह्निरूपेण स्फुरच्चक्रं द्विचत्वारिंशद्योन्यात्मकं रौद्रीप्र
थामयं रौद्रीशक्तिविस्फारविजृंभितमित्यर्थः शिंहंचक्रमसौह् ज्ये
ष्ठारूपचतुष्कोणं वामारूपभूमित्रयमिति । ज्येष्ठाशक्तिरूपाणि च
तुष्कोणानि चतुष्कोष्ठानि चतुरश्राणि यस्य तत् ज्येष्ठारूपचतुष्को
णं वामाशक्तिरूपाणि त्रीणि वृत्तत्रयं यस्य भूमित्रयशब्देन तदन्तरा
ल····पद्मद्वयमपि लक्ष्यते अत्रैव वक्ष्यते च पद्मद्वयेनेति अत्र वा।
मारूपभूमित्रयं ज्येष्ठारूपचतुष्कोणमिति पाठक्रमेऽपि अम्बिकादि।
शक्तिपाठक्रमाया न तु या ज्येष्ठारूपचतुष्कोणं वामारूपभूमित्रय-
मित्युक्तरेवेन पुनरस्यैव चक्रस्य नामनामान्तरमाह दिशान्तस्त्रिको
णं च शान्तातीताष्टकोणकम् शान्तेशाद्विदशारं च तथैव भुवना
रकम् विद्याकलाष्टमारूपदलाष्टकसमावृतम् प्रतिष्ठा च षोडशा
स्याष्टस्फुरत्षोडशदलाम्बुजम् निवृत्त्याकारविलसच्चतुष्कोणविरा
जितमिति । दिदशाश्चित्कलातन्मयमन्त्रस्त्रिकोणशान्त्यतीत-
शान्तिविद्याप्रतिष्ठानिवृत्तयो गगनादिपंचभूतकलास्तन्मयमन
स्य क्रमित्यर्थः अवयवार्थस्तस्पष्ट एव अस्यैव चक्रस्य संहारक्र
मेण वासनान्तरमाह त्रैलोक्यमोहनाद्येति त्यादि क्रियाशेषमि
त्यनेन चत्रतशाद्धः सर्वाङ्गकामकलारूपत्वप्रतिपादनप्रसंग
परिसमाप्तो त्रैलोक्यमोहनाद्येतन्नवचक्रेशरीष्वरीति । त्रैलोक्य
मोहनाद्येतित्यादिशब्दात्सर्वाशापरिपूरकादिचक्राष्टकं ते ने
षां नामान्तराण्यवगम्यंति त्रैलोक्यमोहनाद्येतन्नवचक्रे ज्ञाता वेक

वचनम् त्रैलोक्यमोहनादेष्वित्यर्थः नादो बिन्दुकलाज्येष्ठा रौद्री वामा
तथा पुनः विषघ्नी लहरी चैव सर्वानन्दा समाश्रिता इति । नादादि
सर्वानन्दान्तान नवचक्रयत्रैलोक्यमोहनादिबिन्द्वन्तविचक्रेषु
क्रमेणाधिवसन्तीत्यर्थः परार्थः अष्टपत्रपूर्वं स्थितिकारूपमेवेत्या
दिना प्रकाशशनामं विकारादीनां चतुर्णां त्रिकोणादिचतुरश्रान्त
मयता वासनामुक्ता इदानीं विमर्शांशनां शान्तादीनां चतुर्णां च
तुरश्रादिबिन्द्वन्तचक्रमयतां वासनामाह निरंशो नादबिन्दू च
कला चेच्छास्वरूपकम् ज्येष्ठा ज्ञानं क्रियाशेषमिति । निरंशाशा
न्ताशक्तिः शान्ता यानिरंशत्वं चिद्रूपत्वात् तेन निरंशो नादबिन्दू अ
वपि शान्ताशक्तिमया नादबिन्दुरूपं चतुरस्रषोडशदलात्मकच
क्रद्वयं शान्ताशक्तिमयमित्यर्थः कला चेच्छास्वरूपकः इच्छा
याः स्वरूपं कलारूपमष्टदलपद्ममिच्छाशक्तिमयमित्यर्थः ज्येष्ठा
ज्ञानं ज्ञानशक्तिरेव ज्येष्ठारूपं चतुर्दशारं ज्ञानशक्तिमयमित्यर्थः
क्रियाशेषा रौद्री वामा विषघ्नी लहरी सर्वानन्देति शक्तिपञ्चक
रूपं द्विदशारारष्टकोणत्रिकोणबिन्द्वाख्यचक्रपञ्चकं क्रियाशक्तिम
यमित्यर्थः पूर्वं चक्रस्य स्थूलाकारादिस्मारम्भकामकलारूपत्वप्र
तिपादितानामुपसंहरति इत्येवं त्रितयात्मकम् चक्रं कामकलारू
पं प्रसारपरमार्थत इति । यद्यस्मात्प्रसृतं तत्तस्य परमार्थतः तद्रूपं
वतत् यथा मृद्घटस्य मद्रूपं मृद्घटः तन्तवः पटस्य तन्तुरूपः पटः ए
वं कामकलातः प्रसृतस्य चक्रस्य कामकलात्वं परमार्थतः त
द्रूपं चेदं चक्रमित्यर्थः पुनरस्यैव चक्रस्य प्रकारान्तरेण वासनान्तर
माह अकुले विषुसंज्ञे चेत्यादिना परमानन्दपूरितमित्यनेन अकु
ले विषुसंज्ञे च शाक्ते च ह्यते तथा पुनः नाभावनाहते शुद्धे लविका च
भ्रुवोन्तरे इन्दौ तदर्धरोधिन्यां नादे नादान्त एव च शक्तौ पुनर्व्यापि
कायां समनोन्मनि गोचरे महाबिन्दाविति । कुलादस्मादकुलसु
षुम्णामूले सहस्रदलकमले नाम तदुपर्यष्टदलोर्ध्वस्थितमष्टदलं
कुलपद्मं तदूर्ध्वमकुलपद्मं समग्रहे अधश्चोर्ध्वसुषुम्णायाः सहस्रदलम

युतम् रक्तं श्वेतं च सहस्रदलसंस्थशक्तिभिर्युतम् ऊर्ध्वाधोमुखेमीशा 15
नि कर्णिकाकेसरान्वितम् शक्तिरूपमहादेवि कुलाचलमयं शुभं
पंकजद्वयमीशानि स्थितं शाश्वतमव्ययम् तयोर्मध्ये सहस्रेणान्त
स्थिद्दशाधारपंकजम् शक्तिरूपशिवाकारं सर्वाभासनिजालयम्
तेषां रूपं क्रमेणैव वक्ष्याम्यहं शृणु नारायणि रन्ध्रमेभ्रान्तरे देवि पंचांगु
लसमुच्छ्रितम् रन्ध्रमेकांगुलं मध्ये ह्यर्धांगुलसमुच्छ्रितम् रविसारि
णम् तस्य मूले महायोनिस्त्रिकोणाकाररूपिणी सहस्रेणयोनिम
ध्यस्था तस्य मूले महेश्वरि अधः पद्मं सहस्रान्तं कर्णिकाकेसरान्वि
तम् तैजसं रक्तवर्णाभं तद्दलस्थितिशक्तिभिः प्रतिकिंजल्कसंस्था
भिः शक्तिभिः संवृते प्रिये कर्णिकामध्यतो देवि कुलदेवी च संस्थि
ता तदूर्ध्वे सहस्रेणायाम मध्ये त्वेकांगुलोपरि पद्ममष्टदलैर्युक्तम
ष्टाग्निसमन्वितम् रक्तं सकर्णिकोपेतं रक्तकिंजल्कशोभितम्
अग्र्याग्रस्य त्रिशृंगी च ज्वालेणायष्टभैरवः अष्टपत्रस्थितग्रस्थि
स्थितवर्णादिशक्तिभिः तदग्रशक्तिभिश्चैव पृष्ठगास्याभिः समावृ
तम् तन्मध्ये कोलवशात् सेवितं च स्मरेत्ततः एकांगुलप्रमाणेन
धषट्दलं कुलपंकजमिति नतकूलात्कुलमिति वेदयमर्हितर
नरालेस्थिताष्टदलपद्मस्याप्यकुलत्वं किं तस्यादिमतत्राह विष्णु
संज्ञेचेति विश्वयोनौ यन्त्रगुणेन दन्तगीतत्रिंशत्पंकजानि च प्राप्त
वन्ति तत्सहस्रदलकमलं वियत्सर्वाधारत्वात् तेनाष्टदलकम
लमकुलमित्यर्थः शाक्ते वह्नौ वह्नौ शाक्ते इति त्रयेणयपठितं
वह्निमूलाधारः वह्निविंबाधारत्वात् तदुक्तं स्वच्छन्दसंग्रहे आधा
रपंकजपार्थिवत्वमन्तः केसरम् अयोमुखौतन्मध्ये कुण्डलीपर
मेश्वरि स्वयंभुमध्यगा चिन्त्या वरदादिभिरावृता पार्थिवं पंकजो
ह्येतत्तस्याधः पंकजं परम् तैजसं परमेशानि तन्मध्ये सितशक्तयः
निष्कलापरमेशानि विद्युत्पुंजनिभाः स्मरेत् तदूर्ध्वे कर्णिकामध्ये
वह्निविंबं तदूर्ध्वकम् पूणपीठं च तस्योर्ध्वे शाकिनी संस्थिता प्रिये

यो॰
टी॰
७

इति शाक्ते शाक्तिकुण्डलेति वा तदूर्ध्वे स्थितत्वात् शाक्तं स्वाधिष्ठानं तदुक्तं
स्वच्छन्दसंग्रहे आधारपंकजस्योर्ध्वे सार्धद्व्यंगुलेन तु परि तेजस्सस्वाष्टप
त्रं च पीतकर्णिकयायुतम् कुण्डलेति वा कर्णिकामध्यसंस्थितां नगादि
सेविता एतस्माद्व्यंगुलादूर्ध्वे स्वाधिष्ठानं षडस्रकम् अथ च बन्धि
नीशाक्तिपूर्वाभिः शक्तिभिर्वृतम् काकिनीमभिसञ्चिन्त्येति ना
भौ दशदलकमले मणिपूरके तदुक्तं तत्रैव नाभेरष्टांगुलोपरित
स्त्वं मणिपूरं च दशपत्रसुशोभितम् लाकिनीमध्यगं तच्च भास्व
र्यादिभिरावृतमिति अनाहते हृदयस्थाने द्वादशदलकमले तदु
क्तं तत्रैव चतुर्दशांगुलादूर्ध्वे मणिपूराख्यपंकजात् पंकजं राकिणी
मध्ये द्वादशारमनाहतम् तत्रस्थकालरात्र्यादिशक्तिभिस्समावृतम्
तत्रस्थसूर्यबिंबे तु नादो सा नाख्ययो ऽकमिति शुद्धकण्ठस्थिते षो
डशदलकमले तदुक्तमत्रैव तस्मादेकांगुलादूर्ध्वे विशुद्धं षोडशार
कम् मध्यगा डाकिनी वा ष्ट्यपत्रेषु परमेश्वरि अमृताद्यक्षरान्तः
स्था अक्षरबिंबं तदूर्ध्वं तदुतिलंबिकाग्रे अष्टदलकमले तदुक्तमत्रैव
कण्ठोर्ध्वे परमेशानि लंबिकाचतुरंगुले तस्याष्टदलपद्मं वशि
त्वादिभिरावृतम् इति भ्रुवोन्तरे आज्ञायां द्विदलकमले तदुक्तं त
त्रैव आज्ञाधारद्विपत्राब्जं द्वचद्विदलसंस्थितम् हंसवतीक्षमाया
क्षद्वयमध्ये तु हाकिनीति भ्रुवश्चैकवचाम् भूतयोपलक्षणं भ्रु
वोरनन्तरं इत्यर्थः इन्द्रो बिन्दो बिन्दुतदर्धरोधिनी नादनादान्तश
क्तिव्यापिकासमनोन्मनीनामुपर्युपरि रूपाणि उच्चारणकालेच
वदाति बिन्द्वाद्युन्मन्यन्ताः भागाः सूक्ष्माः सूक्ष्मतराः देहचक्रविद्या
नां साधारणाः अत्र त्रैलोक्यमोहनाद्युन्मन्यन्तास्थूलसूक्ष्मसूक्ष्म
तरेषु भागेषु महाबिन्दोः च तान्विभावयेदित्यर्थः पुनरपि त्रैविध्य
माह पुनश्चैवं विद्याचक्रं तु भावयेत् इति । एवमुक्तप्रकारेण वि
भाविते चक्रे पुनस्त्रिधा विभावयेत् त्रैविध्यमाह आज्ञान्तसकलेप्र
क्तिततः सकलनिष्कलम् उन्मन्यन्तपरस्थाने निष्कलं च विद्यास्थित

मिति आज्ञान्तमकुलाद्याज्ञापर्यन्तं चतुरश्रादित्रिकोणान्तं च ।
कोष्ठकं स्थूलं भावयेत् तद्भावनेन सकलं ततो बिन्दुमारभ्योन्मन्य-
न्तं चक्रं सूक्ष्मं सूक्ष्मतरभागान्भावयेत् तद्भावनेन सकलनिष्कलं
तत्राप्युन्मनानिःस्पन्दा वाक् सूक्ष्मसंवित् तद्रहितः संवित् उन्म
नावस्था सूक्ष्मा मूलाधारात्प्रथममुदितेति परापरं स्थानं महा
बिन्दोरूर्ध्वं सूक्ष्मसंविदं भावयेत् तद्भावनेन निष्कलं विद्यात् स्थितं ।
मुकुलाद्याज्ञान्तानां तत्रान्तरेण विस्तरेणोक्ताः अतो नात्रोक्ताः वे
दवाद्यमनन्तानां च रूपमुच्चारणकालं च दीपाकारोऽर्धमात्र
इत्यादिना मनोन्मन्यन्तेन दीपाकारोऽर्धमात्रश्च ललाटे वृत्त इ
ष्यते इति । दीपाकारो दीपस्य यादृशं भासनं तादृशमस्येत्य-
र्थः अर्धमात्रश्च ह्रस्वस्योच्चारणकाले मात्रोच्यते मात्राया अर्ध
मुच्चारणकाले यस्य सोऽर्धमात्र ललाटे वृत्त इष्यते वृत्तलासन्नि
वेशो ललाटे भ्रुवोरुपरिभागे दीपाकारोऽर्धमात्रोच्चारणका-
ले वृत्तसन्निवेशो बिन्दुरित्यर्थः बिन्द्वादीनां तु विस्तारः स्वच्छन्द
संग्रहे प्रपञ्चितः तत्र बिन्दोर्यथा बिन्द्वाचरणेन तत्र ह्यर्धतः सूर्य
कोटिप्रतीकाशमतिदीप्तं महाद्युतिम् तन्मध्ये दशकोटीनां स
ख्या योजनपंकजाम् तत्कर्णिकायामासीनः शान्त्यतीतेश्वरः
प्रभुः पंचवक्त्रो दशभुजो विद्युत्पुञ्जनिभाकृतिः निवृत्तिश्च प्रति
ष्ठा च विद्या शान्तिरनुक्रमात् परिवार्य स्थितास्त्वेताः शान्त्यती
तस्य सुन्दरि वामभागे समासीना शान्त्यतीता मनोन्मनी पं
चवक्त्रधराः सर्वाः दशबाह्विन्दुभूषणाः बिन्दुतत्त्वं समाख्यातं को
लक्षयशतैर्वृत्तमिति अर्धचन्द्रस्तथाकारः पादमात्रस्तु ह्यर्धत इ
ति । अर्धचन्द्रो बिन्दोरूर्ध्वभागस्तथाकारो दीपाकार एव पादमा
त्राकालस्य च तदूर्ध्वभागोच्चारणकाल इत्यर्थः तदूर्ध्वके बिन्दोरू
र्ध्वभागे बिन्दूपरिदेशे पादमात्रोच्चारणकाल इत्यर्थः दीपाकारो
र्धचन्द्र इत्यर्थः ज्योत्स्नाकारा तथा ह्युच्चारोधिनी मध्यविग्रहेति ।

सोत्वाकाराचन्द्रिकासमकान्तिः अष्टांशमात्राष्टांशयोच्चारणकाला
अधुविग्रहात्रिकोणाकारारोधिनी द्वयोरपि स्वच्छन्दसंग्रहे यथाग्रा
पञ्चः अर्धचन्द्रस्तदूर्ध्वे तु रोधिनी तस्य चोपरि ज्योत्स्ना ज्योत्स्नावती।
कान्तिः सुप्रभा विमला पि च अर्धचन्द्रास्थिता ह्येताः कलाः पञ्च प्र
कीर्तिताः इन्धिनी रोधिनी रोधा ज्ञानरोधा तमोपहा निरोधिका
कलाः पञ्च कथितास्तव सुन्दरि ब्रह्मादिपरमेशान्तानां परप्राप्तिनि
रोधनात् निरोधिकेति संप्रोक्ता तस्या भेदाद्वरानने परापदाप्तिसं
प्राप्तिरिति बिन्दुद्वयान्तरे दण्डः शेषरूपो मणिप्रभः कलांश इति।
बिन्दुद्वयमध्यगत ऋजुरेखाकारः शेषरूपोऽङ्कद्वयमध्यगतस्थि
रोशेषः इत्युच्यते तन्तुरूपः मणिप्रभः पद्मरागसवर्णवर्णः का
लांशः कलाः षोडशमात्राष्षोडशांशोच्चारणकाल इत्यर्थः सगु
नः कलांशो नादः इत्युच्यते कलो नादः ध्वनिस्तु मधुरास्फुटक
लरवसमरः मधुरास्फुटो ध्वनिर्नादः नादस्य प्रपंचः स्वच्छन्दसंग्रहे यथा
रोधिन्याख्यं यदुक्तं तेनादस्तस्योर्ध्वसंस्थितः पद्मकिञ्जल्कसंका
शः सूर्यकोटिसमप्रभः पुरः परिवृतो संख्यैमिध्ये पंचकलास्तृतः
इन्धिरादीपिका चैव रोधिका मोचिका तथा ऊर्ध्वगामध्यगाता सा
पंचमी परमाकला चन्द्रकोटिसमप्रख्या तन्मध्ये तथयोजनम् प
द्ममध्ये समासीनमीश्वरोचोर्ध्वगामिनम् चन्द्रायुतप्रतीकाशं पं
चवक्त्रं त्रिलोचनम् इन्दिरा धैर्यवृतं देवं शूलपाणिं जटाधरम् तस्यो
त्सङ्गावतामूर्ध्वगामिनीं परमां शिवाम् ध्यायेदिति द्विगुणांशश्च ना
दान्तो विद्युदुज्ज्वलः हलाकारस्तन्मध्यक्तविन्दुयुक्तो विराजिते इति।
हलाकारो लाङ्गलरूपसदृशः समक्तविन्दुयुक्तो विन्दुद्वयमध्ये
दक्षिणभागस्थितविन्दुयुक्तः विद्युदुज्ज्वलः तडित्सदृशकान्तिः द्वि
गुणांशश्च पूर्वोक्तषोडशानां द्विगुणांशद्वात्रिंशत्तमो भागः कथं
पात्राद्वात्रिंशत्तमांशोच्चारणकालो हलाकारादिविशेषणविशेष
तो नादान्त इत्यर्थः नादस्यान्ते लयो भवति यत्र ब्रह्मरन्ध्रं तस्य पञ्चकः

स्वच्छन्दसंग्रहे यथा हकारस्तु नादान्ते भित्वा सर्वमिदं जगत् ऊर्ध्वः शा
क्त्या विनिर्भिद्य ऊर्ध्वशक्तिवशानुगः नाड्या ब्रह्मबिले लीनः स्वयमूर्ध्व
निलक्षणः अतो ब्रह्मबिलं ज्ञेयं हृद्रकोशसमुद्भवम् तत्र ब्रह्मशि
वो ज्ञेयः शशांकोशशांकोशतसन्निभः दशबाहुस्त्रिनेत्रश्च पंच
वक्त्रो महेश्वरः ब्रह्मणीव परा शक्तिर्ब्रह्मणोत्संगगामिनी ह्रां र
सामोदमार्गस्पर्शे यस्थितावस्थितेति शक्तिवामस्थबिन्दुघटित्रि
कोणाकारं तथा पुनरिति । पुनः शब्देन पूर्वं भोविमर्शोऽयो यो मते पू
र्वेषां बिन्द्वर्धा शान्ता स्वरूपवर्णमात्राकलाः पश्चाद्बिन्दुरयमर्थः
शक्तिः बिन्दुद्वयमध्ये वामभागस्थबिन्दुत्रितारूपः शक्तिप्रपञ्चः
स्वच्छन्दसंग्रहे ह्युक्तो यथा शक्तितत्त्वसमाख्यातं भुवनेशाश्रितं मह
त् आद्यां भुवनानां च प्रवक्ष्यामि समासतः सूक्ष्मा चैव सुसूक्ष्मा च
तथा चैवामृतामृता चतुर्दिक्षु स्थितास्तासां मध्यस्था व्यापिनी स्थि
ता पंचवक्त्रा त्रिनेत्रा च स्वतेजस्का च पंचमी शक्तितत्त्वसमाख्यातं
ध्यानान्मुक्तिफलप्रदमिति व्यापिकाबिन्दुविलसत्त्रिकोणकार
तां गता इति । व्यापिकाबिन्दुविलसद्धामादिति शक्तिमयत्रिको
णरूपतां गतेत्यर्थः इयं तु शक्तितत्त्वकथने नैव कथिता स्वच्छन्द
संग्रहे यथा सूक्ष्मा चैव सुसूक्ष्मा चेत्यत्र व्यवहितमुक्तम् बिन्दुष्ठ
यान्तराललस्यत्सदृक्षरेखामयी पुनः समनेति । सकलसमनायाः प्र
पंचः स्वच्छन्दभैरवे यथा चिदानन्दस्वरूपात्तु परा शक्तिः स्वरूपि
णः समना नाम सा शक्तिः सर्वकारणकारणम् सदानन्तानिवि
भर्तीयं शिवेन समधिष्ठिता तदारूढः स भगवाञ्छिवः परमका
रणम् शिवः सर्वस्य कर्तायं शक्तिः कारणमिष्यत इति बिन्दुवि
लसद्रेखा तथोन्मनेति । एकस्मादेव बिन्दोर्विलसद्रेखा
रूपोन्मना उन्मनायाः प्रपंचः स्वच्छन्दसंग्रहे यथा या शक्तिः कार
णे चैव तत्त्वे उन्मनी स्मृता नात्र कालकला भानं व्रतत्वं न च देवता
स्तु निर्वाणपरं शुद्धं रुद्रवक्त्रं तदुच्यते शिवशक्तिरिति व्याप्ता त्रिवि

यो॰
टी॰
९
9

कल्पा निरंजनेति शक्त्यादीनां समनान्तानां वर्णमात्राशकालं चाधि
शक्त्यादीनां वपुः स्थूलं द्वादशादिसमन्विमाम् चतुःषष्टिस्तदर्धं तु द्वि
गुणं द्विगुणं ततः शक्त्यादीनां तु मात्रांशो मनोन्मन्याइति । मनोन्म
न्याइति मनोन्मनीपर्यन्तं मनोन्मनीनाम समना मनः सहितत्वात्
तद्रहितत्वादुन्मनीत्युच्यते शक्त्यादीनामुन्मनीपर्यन्तानां समा॰
नां वपुः स्वरूपं स्थूलं तु द्वादशादिसमन्विमम् एकद्वेहेलयोदितद्वा
दशादिसमवर्णावर्णम् मात्रांशाः चतुःषष्टिमात्राशकालः चतुः
षष्टिः तमोपारस्यार्थः तदर्धं तु व्यापिकाया मात्रांशोच्चारणं द्विगुणं
व्यापिकोच्चारणमात्रावयवकालेऽष्टाविंशत्युत्तरशततमो भाग इ
त्यर्थः समनोच्चारणमात्रावयवकालः षडधिकपंचाशदुत्तरद्वि
शततमो भाग इत्यर्थः तथोन्मनीति उन्मनी यथेदानीं सकथित
विशेषणा तथा निराकारा निरुच्चारा यतो वाचो निवर्तन्ते अप्रा
प्य मनसा सहेति उपनिषदुक्तरीत्या मनोतीतगोचरत्वादुन्मनी
त्युच्यते महाविन्दोर्याकाररूपवर्णोच्चारकला न विद्यन्ते अतो
नात्रोच्यते तस्य विश्वोत्तीर्णत्वात् तदुक्तं स्वच्छन्दसंग्रहे तत्वाती
तं वरारोहे वाङ्मनोतीतगोचरम् निष्कलं चापि सकलं नीरूपं
निर्विकल्पकम् निर्द्वन्द्वं परमं तत्वं शिवाख्यं परमं पदमिति ह
कारादिविन्द्वन्तानां स्थूलवर्णानामुच्चारणकालो मात्राविन्द्वा
दिसमनान्तानामर्धमात्रात दर्धादिक्रमेण लवपर्यन्तमुच्चारण॰
कालो लवेन नलिनीपत्रसहस्रस्य सूच्यभिवेदने दलदलेन तु
यः कालः स कालो लववाचक इति वचनात् तदर्धं सूक्ष्ममेव त
दधिकस्य त्वन्तरकालाभावात् एवंविधविश्वभावनया शिवव
द्भूयादित्यर्थः तदुक्तं विज्ञानभैरवभट्टारके पिण्डरूपस्य मंत्र
स्य स्थूलवर्णक्रमेण तु अर्धेन्दुविन्दुनादान्तशून्योच्चाराद्भवे॰
च्छिव इति अत्र विन्दुवेत्विति वक्ष्ये हृताक्षरो येन न्यासः वि॰
न्दुवेन्नादान्तशून्योच्चाराद्भवेच्छिव इति प्रसाहारीन्यायदर्शन

अर्धेन्दोरूपरिरोधिनी नादयोर्नादान्तस्य चोपरि चिच्छक्तिर्व्यापिका
समानानां च विद्यमानत्वात् सूक्ष्मशब्देनोन्मनोच्यते अत्र येन्दुबिन्दु
नादान्तसूक्ष्मोऽप्युच्चारमवेदिति पिण्डरूपस्य मंत्रस्य संग्रहेणोक्तिः दे
शकालानवच्छिन्नं तद्रूपं परमं महत् निसर्गसुन्दरं तत्तु परमानन्द
चूर्णितम् । रूपं हकारादिबिन्द्वन्तानां सकलनिष्कलकेवलनि
ष्कलानां त्रयाणामप्येकं परंमहत् महत्त्वं च राशीनामप्यल्प
सूक्ष्मपरिमाणापेक्षया तु तदेकं परमिति यतः परं महत्त्वं नास्ति त
त्परं महत् अतएव देशकालानवच्छिन्नं देशकालाकारैरनव
च्छिन्नमेव परमं महदिति तेन निसर्गसुन्दरं लोके सुन्दरमपि वस्त्वा
द्यलंकारैरारोपितैः सुन्दरमिव प्रतीयते इदं तु स्वभावसुन्दरं स
र्वैः स्वस्वात्मतया स्पृहणीयत्वात् परमानन्दचूर्णितम् आनन्दः श
ब्दादिविषयानुभवेष्वप्यस्ति क्षणिकः तदुच्यते परमानन्दचूर्णितमि
ति कोऽस्याः त्रिविरूपस्य सरूपवस्तुभ्यः पुरातनी देशकालानवच्छि
न्नपरममहद्रूपा स्वभावसुन्दरी परमप्रकाशात्मकपरशिवसामर
स्यपरानन्दशालिनी विमर्शशक्तिर्महात्रिपुरसुन्दरी समर्था प्रसू
तं विश्वलहरीस्थानमिति पूर्वपत्रसूचितम् मातृकामयत्वास्तु नामि
दानींविवृणोति आत्मनइत्यादिना आत्मनः स्फुरणं पश्येद्यदा साप
रमाकला अंबिकारूपमापन्ना परावाक् समुदीरिता इति । सापर
मा सर्ववर्णाद्यभूत विमर्शरूपा कला विमर्शशक्तिः आत्मनः पर
शिवस्य स्फुरणं पश्येदित्यादिक्रमेण वैखरीपर्यन्तं विमर्शनं पश्ये
दुन्मिषेत्तदा परमशान्तात्मिकाभूत्वाम्बिकारूपमापन्ना प्रका
शरूपायाः सामरस्यमापन्ना परावाक् समुदीरिता परमार्कोच्य
ते तदुक्तं संकेतपद्धतौ अनयोः सामरस्यं यत्परस्मिन्महस्यस्फुटमि
ति बीजभावस्थितं विश्वं स्फुटीकर्त्तुं यदोन्मुखी वामा विश्वस्य वमना
शंकुशाकारतां गता इच्छाशक्तिस्तदा सेयं पश्यन्ती वपुषा स्थितेति ।
बीजभावस्थितं विश्वं यथा हृत्स्थषट्त्रिंशत्तत्त्वात्मकं विश्वं परा

योहृ. टी. १

णंकारणेनावस्थानमाश्रितं स्फुटीकर्तुं यदोन्मुखी स्फुटीकर्तुमु-
न्मादयितुमुन्मुखी अत्रोन्मादनं नाम स्फुटीकरणं अत एव कार्यस्य
स्फुटीकरणद्वारा विश्वस्य वमनात् कारणमन्तो विश्वस्य वमनात्
वमनं नाम उदरस्थस्याहारादेः बहिर्निर्गमनं तदुन्मादनमप्येवमे-
व अत एव गर्भभावेनात्मोदरगतस्य विश्वस्य बहिर्वमनाच्चामा च अ-
ङ्कुशाकारतां गता वक्रता अत्र वामा शृङ्गाटस्य वामरेखा सृष्टिरूपा-
ऽभूदित्यर्थः तथेच्छाशक्तिः सामरस्यमापन्ना यशन्तीरूपेण
स्थितेत्यर्थः ज्ञानशक्तिस्तथा ज्येष्ठा मध्यमा वागुदीरिता ऋजुरेखा-
मयी विश्वस्थितौ प्राप्तितविग्रहेति । तथा ज्येष्ठाशक्तिर्ज्ञानशक्ति-
र्यथा वामाशक्तिरिच्छाशक्तिः सामरस्यमापन्ना विश्वस्थितौ प्राप्त-
विग्रहा मत्र विश्वस्थितौ हेतुत्वात् ऋजुरेखामयी अत्र शृङ्गाटाग्ररेखो-
कारा मध्यमा वागुदीरिता मध्यमामातृकात्वमापन्ना तत्संहृति-
दशायां तु वैन्दवरूपमास्थिता प्रत्याहृतिक्रमेणैवं शृङ्गाटवपुरुज्ज्व-
ला क्रियाशक्तिस्तु रौद्रीयं वैखरी विश्वविग्रहेति । एतस्याः स्थिता-
स्य विश्वस्य संहारकाले वैन्दवरूपमास्थिता अविकाशान्ता सामर-
स्यरूपास्थिता मध्यबिन्दोराविर्भूय सृष्टिस्थिती च संपाद्य तत्संहारो-
न्मुखी पुनर्बिन्दुमेव प्रविष्टेत्यर्थः एवं प्रत्याहृतिक्रमेणैव क्रियाश-
क्तिसामरस्यात्मैवं शृङ्गाटवपुः शृङ्गाटस्य दक्षिणरेखाभूतोज्ज्वला शृ-
ङ्गाटस्य रूपेण भासमाना शृङ्गाटं नाम त्रिकोणं वैखरी विश्वविग्र-
हा वाग्रूपप्रपञ्चमयवैखरीरूपा जातेत्यर्थः प्रकाशविमर्शांशरूप-
णां अंविकादीनां शान्तादीनां च चतसृणां शक्तीनां शृङ्गाटरूपतामु-
क्त्वेदानीं त्रिकोणान्तर्गतपीठाकारवर्णलिङ्गावस्थाचतु-
ष्टयमयतां वासनामाह भासनाद्विश्वरूपस्येत्यादिनार्थरूपाण-
मूनि लिमन्तेन उत्तरार्धवक्ष्यमाणचतुष्टयहेतुमाह भासनाद्वि-
श्वरूपस्य स्वरूपे बाह्यतोऽपि च एताश्चतस्रः शक्तयस्तु कामपूर्जाप्र इति
क्रमात् इति । विश्वपीठादिभूम्यन्तं नाम रूपात्मकं तद्रूपस्य स्वरू-

पेबीजभावेन वा स्थिताः सृष्ट्यात्मना भासनात् एताश्चतस्रः शक्तयस्तु पू
कीज्ञानक्रियासमष्ट्यात्मानोः शक्तिः शम्भुसमुत्पत्तिः चतस्रः क्रमेण परस्प
रसामरस्यमापन्नाः कालजापयुतिक्रमादासन् का कामरूपपीठं पू
र्णागिरिपीठं जालन्धरपीठमोड्डियानपीठं प्रकाशविमर्शः सा
समरसीभूताः पूर्वोक्तास्तु चतस्रः शक्तयः कामरूपपूर्णगिरिजाल-
न्धरओड्डियानरूपेण परिणताः पीठचतुष्टयस्य पिण्डादिमयतावा
स्तनामाह पीठाः कन्दपदे रूपे रूपातीते क्रमात्स्थिता इति । कन्द इति
स्वगुणा मूले कन्दशब्देन तत्रस्था पिण्डं वा कुण्डली लसन्ते तदुक्तं
स्वच्छन्दसंग्रहे लिङ्गं वा लसद्गुणाय कन्दस्थाने च मारुतम् इच्छा-
ज्ञानक्रियारूपां कुण्डलीं परमेश्वरीम् प्रसुप्तभुजगाकारां मातृ-
कारूपिणीं शिवामिति पदं हंसः रूपं बिन्दुः रूपातीतं निरञ्जनं तम
तदुक्तं स्वच्छन्दसंग्रहे पिण्डं कुण्डलिनी शक्तिः पदं हंसः प्रकीर्तितः
रूपं बिन्दुरिति ख्यातं रूपातीतं तु चिन्मयमिति पीठाश्चत्वारः पिण्ड
पदरूपरूपातीतशब्देन तत्स्थाना निआधारहृदयभ्रूमध्यब्रह्मर-
न्ध्रानिलयान्ते तेन क्रमात्तेषु स्थिताः तन्मया इत्यर्थः तेषां पृथिवी
वायुसलिलतेजोरूपतामाह चवर्यस्तत्र रूपभेदमाह चतुरस्रं तथा
बिन्दुषट्कयुतं च वृत्तकम् अर्धचन्द्रं त्रिकोणं च रूपाण्येषां क्रमेण तु
त्विति । चतुरस्रं चतुरस्ररूपः कामरूपपीठः भूतत्त्वमित्यर्थः भूम
ण्डलस्य चतुरस्ररूपत्वात् बिन्दुषट्कं च वृत्तकं पूर्णगिरिपीठः षड्
बिन्दुयुक्तवृत्तरूपः वायुमित्यर्थः वायुमण्डलस्य षडावर्तवृत्तरू
पत्वात् अर्धचन्द्रं जालन्धरपीठः अर्धचन्द्ररूपो जलमयः अम्मण्ड
लस्यार्धचन्द्ररूपत्वात् त्रिकोणमोड्डियानपीठस्त्रिकोणरूपः तेजस्
त्वमयः अग्निमण्डलस्य त्रिकोणरूपत्वात् क्रमेण कामरूपादिपी
ठानामेतानि रूपाणीत्यर्थः अत्र गगनरूपस्यारूपत्वात्त्रिरवयवत्वा
स्सान्तुक्तिः पीठानामेव क्रमेण वर्णानाह पीतो धूम्रस्तथा श्वेतो र-
क्तो रूपं च कीर्तितमिति । पृथिवीवायुसलिलतेजसां क्रमेण पीत

श्वश्चेतरक्तवर्णत्वात्पीठानामपि तत्तद्वर्णत्वमित्यर्थः अवयवार्थः स्प
ष्टः अत्र भूतानामक्रमः पीठानुसारेण पीठानां त्वात्मभेदेन क्रमस्य नि
यमात् पीठेषु लिंगान्याह स्वयंभूर्बाणलिंगं च इतरं च परं पुनः पीठ
स्थितानि लिंगानि संस्थिता ...... वरानन इति । लीनं बाह्येन्द्रियगोचरं चि
द्रूपमर्थं गमयन्तीति लिंगानि विषयप्रकृतिं प्रतिपन्नवतीमतिवृ
त्तिमहंकरणं च मतेः उभयं परिपश्यन्तियोधिकृतः ....
परमात्मरसो ...... विषयाकृतसंस्थितिरेकविधा मनस
स्तु सदा व्यवहारविधा अहमिमपि तद्विषयाचपरापत्तिवृत्तिरपि ज्व।
लितात्मचितामनोहंकारबुद्धिचित्तात्मकानि कामरूपादीनि चित्र
स्फुरत्ताधाररूपत्वात् पीठानि तेष्वन्तः करणवत्तद्विषयत्तवृत्तिच
तेष्वयमयानि लिंगानि स्वयम्भ्वादीनि सन्तीत्यर्थः एतत्सर्वं सौभा
ग्यहृदयोदये प्रपञ्चितं पुनरेव कामपीठे तदग्रकोणस्थिते मनो
रूपे प्रतिफलितं तज्ज्योतिःस्वयंभूलिंगं समीरितं मुनिभिःदक्षिणको
णेऽहंकृतिरूपे जालंधरे तत्संक्रान्तपरधामबाणलिंगं जातं संक्रा
न्त्युपाधिभेदवशात् मध्यत्रिकोणकोणे वामे श्रीपूर्णपीठमेतस्मि
न् बुद्धिमयपरं तेजः प्रतिफलितं त्वितरलिंगं तत्तापातचित्तमये श्री
पीठे ज्योतिर्विन्दोस्तदस्य संक्रान्तं प्रतिफलितं परस्था अतः परलिंगं
तत्र कीर्तितं प्राज्ञैरिति लिंगानां स्वरूपं पीतादिवर्णत्वे विपरीवर्ण
श्च विभज्याह हेमबन्धूककुसुमस्फटिकाभानितु स्वराष्टतत्त्वि
कूटस्थमहालिंगा स्वयंभुवम् कादितान्तास्वरवृत्तं बाणलिंगत्रिको
णकम् कदंबगोलकाकारं यादिसान्तावराष्टतम् सूक्ष्मरूपं स
मस्तार्णवृतं परमलिंगकम् बिन्दुरूपं परानन्दकन्दं नित्यपदोदि
तमिति । हेमनिभं पीतवर्णं त्रिकूटं बिंदुत्रयं कूटरूपं स्वराष्टते अ
कारादिषोडशस्वरावृतं स्वयंभूलिंगं बन्धूककुसुमनिभं रक्तवर्णं
त्रिकोणरूपं कादिटान्तावराव्रतं बाणलिंगं स्फटिकेन्दुनिभं श्वेतवर्णं
कदंबगोलकाकारं कदंबकुसुमगोलकरूपं यादिमात्रावराष्ट

ते बाणलिंगं शरच्चन्द्रनिभं पीतवर्णं कदंबगोलकाकारं कदंबकुसु
मगोलकरूपं पश्चादिशान्ताक्षरावृतं तत्र लिंगोपरि लिंगस्योपरि तेजोरू
पत्वात् अतः सूक्ष्मरूपमनिन्द्रियगोचरमतएव बिन्दुरूपं समस्तारुणो
त्कृतं आदिक्षान्तपंचाशदक्षरकृतपरमलिंगं परानन्दकन्दं परया
अक्षररूपायाः पश्यन्त्यादिशाखावत्या लताया आनन्दकन्दं निस्स
पदोदितं नित्यत्वं चमात्रैकत्वात् उत्पत्तिविनाशरहितत्वात् परा
द्विश्वशुद्धत्वमनःप्राप्यात् उदितं प्रथमस्पन्दरूपतया सर्वाण्यपि ।
बीजानि तत्र शुक्रायास्तुरीयविद्याया वाच्यरूपाणीत्याह बीजत्रैतय
शुक्रस्य सकलस्य मनोः ऊनः एतानि वाच्यरूपाणि कुलकौलं मया
नितत्विति । एतानि शक्तिचतुष्टयं पीठचतुष्टयं मानकाचतुष्टयं
मध्यकोणचतुष्टयं लिंगचतुष्टयं चेति एतानि सर्वाणि बीजत्रि
तयशुक्रस्य सकलस्य मनोर्वाग्भवकामराजशक्तिमयेनायास्त
त्समष्टिरूपायास्तुरीयविद्याया वाच्यरूपाणि विद्या वाचका निस
र्वाणि वाच्यानि अतएव तच्चतुष्टयरूपिणीयं विद्येत्यर्थः वाच्यवा
चकयोरभेदात् कुलमेयमानमातृलक्षणकौलतत्समष्टिस्त्वया
नीतमर्थः अमूनि शुक्रान्तानि सर्वाणि चतुरात्मकानि जाग्रदादिमया
नीत्यर्थः जाग्रत्स्वप्नसुषुप्त्याख्यतुर्यरूपाण्यमूनि त्विति । जाग्रज्जा
गरितं देहेन्द्रियव्यवहारः अन्तःकरणमात्रव्यवहारः स्वप्नः सर्वे
न्द्रियोपरतिस्तदवस्थाभ्यामपरामर्शः सुषुप्तिः तुरीयं चैतन्यमा
त्रवृत्तिः अत्रैव वक्ष्यति तवदेवि महाजाग्रदवस्थानिन्द्रियद्वयेरि
मादिना चक्रस्य शुक्रं चतुरात्मकताप्रकाशनमयैवेन्दवनिवासि
मा: स्वसंविदस्तदतीतरूपतामाह अतीतं तु परं तेजः स्वसंविदु
दयात्मकम् । अतीतं जागरितादिदशाचतुष्टयातीतमत एव परं वि
श्वोत्तरत्वात् किंच परमनुत्तरम् प्रकाशरूपम् अत्र श्रुतिः तदेव ज्यो
तिषां ज्योतिरिति स्वसंविदुदयात्मकमिति सर्वप्राणिष्वात्मतया स्थि
तम् तदुक्तम् नवशतीशास्त्रे अत्र ... परंज्योतिः सर्वप्राणिहृदि स्थि

तमिति । चक्रस्य पुनर्वासनान्तरकथनाय विभातीति वस्तु कथयित्वा
चक्रस्थां वामनामाह स्वेच्छाविश्वमयोल्लेखखचितं विश्वरूपकमिति ।
विश्वमयोल्लेखः विश्वं षट्त्रिंशत्तत्त्वात्मकं तन्मयश्चोल्लेखः उल्लिख्यते
इति उल्लेखश्चित्रं तेन स्वेच्छाविश्वमयोल्लेखेन खचितं मांसं स्वेच्छातू
लिकयात्मभित्तौ विश्वमुन्मीलयतीति अत्र प्रमाणवचनं जगच्चित्रं
समालिख्य स्वेच्छातूलिकयात्मनि स्वयमेव समालोक्य प्रीणाति भ-
गवाञ्छिव इति विश्वरूपमत एव शिवादिक्षित्यन्तरूपेण परिण
तमित्यर्थः यथा क्षीरं दध्याकारेण परिणमते तद्वच्चितिरेव विश्वा
कारेण परिणमते तदुक्तमीश्वरप्रत्यभिज्ञाहृदये चितिः स्वतन्त्रा वि
श्वसिद्धिहेतुरिति तेन किमायातं तदेव स्पष्टयन्नाह चैतन्यमात्मनो
रूपं निसर्गानन्दसुन्दरमिति । चैतन्यं चिद्विमर्शशक्तिः आत्मनः प्र
काशात्मनः परशिवस्य रूपं निसर्गानन्दसुन्दरं तत्सामरस्येन सह
जानन्दनोल्लासात् विलसद्रूपिणी य विमर्शशक्तिः प्रकाशात्मना
परशिवेन सामरस्यात् विश्वं सृजति न तु केवला यथा न केवलेन त
षेणाङ्कुरो जायते नापि तण्डुलेन किं तु ताभ्यां संयुतसिद्धिः संवत्यशा
लिभ्यां तदुक्तं महास्वच्छन्दसंग्रहे शिवाभिन्ना परा शक्तिः सर्वक्रम
शरीरिणीति तदेवाह मेयमातृप्रमापानप्रसरैः संकोचप्रभव
शृंगाटरूपमापन्नमिच्छाज्ञानक्रियात्मकमिति । मेयं प्रमेयं प्रमा
विषयः सम्यगनुभवः प्रमातृत्वाप्रमाता प्रमाकरणं प्रमाणम् तदु
क्तं तन्त्रान्तरे मितिः सम्यक्परिच्छित्तिस्तत्कर्तृताच प्रमातृता तदयोगा
व्यवच्छेदः प्रमाणं गोतममते इति निर्विकल्परूपायाः स्वसंविदो मा
तृमेयप्रमाणरूपेण विकल्पात्मना प्रसरणवशात्संकोचः शिवस्य प्रका
शात्मनो जीवस्य शक्तिविमर्श एव प्रमा मातृनिर्विकल्पात्मना
विश्वाकारा मेयमातृप्रमा प्रमाणभेदभोगदा संकोचरूपा तथा शिवो
पि संकोचरूपः एतत्रयमिच्छाज्ञानक्रियात्मकं इच्छादिवामादि
शाक्तं पश्यभेदभिन्नं शृंगाटरूपमापन्नं त्रिकोणरूपेण परिणतं सर्ववी

नंतितयपुक्तस्यसकलस्यमनोः पुनरित्यत्र कामकलादिकाया
विद्यायाः श्रीचक्रहेतुभूतत्रिकोणमयपीठादित्वं तदुपयतागु
रुकारइदानींदेवतायाअपितन्मयतामुक्तवानिति भावः तदेवविवृ
णोति विश्वाकारप्रथाधारेत्यादिस्फुरदूर्मिसमावृतमित्यन्तेन
विश्वाकारप्रथाधारनिजरूपशिवाश्रयमिति। विश्वाकारप्र
थाषट्त्रिंशत्तत्त्वात्मनापरिणताविमर्शशक्तिस्तस्या आधारः
निजंरूपंतात्त्विकंरूपंशिवः प्रकाशात्मकः स एवाश्रयं आधारो
यस्य तद्विश्वाकारप्रथाधारनिजरूपशिवाश्रयम् कामेश्वरा
ङ्कपर्यङ्कनिविष्टमतिसुन्दरमिति। परंतेजः कामेश्वराङ्कप
र्यङ्कनिविष्टं कामेश्वरः प्रकाशात्मकः शिवः तस्याङ्कपर्यङ्कनि
विष्टं विमर्शशक्तिरूपं अतिसुन्दरमतिसुभगं सर्वैः स्वस्या
त्मतया स्पृहणीयत्वात् इच्छाशक्तिमयं पाशमङ्कुशं ज्ञानरूपि
णम् क्रियाशक्तिमये बाणधनुषी दधदुज्ज्वलमिति। इच्छा
शक्तेरेव पाशो बन्धनहेतुत्वात् ज्ञानशक्तिरंकुशो मनोमयग
जस्य नियामकत्वात् क्रियाशक्तिमये बाणधनुषी शब्दस्पर्शा
दयो बाणा मनस्तस्याभवद्धनुरिति वचनात् शब्दादिबाणानां
मनसा धनुषा संयोजने क्रियाशक्तेरेव व्यापारः अत्रेच्छाशक्ति
मयं पाशं ज्ञानशक्तिमयमङ्कुशं क्रियाशक्तिमये बाणधनु
षी एवमायुधचतुष्टयं स्वेच्छया गृहीतकामकलामयविग्र
हवाङ्कचतुष्टयेदधत् उज्ज्वलं चिदात्मकत्वात् आद्याद्या
यिभेदेनाष्टधाभिन्नहेतिमदिति। आद्यः कामेश्वरः आद्या
यि कामेश्वर्यौ तयोः परंतेज एवमाद्याद्यायिभेदेनाष्टधाभिन्न
हेतिमत् हेतिरायुधमाद्यस्य चत्वार्यायुधानि आद्यायिण्य
श्चत्वारि वेत्यष्टधाभिन्नहेतिमत् परशिव एव प्रकाशविमर्शात्म
कौ निजांशौ विभज्य कामेश्वरः कामेश्वरी भूत्वा पाशाङ्कुश
धनुःशरान् स्त्रीभेदेनाष्टौ धृत्वा आद्याद्यायिभावेन स्वरमय

यो.हृ. टी. १२
13

मध्यत्रिकोणमध्यगतसदाशिवाख्यवैन्दवतुरीयबिन्दुमयेपरलिं
गेनिवसतीत्यर्थः इदमेवमित्युक्तं नवधाविभज्यआत्मानं नवच-
क्रेषुस्थितमित्याह अष्टारचक्रसंरूढं नवचक्रासनस्थितमिति ।
पूर्वोक्तक्रमेणतदेववामाद्येच्छादिमयंत्रिकोणमेवत्रिधाविभि
न्नद्विशत्येकवह्निभेदेनाष्टारचक्रमभूत् पुनस्तदेवशक्तिरूप
भूत्वानवचक्रमभूत् एवंरूपस्यमेवश्रीचक्रमष्टारचक्रम् चि
त्तिश्चेत्यचचेतनंस्वचेतनात्मकमेच जीवःकलाचदेवेशिमूलम-
पर्यष्टकमतमिति स्वच्छन्दसंग्रहोक्त्यानिजस्वरूपमपर्यष्टकंविभज्या
ष्टारचक्रं वशिन्यादिरूपेणसंरूढमित्यर्थः नवचक्रासनस्थितंप
वरूपमित्युक्तमेवनिजाधारनवकंनवचक्रत्वेनविभज्यनिजना
दशक्तिनवकं चक्रेश्वरीरूपेणसंपाद्य इच्छादिशक्तित्रितयपशोः
सत्त्वादिसत्त्वकम् । महाश्मश्रुविश्रुयामिशुरुवक्रादनन्तरम् म
हांगंचप्रदेशोयंविनिर्वाणोपणादिकम् स्वरूपपर्यष्टकंदेविमति
रेखादिगौरवी अन्तर्दशारवस्तुयात्तात्मकमिन्द्रियावलि महाविष्णु
रस्तर्दर्थाइतिमन्त्रितत्तयाम्यहम् वाह्येदशारभागोयंबुद्धिकर्मात्मगो
चरः चतुर्दशारवस्तुयाकारणानिचतुर्दश वसुष्टदलपद्माके दे-
शीभूतात्तमानसम् विकारात्मकतायाश्चदेशाघष्टकगोविभु
अवक्राद्याप्रमतेयामूतानन्तानिश्चितेत्याहम् षोडशस्वरपद्मा-
केदेशीभूताह्लमानसम् विकारात्मकतापन्नदेशाःसभाव
यामहमित्यादि सभगोदयवामनोन्मनोवैन्दवादिचतुरया
नेषुनवचक्रेष्वासनभूतेष्विन्द्रियादिरूपेणस्थितमित्यर्थः प
वंरूपपरंतेजःश्रीचक्रवपुषास्थितमिति । एवंरूपमुक्तप्रकारे
णविभक्तनिजेच्छादिषोडशाविकारान्तावयवमयत्रिकोणादि
चतुरश्रान्तश्रीचक्रवपुषास्थितमित्यर्थः इत्थंतस्मिन्नित्युक्तेश्री
चक्रवपुषापरिणतेसति तदीयाःशक्तयएवावरणदेवतारूपेण
स्थितइत्याह तदीयशक्तिनिकरस्फुरद्रश्मिसमावृतमिति । त

योःकामेश्वरकामेश्वर्योरेवतदीयावयवास्तेषांशक्त्यस्तासंस्थानि ।
काराः समूहस्तेचस्फुरन्तःप्रकाश।विमर्शमयकामेश्वरकामेश्व
रीवज्रेश्वरीभगमालिन्याद्यावरणपरिवार्यतिष्ठन्तीत्यर्थः एवस्
मयसंरंगास्तैःसमावृतंपरिष्कृतंकोण्यः ऊर्मिशब्देनेदयोमते प्र
काशात्मकःपरमेश्वरःसमुद्रःविमर्शरूपिणीकामेश्वरीसलि
लंतदीयावयवाःशक्तिनिकुरुम्बमयःयथाकल्लोलाः समुद्रेजा
यन्ते तत्रैवनीयन्ते एवंतत्त्वमयंशक्तिचक्रं तत्रैवेदेति अस्तमे
तिचेतितात्पर्यंतत्राभियुक्तवचनं मूलोद्भवंशक्तिचक्रंयतस्तत्
मयतांगतम् तस्मिन्नेवात्ययेत्तत्वंविलीनंपरिभावयेत् मूले
स्वात्मनिचिद्रूपेययस्मिन्ततदेवहीति सर्वचक्रवासनानुस्का
तेषुसवासनमुद्राभेदमाह चिदात्मभित्तावित्यादिपूर्वचक्रम
यास्थितमित्यन्तेन चिदात्मभित्तौविश्वस्यप्रकाशामर्शनेपटा
करोतिस्वेच्छयापूर्णविचिकीर्षासमन्विता क्रियाशक्तिस्तुवि।
श्वस्यमोदनाद्द्रावणात्तथामुद्राख्याइति । चिद्विमर्शशक्तिःआ
त्माभिन्नोआत्मैवभित्तिःस्वरूपमेवभित्तिरित्यर्थः विश्वस्यशिवा
देर्भूम्यन्तस्यप्रकाशामर्शनेअस्फुटास्फुटीकारःप्रकाशइदम
न्तयाग्रहदंयंगमोभावोविमर्शः एवंविधेयेप्रकाशामर्शनेपूर्ण
विचिकीर्षासमन्वितविकर्तुमिच्छाविचिकीर्षाविकारःहीरा
दीनामप्यस्ति आतपांकुशनादिना अतएवपूर्णविचिकीर्षास
मन्वितेतिह्लीरादेर्दध्यादिपात्रमेवविकारः अत्रतुशिवादिक्षित्य
न्ततत्वाकारेणविकारः अतएवपूर्णविचिकीर्षासमन्विताक्रि
याशक्तिस्तुक्रियाशक्तिरेवभूत्वानानावधारणेएवंविधस्यपा
विश्वस्यमोदनात्पूर्णावरणात् अत्रत्वनुकूलक्रियैवमोदनंद्रावणं
तदेकरसीभावः संविन्मुद्राख्यांलभते अयमर्थः यदाविमर्श
शक्तिविश्वरूपेणविकर्तुमिच्छति तदाक्रियाशक्तिर्भूत्वास्वविका
रभूतस्यविश्वस्यपरचिदानन्दलक्षणेनमेदनेनतदेकरस्यलक्ष॰

योहृ॰
टी॰
१४
14

णेन द्राविणेन च मुद्रात्वमापन्नेत्यर्थः तत्रादौ व्यापिकां त्रिखण्डा
मुद्रामाह सा यदा संविदंविका त्रिकलामयी त्रिखण्डारूपं समपन्ना
सदा सन्निधिकारिणी सर्वस्य चक्रराजस्य व्यापिका परिकीर्तितेति ।
सा विमर्शरूपिणी संवित्त्रिकलामयी वामाज्येष्ठारौद्रीरूपक
लात्रयसमष्टिरूपिका भूत्वा विकाग्रहणं शान्त्यतीतायाश्च उपल
क्षणं इच्छाज्ञानक्रियारूपकलासमष्टिभूतत्वादम्बिका नाम्निकापि
भूतेत्यर्थः त्रिखण्डरूपमापन्ना दक्षिणवामगलयोर्वामाद्याः प्रका
शाशा वामागलयरिच्छाद्या विमर्शास्तदुभयसंयोगरूपवन्यव
नात्मकखण्डत्रयवतीति त्रिखण्डमुद्रा जातेत्यर्थः सदा सन्निधिका
रिणी अत एव संविदेवतायाः क्षितिपरायाः सन्निधिकारिणी सर्व
स्य चक्रराजस्य सर्वेषां चक्राणां पूजायन्त्राणां श्रेष्ठत्वाच्चक्रराज
स्य व्यापिका नवचक्रस्थितनवमुद्राणां समष्टिभूतत्वात् सर्व
संक्षोभिणीमुद्रामाह योनिप्राचुर्यात् सैषा सर्वसंक्षोभिका पुनः
वामाशक्तिप्रधानेयं द्वारचक्रे स्थिता सदेदिति । सैषा त्रिखण्डा
खण्डत्रयमुन्मार्ष्य योनिप्राचुर्यतो मध्यमाहृयसंयोगादेकयो
निरनामाहृयसंयोगाद्वस्मा योनिः कनिष्ठाहृयसंयोगादपरा एवं
योनित्रयप्राचुर्यात् सर्वसंक्षोभिका परानन्दप्रवणत्वकारिणी वा
माशक्तिप्रधानेयं सर्वसंक्षोभिणी मुद्रा वामाशक्तिप्रधानत्वात्स
ष्टिः सृष्टिरेव क्षोभः द्वारचक्रे चतुरस्रत्रयरूपे चतुर्द्वारवर्त्ति त्रैलो
क्यमोहने स्थिता द्राविणीमाह द्रव्यविश्वस्थितिकरी ज्येष्ठाश्रा
तुर्यमाश्रिता स्थूलनादकलारूपा सर्वानुग्रहकारिणी सर्वा
शापूरणाख्येतत्सेषास्फुरितविग्रहेति । द्रव्यस्य विश्वस्य स्थिति
करीं संविन्मात्रस्थितिकारिणी अतो ज्येष्ठाप्राधान्यमाश्रिता ज्ये
ष्ठाशक्तेः स्थितिहेतुत्वात् नादात्मता कलानादकलाषोडशस्व
राः अत्राभियुक्तवचनम् कलानादस्वभावा वादन्त्यजादिस्वादि तद्रू
पाः कामाकर्षिण्याद्यास्तद्रूपाः सर्वाशापरिपूरकचक्रव्यापकत्वा

त्रे सर्वाशापरिपूरकाख्ये कामाकर्षिणी कलाधाररूपत्वात्
अत एव सर्वानुग्रहकारिणी कामाकर्षिण्येव सर्वानुग्रहः
सेषा तत्त्वदृष्टेन च ततः शान्ती शास्त्रोक्ता सर्वविद्राविणी परामृष्ट एव
नेस्फुरितविग्रहां संविद्रूपत्वात् कोणः ज्येष्ठा प्रादुर्भावाधारत्वा
त् स्थितिरूपिणी अत एव ऋजुरूपमध्यमा तर्जन्यैः कनिष्ठा
नामयाः संयोगरूपिणी कामाकर्षिण्यादिरूपत्वात् सर्वानु
ग्रहकारिणी तदाधारत्वात् सर्वाशापरिपूरणात्मे चक्रे संविद्रू
पत्वात् स्फुरितविग्रहा च ततः शान्ती यास्ते शक्तिपादिता सेषा
सर्वविद्राविणी मुद्रा स्थितेत्यर्थः सर्वाकर्षिणीमुद्रामाह
ज्येष्ठा वामा समत्वेन स्पृष्टप्रायान्त्यमाश्रिता आकर्षिणी चतु
र्थे यं सर्वसंक्षोभिणी स्मृतेति । ज्येष्ठा वामा समत्वेन ज्येष्ठा वा
माशक्तिद्वयसामरस्यरूपत्वात् स्पृष्टः प्रायान्त्यमाश्रिता सृ
ष्टिरूपा वामा स्थितिरूपा ज्येष्ठा उभयसाम्यात् सृष्टिस्थितिसा
धारणीयम् वामांशेन वक्रतर्जनीमध्यमाद्वयरूपा ज्येष्ठां
शेन ऋजुसंयुक्तानामिकाकनिष्ठाद्वयरूपेत्यर्थः अत एव
वक्राग्रलिद्वयरूपत्वादाकर्षिणीयं मुद्रा सर्वसंक्षोभिणीस
र्वसंक्षोभकारिणि चक्रे स्मृता स्मृति पूर्वानुभवसंस्कारं तेन
नेश्वर्यं च ततः शान्ती शास्त्रे ऽनुभूता इदानीं स्मृता स्ववासनाकथिते
त्यर्थः सर्वावेशकरीं मुद्रामाह व्योमद्वयान्तरालस्थबिन्दुरू
पा महेश्वरि शिवशक्त्यात्मसंश्लेषादावेशकरी स्मृता चतु
र्दशारचक्रस्था संविदानन्दविग्रहेति । आधाराग्राज्ञान्तषट्च
क्रान्तरालानि बिन्दवः पंचभूतमयाः तदुक्तमभियुक्तैः पञ्च
बिन्दुमयं भेदं पञ्चप्रणवपंकजे इति तद्रूपा व्योमद्वयान्तराल
स्थबिन्दुरूपा शिवशक्त्यात्मसंश्लेषात् तद्रूपाव्योपिकात्मनो
दरकरांगुलयः शिवशक्त्यात्मनापरिहृतेनेते अंगुल्यन्तरा
लद्वयगते कैकांगुलिरूपाभ्यो ... पातनादेवं भूतादिका

योहृ.
टी.
१५
15

वेशकरी मुद्रादिमस्य प्रकाशात्मनः शिवस्यावेशकरी सामर
स्यकरी चतुर्दशारचक्रस्था चतुर्दशारचक्रे सर्वसौभाग्यदायका
नामधेये स्थितां संवित् स्थिरानन्दविग्रहा शिवसामरस्यबिन्दु
रूपलक्षणवन्धनात्मिके यं मुद्रामयी संविदेकरसानन्दमयी
चतुर्दशारमाक्र ... स्थितेत्यर्थः उन्मादिनीमुद्रामाह बिन्द्वन्तरा
लविलसत्सूक्ष्मरूपा शिवात्ममयी ज्येष्ठाशक्तिप्रधानात्सर्वो
न्मादनकारिणी दशारचक्रमास्थाय संस्थिता वीरवन्दिते इति ।
बिन्द्वन्तरालं पट्यान ब्रह्मरन्ध्रान्तर्गतयोर्नि महाबिन्द्वोः स्वयम्भू
पराख्ययोर्लिङ्गयोरन्तरालात् विलसत् सूक्ष्मरूपशिवात्ममयी वि
लसन्त्येषा सूक्ष्मरूपे विसतन्तुरूपाकृतौ शिवौ शिवात्मवह्निरूपा
विकाशान्तं तन्मयी तदेकरसरूपा ज्येष्ठाशक्तिप्रधाना ज्येष्ठा
शक्तिप्रचुरा सर्वोन्मादनकारिणी उन्मादः स्थितविभ्रमः सर्वोन्
मानवत्वस्य आपापरपराङ्मुखो शिवशक्तिसामरस्यानुसन्धानं
परां करोतीत्यर्थः दशारचक्रमास्थाय दशारचक्रं वहिर्दशारच
क्रं वीरवन्दिते इदन्तादिपोरहंस्त्रिगोगमे प्रलयप्रतिपादनपरा
वीरास्ते वन्दिते आत्मा आत्माहंभावनया भाविते तदुक्तं परापर्य
वाषिकायां अहमिप्रलयं कुर्वन्निदमः प्रतियोगिनः पराक्र
मपरो भुंक्ते स्वभावमपि वायहमिति कोत्र यः प्रन्तः कुलाकुल
बिन्द्वन्तरालविलसत्संविकाशानात्मवह्नमन्तकुण्डलिनीरूपा
शक्तिशिवात्मह्दयमध्यमां गुह्यं संयोगबिन्दुद्वयाकारवत्तलं
यान्तर्गतकनिष्ठाद्वयमयी ज्येष्ठाशक्तिप्रधानत्वात् महाङ्कुश
नाम्नातर्जनीद्वयाग्रं संयोगरूपा शिवशक्तिसामरस्यानुसन्धान
लक्षणवन्धनरूपा सर्वोन्मादिमात्मामुद्रा बहिर्दशारचक्रमा
स्थाय संस्थितेत्यर्थः महाङ्कुशामुद्रामाह वामाशक्तिप्रधाना
तमहाङ्कुशमयी पुनः ऋयो विश्ववमन्ती माद्वितीये तदशारकं
संस्थिता मोदनपरा मुद्रारूपत्वमास्थितेति । बिन्द्वन्तरालविल

स्तत्त्वस्वरूपशिवात्मामयी अस्याकृतिस्तर्जन्यनामिकासंयोगरूपा
वामाशक्तिप्रधानात्तथा न भवति इदानीं वामाशक्तिप्रधाना वामा
विश्वस्य वमनात् अंकुशाकारतां गतेति पूर्वोक्तरीत्या वामाशक्तिप्र
धानत्वात् अंकुशाकारतर्जनीवच्च तद्रूपाश्रिता विश्वं वमन्ती सृष्टि
रूपत्वात् तद्वत्परमशिववत् द्वितीये दशारे अन्तर्दशारके मोदन
पराशिवसामरस्यलक्षणपरानुसन्धानमयी अत एव मुद्रारू
पत्वमास्थिता अयमर्थः पूर्वोक्तमुद्रालक्षणविमर्शमयचिच्छक्ति
रिव वामाख्यामारूढीभूतेत्यर्थः तेनात्र परमशिवसामरस्य
परानन्दप्रवणरूपा महांकुशमुद्राख्यान्तर्दशारस्थितेति खेचरी
मुद्रामाह धर्माधर्मस्य संवद्दूरुत्थिता चितिरूपिणी विकल्पा
ख्यक्रियालोपरूपदोषविघातिनी विकल्परूपरोगाणां हारिणी खे
चरी यथा सर्वरोगहराख्ये तु चक्रे संविन्मयी स्थितेति । धर्माधर्मस्य
संवद्दात् धर्मः शक्तिः स्रष्टादिसकलधर्मपरत्वात् अधर्मः शिवः
तत्सकलधर्मरहितत्वात् तस्य संवद्दुः सामरस्य तस्मादुत्थिता
चितिरूपिणी चितिः संवित्तिः विकल्पाख्यक्रियेति विकल्पः को
टिद्वयावलंबनं एवं वा न वेति विकल्पः कोटिद्वयावलंबनं वा न वे
ति संशयज्ञानं विकल्पः विकल्पाख्यः क्रिया नित्यनैमित्तिका
काम्यरूपाः तल्लोपेन पापं जायते तस्या विघातिनी विकल्परोगा
णां हारिणी परिपूर्णभावस्य शिवस्य मयैवमेतत्कर्तव्यमेवने
ति विकल्परोगाश्चाधय एव व्याधयः तदुक्तमभियुक्तैः अपूर्ण
मन्यताव्याधिः कार्पण्यैकनिदानभूः क्लेशावहातिकष्टा चेति
तेषां हारिणी खेचरी खे निरस्तसमस्तक्रियाक्रमे या चितिः स्फुरति
शाश्वतोदयो सा शिवतत्त्वसमवाप्तिकारिणी खेचरी सकलविद्
द्दारिणीति तदुक्तरीत्या निर्विकल्पकबोधभूमिसञ्चारिणी चितिः
शक्तिः परमशिवसामरस्यरूपात्तदधिष्ठितत्वात् सर्वरोगहरा
ख्ये चक्रे संविन्मयी स्थिता कोऽर्थः शिवशक्तिमयदत्तवामवाऽऽ

योहृ॰
टी॰
१८
16

द्वयपरिवर्तनरूपान्तर्जनीद्वयावलंवितमुसलिकरद्वयकनिष्ठिका
नामिकाद्वन्द्वं तदुपरिस्थितमध्यमाद्वन्द्वसंयुक्तांगुष्ठद्वयाग्रसंयो
जनलक्षणवन्धनरूपा निवशक्तिद्वयसंघट्टाद्रुस्थिता यदा निर्विक
ल्पावाप्तभूमिपञ्चाद्वारिणी अतएव विकल्पजनितानिमित्तनैमित्तिका
काम्यकर्मलोपरूपदोषविद्यातिनी अतएव च विकल्परूपरोगा
नामप्यशेषसमस्तालक्षणानां हारिणी सर्वरोगहरारव्ये चक्रे वि
वरी मुद्रास्थितेत्यर्थः वीजमुद्रामाह शिवशक्तिसमाश्लेषस्फुर
द्योमान्तरे पुनः प्रकाशयन्ती विश्वमात्मस्वरूपस्थितं सदा वी
जरूपमहामुद्रा सर्वसिद्धमये स्थितेति । शिवशक्त्योः समाश्लेषः
सामरस्यं तन्मये स्फुरद्योमान्तरे प्रकाशविमर्शसङ्घात्मान्तरगगा
नान्तराले स्वात्मस्वरूपं स्थितं कारणतावन्मात्रतया स्थितं विश्वं स
दा सर्वदा प्रकाशयन्ती एतद्वीजरूपा महामुद्रा तस्याश्चराचररू
पविश्वोत्पत्तिहेतुत्वात् सर्वसिद्धिमये विश्वोत्पत्तिहेतुभूतवीजा
मुद्राधारत्वात् सर्वस्य विवादेर्भूम्यन्तस्य सिद्धिरुत्पत्तिः तदुक्तं श्री
प्रत्यभिज्ञाहृदये चितिः स्वतन्त्रा विश्वसिद्धिहेतुरिति तन्मये चक्रे
स्थिता कोऽर्थः शिवशक्तिसंज्ञितोभयकरमस्तकनिष्ठिकाद्वया
वलंवितमध्यानामिकोभयपार्श्वप्रसृतसंयुक्ताग्रमध्यमाद्वयोपरि
स्थितवक्राकारतर्जनीसंगुष्ठयुगलाग्रामर्शविधान्तरालप्रतीय
मानगगनान्तराले कारणतन्मात्रतया स्थितं विश्वं प्रकाशयन्ती
वीजमुद्रा सर्वसिद्धिमयाभिधेये चक्रे स्थितेत्यर्थः योनिमुद्रामा
ह संपूर्णस्य प्रकाशस्य लाभभूमिरियं पुनः योनिमुद्रा कलारूपा
सर्वानन्दमये स्थितेति । संपूर्णस्य प्रकाशस्य प्रकाशात्मनः परम
शिवस्य लाभभूमिः प्राप्तिस्थानं अतएव योनिमुद्रा योनिरूपा मुद्रा
योनिस्त्रिकोणं वामादीच्छादिशक्तित्रितयसामरस्यरूपा हार्यकला
त्मकविमर्शरूपा एतत्सर्वानन्दमयी शिवशक्तिसामरस्यसमुदित
परानन्दलक्षणविन्दुरूपसर्वानन्दमयनाम्नि चक्रे स्थितेति को

वामेश्वर्याख्यया वक्रतेजोनीढयाग्रगृहीतमस्तानामिकाद्वयाग्रपरिगत
मेष्ठा ज्ञानमयप्रसरन्तुसंपुटक्राग्रमध्यमाद्वयमध्यगतरौद्री क्रियात्मक
कनिष्ठिकाद्वयाग्रसंयोजितसंपूर्णप्रकाशरूपांगुष्ठद्वयाग्ररूपाविम
र्शकलारूपमयी योनिमुद्रा प्रकाशविमर्शसामरस्यलक्षणा विन्दु
मयसर्वानन्दमये चक्रे स्थितेत्यर्थः उक्तमुपसंहरति क्रियाचेतन
रूपत्वादेवं चक्रमयस्थितमिति । क्रियाक्रियाशक्तिः विश्वस्यमोद
नाद्भावणान्तथेत्युक्तचक्रान्ता क्रियाभेदेन विरचनामयवामादि
शक्तिप्रायाम्रभेदात् संक्षोभिण्यादियोन्यन्ततन्मुद्रारूपेणाचेत
नस्वरूपत्वाच्चक्रमयं त्रैलोक्यमोहनादिसर्वानन्दमयान्तनवचक्रम
यस्थितमित्यर्थः ननु यदासा परमा परमाशक्तिरिच्छया विश्वरू
पिणी स्वयमेवान्तः पुनः क्रियाचेतनरूपत्वान्नवचक्रमयं स्थितमि
त्युपसंह्रियते इत्याशंकातर्हि मया प्रक्रान्तोपसंहारस्त्वयमित्याह
इच्छारूपं परं तेजः सर्वदा भावयेत्सुधीरिति । परं तेजः शिवशक्ति
सामरस्यरूपा परामयं ज्योतिरिच्छास्वरूपं स्वेच्छाकृतनानारूपप्रप
ञ्चमयं सर्वदा कालत्रयेपि भावयेत्सुधीः साक्षात्परशिवरूपगुरुकटा
क्षपातनचूर्णाशंकाभयंलज्जाजुगुप्साचेतिपञ्चमीकुलंशीलंच
जातिश्चेत्यष्टौ पाशाः प्रकीर्तिता इति श्रीभैरवोक्तवचनोक्तपरिपाटि
तपाशाष्टकतया परिस्फुरत्परशिवाहंभावः स्वेच्छया कल्पितना
नारूपप्रपञ्चमयं श्रीचक्ररूपेण परिणतं परामयं तेजः सर्वदा भा
वयेदित्यर्थः पुनरस्यैव चक्रस्य प्रकारान्तरेण वासनान्तरमाह त्रि
धा चैतन्यादिना त्रिधा च नवधा चैव चक्रसंकेतकः पुनरिति स्पष्टत
त्रादौ त्रिधात्ववासनामाह वह्निनैकेन शक्तिभ्यां द्वाभ्यां चैकः पुनः
पुनः तेष्ववह्नित्रयेणापि शक्तीनां त्रितयेन च पद्मद्वयेन चान्यः ।
स्याद्गेहत्रितयेन च पञ्चशक्तिचतुर्वह्निपद्मद्वयमहीत्रयम् इत्थं
महाचक्रमिति । एकेन वह्निना द्वाभ्यां शक्तिभ्यामेकः प्रकारः ते
ष्वेकवह्निनाशक्तिद्वयरूपस्त्रिकोणः पुनर्वह्नित्रयेणशक्तीनांत्रि

यो॰हृ॰
टी॰
१८
17

तयेन चापरः प्रकारः अयमर्थः त्रिकोणमेवोपरि विस्तारक्रमेण पुन
र्वह्नित्रयेण शक्तित्रयेणान्तः परः प्रकारो भवति इति पद्मद्वयेन भूगृह
त्रितयेन चापरः प्रकारः पद्मद्वयं रेखा सपान्तरालं तयोरष्टदलं षोडश
दलं चेति भूगृहत्रयं चतुरस्रमयं पूर्वकृते सति पंचशाक्तयश्चत्वारो
वह्नयः पद्मद्वयं च महीमयं चेति परिशिष्टं महाचक्रं समष्टिरूपम
तत्प्रकारत्रयमेव विविच्य विवृणोति तत्प्रकारः प्रदर्श्यते तत्रा
द्यं नवयोनिः स्यात्तेन द्विदशसंयुतम् मन्वयोनिपरं विद्यात्तृतीयं त
दनन्तरम् अष्टषोडशदलोपेतं चतुरस्रत्रयान्वितम् चक्रस्य त्रिप्र
कारत्वं कथितं परमेश्वरीति । तत्प्रकारो जातावेकवचनम् तत्
प्रकाराः प्रदर्श्यन्त इत्यर्थः तत्र तेषु प्रकारेषु आद्यं नवयोनिः वह्नि
नैकेन शक्तिभ्यां द्वाभ्यामित्यस्य विवरणं पञ्चकस्य वह्निद्वयोः शक्ते
स्संयोगे सति बैन्दवत्रिकोणाष्टकोणैर्नवयोनिचक्रं भवेदित्य
र्थः तेन द्विदशसंयुतं मन्वयोनिपरं विद्यात् तेन नवयोनिचक्रेण
संयुतं द्विदशसंयुतं दशारद्वयसंयुतं मन्वयोनि चतुर्दशकोणं
परं द्वितीयं जानीयात् तेष्वेव वह्नित्रयेशक्तित्रये च कृते दशारचक्र
द्वयं चतुर्दशारचक्रं च चक्रत्रितयं द्वितीयचक्रं भवतीत्यर्थः तदन
न्तरं तेन चक्रद्वयेनानन्तरमव्यवधानेन स्थितमसन्तमव्यवहितम्
अष्टदलकमलेन षोडशदलकमलेनोपेतं चतुरस्रत्रयात्मकं तृ
तीयचक्रमित्यर्थः एकेन चक्रावयवत्रितयस्य प्रत्येकस्य सृष्टिस्थि
तिसंहारभेदात् कोटीकारतः तद्यथा चतुरस्रत्रयं सृष्टिः सृष्टिः षो
डशदलपद्मं सृष्टिस्थितिः अष्टदलपद्मं सृष्टिसंहारः एवं चक्रमयं
सृष्टिमयत्वात् एवं चतुर्दशारे स्थितिसृष्टिः बाह्यदशारे स्थितिस्थि
तिः अन्तर्दशारे स्थितिसंहारः एवं चक्रमयं स्थितिमयत्वात् एवम
ष्टकोणं संहारसृष्टिः त्रिकोणं संहारस्थितिः बैन्दवं संहारसंहारः
एवं चक्रमयं संहारमयत्वात् बैन्दवं चक्रमारभ्य चतुरस्रान्तोद्धा
रः सृष्टिरित्यर्थः एवं सर्वमेतन्मनसि निधाय चक्रस्य त्रिप्रकार

ऽवकथितं परमेश्वरीति । नन्वेवंविधमुक्तं तत्रेदं चक्रमध्यचक्रमार
भ्य किमुक्त्या दर्शितं न शक्यत इत्याह । सृष्टिस्थित्यनवयोन्यादिरष्टकोणान्तं
संहृतिभुतः । एष्ठ्यादि नवयोन्यन्तमिति शास्त्रस्य निर्णय इति । सं
हृतिभुतः एष्ठ्यादि नवयोन्यन्तमितस्तत्र नवयोनिशब्देन योन्यन्त
गतं बैन्दवं चक्रं लक्ष्यते तथा च वक्ष्यति रश्मित्रयमारभ्य बैन्दवान्तमष्टधा
रः संहारक्रमोऽयमर्थः इति च ततः प्रातीः शास्त्रस्य निर्णयः अत्रैतन्मध्य
मादिचक्रमुद्धारयन्ती नाम यथा देवदत्तविष्णुमित्रयज्ञदत्तेषु देवदत्त
यज्ञदत्तयोः मूलानि दीयानीत्युक्ते विष्णुमित्रस्य न दीयानीति ग
म्यते पूर्वं श्रीचक्रमयपवर्गोविभज्य वासनानामुक्ता इदानीं समष्टि
चक्रस्य वासनामाह । एतत्समष्टिरूपं तु त्रिपुराचक्रमुच्यते ।
एतत्समष्टिरूपं सृष्ट्यादित्रितयसमष्टिर्नाम अवयवीत्यर्थः तथा न
भवति सृष्टिपदेन स्थितिपदेन संहारपदेनापि च नामधेयेनैव
त्रिपुराचक्रमुच्यते त्रिपुरायाः सृष्ट्यादिभ्योऽभिव्यक्तिः पुराविद्यमान
त्वात् उत्पदानभिसन्ध्येयायाः अनाद्यन्तरूपायाः स्वसंविदः स्वक्रमा
विर्भावभूमिरित्युच्यते ननु उक्तं संकेतपद्धतौ वशिन्यष्टकोणान्तराल
मित्यादिना ज्ञानसर्वगानत इत्यन्तेन ननु सर्वं विरूपात्रिपुरैव साक्षात्
यतां किमनेन चक्रवासनाज्ञानेन क्रमवन्त्यविधिप्रश्नामेनेस
नन्नाह यस्य विज्ञानमात्रेण त्रिपुराज्ञानवान्भवेत् । यस्य विज्ञा
नमात्रेण यस्मिन्विज्ञाते एव त्रिपुराचक्रज्ञानमात्रेण त्रिपुराज्ञानवा
न्स्यात् नात्र कोऽप्यर्थः अष्टनिराकारमूर्तेस्त्रिपुरायाः ज्ञानमाशंकायाम् अ
नेपचेतकरीस्मैव एतस्य चक्रवासनायाः उक्तस्यापि बैन्दवकोणीकृता
साक्षात्प्रकाशकोऽयमर्थः तदुक्तमभियुक्तैः पराकाष्ठैतत्प्रकं महायो
गविदं परम् इतरे भवनीभावमेवमूर्तिकरोम्यहमिति चक्रस्य सृ
ष्ट्यादि ष्ठ नवधात्वमिदानीं वक्तुं प्रतिजानीते चक्रस्य नवधात्वं वक्ष्य
यामि तव प्रिये इति । एतत्प्रियतमासि त्वमतो रहस्यमपि कथया
मीत्यर्थः इदानीं नवधात्वमाह आदिमं तु त्रयेण स्याद्द्वितीयं योऽत्र

रकम् सप्तमं वसुकोणं स्यान्मध्यं अष्टममथाष्टकम् नवमं मध्यमध्य
ध्यं स्यादिति । भूसद्मेन चतुरश्रेण मनुकोणं च तद्दशकोणं सदृशम
मत् उक्तानां नवचक्राणां नामान्याह तेषां नामान्यतः शृणु त्रैलो
क्यमोहनं चक्रं सर्वाशापरिपूरकम् सर्वसंक्षोभकरं देवि सर्वसौ
भाग्यदायकम् सर्वार्थसाधकं चक्रं सर्वरक्षाकरं परम् सर्वरोग
हरं देवि सर्वसिद्धिमयं तथा सर्वानन्दमयं चापि नवमं शृणु सुन्द
रीति श्रीः त्रैलोक्यमोहनं लोक्यते इति लोकः लोक्यतेऽनेनेति
वा लोकः लोकयतीति लोकः इति कर्मकरणकर्तृषु सत्स्वामेय मा
न मातृलक्षणं त्रैलोक्यं तस्य मोहनं तिरोधायकत्वेन प्रतीतिस्फुरणा
दनेन सर्वाशापरिपूरकं आशा नाम समस्तपदार्थान्तरेषु स्पृहा त
साः सर्वस्याः स्पृहायाः परिपूरकं नित्यपरिपूर्णत्वमिलक्षणपर
मशिवसामरस्यप्रतिपादनेन सर्वक्षोभकरं सर्वस्य हि सादं क्षि
वान्तस्य पर्युपरितत्त्वक्रमेण क्षोभस्य संहारलक्षणस्य कारकमे
तद्रूपं वलयरूपत्वात् सर्वसौभाग्यदायकं सर्वसौभाग्यं सर्वस्पृह
णीयता तस्य दायकं सर्वस्पृहणीयपरप्रमातृपरचिदैक्यप्रति
पादनेन सर्वार्थसाधनं सर्वेषां वैदिकानां तान्त्रिकानां क्रियाणां
मर्थः प्रयोजनं परशिवप्राप्तिः तदुक्तं महाकविभिः वक्रया
प्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः त्वय्येव निपतन्त्योघा जाह्न
वीया इवार्णवे उत्पादयति सर्वरक्षाकरं रक्षा नाम प्रतिकूलप
दार्थोपहरति परिहारः षट्त्रिंशत्तत्त्वात्मकं सर्वमेव प्रतिकूल
पदार्थः तस्मात्सर्वस्माद्रक्षा शिवाहंभावभावनालक्षणां करोति
तदुक्तं पराप्रवाचिकायां अहमित्युल्लंघ्य सर्वविन्दमः प्रतियोगिनः
पराक्रमपराभुक्तेः स्वभावसुशिवायहमिति सर्वरोगहरं भेदलक्ष
णं षट्त्रिंशत्तत्त्वात्मकं सर्वमेव रोगं तस्य हरं अभेदप्रतीतिदेहत्वात्
श्रुते वाक्ये विकल्परूपरोगाणां हारिणी वैवरीयरेति सर्वसिद्धिम
यं सर्वस्य सिद्धिरुत्पत्तिः स्थितिः संहारश्च तन्मयं त्रिकोणस्य सर्वस्य

सृष्टिस्थितिसंहाररूपहेतुत्वात् तदुक्तं श्रीप्रत्यभिज्ञाहृदये चि
तिः स्वतन्त्रा विश्वसिद्धिहेतुरिति सर्वानन्दमयं शिवशक्तिलक्षण
विमर्शप्रकाशसामरस्यरूपत्वात् अत्र सर्वत्र प्रवृत्तिनिमित्तभेदा
द्द्वैतं न भेदाद्द्वैते तु विश्रान्तिरेव परमार्थः पूर्वोक्तवासनाचक्रस्य प्र
योजनमाह अत्र पूज्या महादेवी महात्रिपुरसुन्दरीति महादेवी
महती देशकालाकारैरनाकलितत्वात् देवी द्योतनादिति देवी
पदाभिधेया विमर्शरूपा त्रिधा च नवधा च पूर्वोक्तवासनचक्रे म
हात्रिपुरसुन्दरी महती पुनावरणाविरूपिणी त्रिपुरातुरीयरूप
त्वात् सुन्दरी स्वस्वात्मतया सर्वस्य स्पृहणीयत्वात् एवंविधा स्वसं
विदेवतापूजा पश्यमाणपरादित्रिविधरूपया पूजया भावनीया
त्रैलोक्यमोहनादिनवचक्राणां स्वस्वनामानुरूपलक्षणफलानु
क्त्वा इदानीं समष्टिचक्रस्य फलमाह परिपूर्णमहाचक्रमजरामर
कारकमिति । परिपूर्णमहायोनिमध्ये महाबिन्दुस्फुरत्प्रका
शविमर्शयोः सामरस्यरूपपराप्रभापटलमयसर्वानन्दमयं चक्रं वि
श्वमयं विश्वोत्तीर्णं परामयत्वादजरामरकारकं अजरः कालत्रयातीत
तत्वात् अमरः अतएवोत्पत्तिविनाशरहितत्वात् अजरामरः शिवः
स चाजकस्य कलातीतनिष्परशिवप्राप्तिलक्षणमित्यर्थः चक्रसं
केतमुपसंहरति एवमेष महाचक्रसंकेतः परमेश्वरि कथितस्त्रि
पुरादेव्या जीवन्मुक्तिफलप्रदः । एवमुक्तप्रकारेण त्रिपुरादेव्याः
पूर्वोक्तलक्षणायाः महाचक्रसंकेतः षट्त्रिंशत्तत्त्वचक्ररूपत्वात्
महाचक्रं जीवतो मुक्तिर्जीवन्मुक्तिर्मुक्तिर्द्वैवन्यनामोचनं तु गुणा
दिपाशाष्टकेन परशिवादिगुरुपरमदेवताधिगतपरमार्थ्यश्चक्र
संकेतः स्वपरामर्शकस्य हठादेव सकलपापनाशनेन शिवाहंभा
वभावनाप्रवर्तयतीत्यर्थः इति श्रीमत्परमयोगीन्द्रपरमहंसपुण्या
नन्दशिष्यपरमहंसमहानन्दशिष्ययोगिप्रवरविरचितायां योगि
नीहृदयदीपिकायां चक्रसंकेतः प्रथमः ॥ १ ॥ द्वितीयसंके

यो॰हृ॰
टी॰
१९
19

तेश्रोतृजनप्रवृत्तयेफलप्रतिपादनपूर्वकंवक्तुंप्रतिजानीते ॐमंत्र॰
संकेतकंदिव्यमधुनाकथयामिते यज्ज्ञातात्रिपुराकारोवीरचक्रेश्वरो॰
भवेदिति। दिव्यंप्रकाशविमर्शरूपपरशिवपरशक्तिप्रतिपादनप
रत्वात् मंत्रसंकेतकंमननात्रायते साधकमितिमंत्राः चिन्मरीच॰
यः तद्वाचकत्वाद्वैखरीवर्णविलासभूतानांसौभाग्यविद्यादीनांम
ननत्राणता तदुक्तंसंकेतपद्धत्यां मननात्राणधर्माणोमंत्रोयंप
रिकीर्तितइति संकेतंपूर्वोक्तलक्षणंप्रकाशात्मकोहंतविमर्श
रूपिण्णः कथयामिहृदयंगमतांनयामीत्यर्थः यज्ज्ञातायस्यमंत्रसं
केतस्यवेत्ताज्ञातात्रिपुराकारःवेदनसंपरिस्फुरत्परमभट्टारकः
वीरचक्रेश्वरोभवेत् वीराःपूर्वोक्तलक्षणास्तेषांचक्रंसमूहस्त॰
स्येश्वरः परशिवकोयःएतन्मंत्रसंकेतप्रतिपादितश्रीविद्यादि
मंत्रार्थस्यभूतिपरोभावनाप्राशस्त्यशालीपरमशिवएवभवेदि॰
त्यर्थः पूर्वमनन्तरोक्तरीत्यात्रैलोक्यमोहनादिनवचक्रेश्वरीमंत्रान
ध्यपक्रम्यमंत्रसंकेतमारभते करशुद्धिकरीत्याद्याद्वितीयावात्मर॰
क्षिका आत्मासनगतादेवितृतीयातदनन्तरम् चक्रासनगताप
ञ्चात्सर्वमंत्रासनेस्थिता साध्यसिद्धासनाषष्ठीमायालक्ष्मीमयी॰
परा मूर्तिविद्याचसादेविसप्तमीपरिकीर्तिता अष्टम्यावाहनीवि
द्यानवमीभैरवीपरा मूलविद्याख्याख्याता त्रैलोक्यवशकारिणी
ति। करशुद्धकरीआत्मतत्वमलयोरशुद्धयोरत्रकर्मकरणात्म
नोर्द्वयोः शुद्धतत्वलयभावनात्मधीशुद्धिरात्मकरयोः परामृतत्वस॰
म्पृक्तकरीत्याकर्मेन्द्रियान्तःपातिनोःकरयोरशुद्धतत्वात्तयो
नयोरशुद्धयोःशुद्धतत्वलयभावनाशुद्धिःतत्वरीयंविद्यापराहन्ता
प्रतिपादनपरत्वात् अत्रैवव्याप्तिकर्मेन्द्रियाणांवेमत्सात्करशुद्धि
करीत्युक्तेति अथात्रैलोक्यमोहनचक्रेश्वरीत्यर्थः नवकरशुद्ध्यादि
मंत्राणांसंख्यामेवकरोति किमितिनोद्धरतिउच्यतेवामकेश्वरत॰
न्त्रासुएवासाशुद्धाउक्ता तत्रतत्वतानार्थप्रतिपादनपरत्वादय

शास्तुस्थवनमंत्रोद्धारः क्रियतेइतिद्वितीयाचात्मरक्षिकेतिभेदलक्षण
विपक्षंसंकटोत्तारणपरमिद्धात्मरक्षणमिममंत्रुक्तरीसाभेदप्रपंचल
क्षणप्रतिपक्षसंकटोत्तरक्षामभेदप्रतीतिरूपांपरादन्नाप्रतिपादने
नवात्मनःकरोतिरमात्मरक्षिकाद्वितीयासर्वेशापरिहरणाख्या
द्वितीयचक्रेश्वरीविद्येत्यर्थः आत्मासनगतादेवितृतीयाअष्टच
क्रमध्ये देवतात्मनांसाविमर्शमनयत्वमासनमितस्मकुरक्ता
रीसासाधकचक्रमंत्रदेवतानांहंसविद्रूपतयातुसम्यानन्लक्षण
मनवतुष्टयविद्यानामादिमूतात्मासनगताविद्यातृतीयासर्वा
संक्षोभलक्षणतृतीयचक्रेश्वरीविद्येत्यर्थः तदनन्तरंचक्रासन
गता अनन्तरंचक्रसंकेतकोक्रवक्रसनयुक्ताचतुर्थीविद्यास
र्वसौभाग्यदानलक्षणचतुर्थचक्रेश्वरीविद्येत्यर्थः पश्चात्सर्वमं
त्रासनस्थिताअनन्तरोक्तवामनामनन्त्राणचिन्मराविप्रसरा
विलावरणदेवतामंत्रासनस्थितापंचमीविद्यासर्वार्थसाधनल
क्षणपंचमचक्रेश्वरीविद्येत्यर्थः साध्यसिद्धासनाषष्ठीपर्वपीठ
निवासिन्यःसर्वगाश्चिन्मरीचयःरस्यासावत्तराकारारत्नक्रु
लमातरइति प्रमाणवचनोक्तरीसाविन्मरीच्यावरणदेवताःसा
ध्याःसससंख्यातिकोणादिसोड्शदलान्तचक्रपदगताश्चत्वरप
त्रयपदगताश्चदेवताःसृष्टिक्रमरूपत्वात्साध्याः तदुक्तमत्रैव
सृष्टिस्थेनवयोमादि१६अन्तसंहृतिपुनः१६ाद्यादिनवयोमन्त
मितिअत्रसिद्धिसंहारः तदुक्तंश्रीप्रसमभिज्ञाहृदयेचितिःस्वत
त्राविश्वसिद्धिहेतुरिति एवंसृष्टिसंहारक्रमेणतुसम्यायमाण
नांसाध्यसिद्धावरणदेवतानामासनेस्थिताविद्यासाध्यसिद्धास
नाषष्ठी सर्वरत्नाकरनामधेयषष्ठचक्रेश्वरीविद्येत्यर्थः मायाल
क्ष्मीमयीपरामृतिविद्याचमादेविसप्तमीपरिकीर्तितेति अस्याविं
मायाचतस्रतीशाख्ये अनुकृतत्वादुद्धारः क्रियतेमायाभुवनेश्व
रीबीजंलक्ष्मीश्रीबीजंतन्मयीतत्परतद्वयोर्धगता परावत

देशपूर्वं तभेदे तिथीशान्तसमन्वितम् तृतीयं बलस्तच्छ्रोत्रणि हृदयभैर-
वात्मनः इति पराविंशकोऽक्षबीजं पराबाचकत्वात् तद्बीजत्रयात्मि-
का मूर्तिविद्या च सा मस्तमोमसर्वरोगहराभिधानचक्रेश्वरी विद्येत्य-
र्थः अष्टम्या वाहनीविद्या अन्तरस्थनिजसंविदात्मनो मातरक्षा-
करणात्मनावहिर्मेयं स्वविदि समर्पणं सदा वाहनं समरसत्वमो-
हणमित्यस्यास्तु करीसा हृदयकमलकर्णिकामध्ये स्फुरन्त्याः
सविकल्पायाश्चात्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थे-
नेति तं ज्ञानरोक्षपरिपाकस्य बहिः प्रसारलक्षणावाहनविहिता-
ष्टमी सर्वसिद्धिप्रदाभिधानाष्टपचक्रेश्वरीविद्येत्यर्थः नवमीभै-
रवी पराभैरवी विश्वस्य भरणात् स्थितिहेतुत्वात् धारणलक्षणासरि-
विन्मात्रपर्यवसानलक्षणसंहारकारणत्वाद्वस्तुनात्राष्टिहे-
तुत्वाच नतुभैरवी च ततः शास्त्रेनोक्ता किमित्यत्रनोक्तासम-
स्तचक्रेश्वरीविद्याबोहृते सूतश्चाह **मूलविद्या तथा प्रोक्ता त्रैलो-
क्यवशकारिणीति ।** मूले विश्वस्य शिवादेर्भूम्यन्तस्य षट्त्रिंश-
तत्त्वात्मनः प्रकाशविमर्शसामरस्यरूपं तेजो वेदयतीति मूल-
विद्या तथा प्रोक्ता भैरवी कथिता नानाम्नायप्रस्या त्रैवोहृतत्वान्मा-
रोद्धारः अस्यास्त्रचक्रेश्वरीवद्धृत्रोद्धरेत् वक्ष्यति मूलेन व्यापक-
न्यासः कर्तव्यः परमेश्वरीति त्रैलोक्यं त्रक्त लक्षणं वशीकरोति
सर्जनसंहारैः स्वायत्तं करोतीति वक्ष्यमाणसंज्ञासंकेतवक्तृयोग्य-
मपि न्यासेन नवचक्रेश्वरीविद्यानां प्रसंगान्नारूकश्रुति साधयेनाह
**एवंच कप्रकारान्स्तज्ञाकाले प्रयत्नतः एताः क्रमेण मन्त्रज्ञः
साधकेन कुलेश्वरीति ।** एवमुक्तप्रकारेण नवप्रकारास्त्वेताश्च-
क्रेश्वरीविद्याः साधकेनेतद्विद्याभ्यासकेन मोक्षमात्मनः साधयि-
तुमिच्छता कुलेश्वरि कुलमेयमाननमातृरूपं तेनुकं विरूपानवाद्धि-
कार्यं मेयमाननमिति लक्षणं कुलं प्रज्ञान्ते व्रजति यत्र विश्रमस्थिति
तस्य सर्जनसंहारे चेश्वरीश्च उच्यते: यथोर्णनाभः सृजते गृह्णते

वेति आज्ञावतारेणोक्तोस्ति षट्पर्ये वज्रगन्तर्वं निगिरि सद्विरसपिइ
ति पूजाकालव्यसमाणसंकेतक्रमः पर्यायप्रथत्वात्ः प्रयतस्त
द्भिश्याशेषापारे इतिवरान्वितइतितं ज्ञानरोक्तरीमाग्रहावे
शितयाक्रमेण मस्तच्याः तस्यानामाह पादाग्रजंगानान्रू
गुरुलिंगाग्रके षुच आधारे विमसेन्मूर्ति स्तस्यामावाहनीमस
त मूलेनव्यापकन्यासः कर्तव्यः परमेश्वरीति । पादाग्रजंगा
जानूरूइतिस्पष्टः आधारे विमसेन्मूर्तिपादादीनां वाच्यत्वेन
प्रसिद्धत्वात् एवंक्रक्करणमाधारमूर्त्तौ वान्तरान्वयोतनार्थं
आधारे पूर्वोक्ते चतुर्द्दले मूर्तिमूर्त्तिविद्यामसेत्स्मरेत् असंस्यामू
र्तौ वैवाहनीमसेत् मूलेनव्यापकन्यासः कर्तव्यः परमेश्व
रिमूलेननवचक्रेश्वरीविद्यया सौभाग्यविद्ययेतिया वत् पूर्व
ममतनवचक्रेश्वरीविद्यानां न्यासमुक्त्वातदाधारनवचक्राणां
चिन्ताल्लक्षणमान्तरन्यासमाह अकुलादिषु पूर्वोक्तस्थाने
षु परिचिन्तयेत् चक्रेश्वरीसमायुक्तं नवचक्रं पुरोदितमिति ।
अकुलादिषु कुलेषु विषु सत्तेच पूर्वोक्तस्थानेषु आदिशब्दे
नाष्टावद्विशाक्रनाम्नाहतविशुद्धलंविकाग्रभ्रुवोन्तविन्द
वो गृहान्तेषु रोदितं चक्रसंकेतोदितं नवचक्रं चक्रेश्वरीसमायु
क्तं नवचक्रेश्वर्यधिष्ठितं परिचिन्तयेत् अकुले सहस्रेण मूलभा
गसहस्रदलकमले त्रिपुराधिष्ठितं त्रैलोक्यमोहनं चक्रं चतुरा
धारे चतुर्द्दलकमले त्रिपुरेश्वरीयुक्तम् सर्वाशापरिपूरणं चक्रं
णाके स्वाधिष्ठानस्थितषड्दलकमले त्रिपुरसुन्दर्यधिष्ठितं स
र्वसंक्षोभकं चक्रं नाभौ दशदलकमले त्रिपुरवासिन्यधिष्ठितं
सर्वसौभाग्यदायकं चक्रं अनाहते हृदि द्वादशकमले त्रिपुराश्री
समधिष्ठितं सर्वार्थसाधकं चक्रं विशुद्धे षोडशदलकमले त्रिपु
रमालिन्यधिष्ठितं सर्वरक्षाकरं चक्रं लंबिकाग्रे अष्टदलकमले
त्रिपुरासिद्धाधिष्ठितं सर्वरोगहरं चक्रं भ्रुवोर्न्तरे द्विदलकमले

त्रिपुरांबिकाधिष्ठितं सर्वसिद्धिप्रदायकं चक्रं इन्दौ ललाटे विन्दौ म·
हात्रिपुरसुन्दर्यधिष्ठितं सर्वानन्दकरं चक्रं भावयेदित्यर्थः एतच्चक्र
विद्यानां नवचक्रेश्वरीणां नामान्याह तत्राद्या त्रिपुरादेवी द्वितीया त्रि
पुरेश्वरी तृतीया च तथा प्रोक्ता देवी त्रिपुरसुन्दरी चतुर्थी च महा
देवि देवी त्रिपुरवासिनी पञ्चमी त्रिपुराश्रीः स्यात् षष्ठी त्रिपुरमालि
नी सप्तमी त्रिपुरासिद्धिरष्टमी त्रिपुरांबिका नवमी तु महादेवि
महात्रिपुरसुन्दरीति । स्पष्टम् नन्वेताश्च विद्या नवचक्रेश्वर्यो यथा
रादिषु कुलस्थानेषु रूपेण भावनारूपेण चक्रेण समस्तव्यापवन्ते
त्याह सृजयेच्च क्रमादेता नवचक्रेपुरोदितेइति । एतास्त्रिपुराद्या
विद्या नवचक्रेश्वरीः पुरोदिते त्रैलोक्यमोहने चक्रमित्यादिपूर्वो
क्ते नवचक्रे इत्येकवचनम् अनेनाविशे[illegible]कथनार्थम् अकुला
दिनवस्थानेषु अमीषाम् संयुक्ततयैव भावितेषु नवचक्रेष्वित्यर्थः
क्रमात्सृजयेच्च त्रैलोक्यमोहनं चक्रमारभ्य प्रतिचक्रमेकैकं सृज·
येदित्यर्थः ननु किमासां नवधात्वं स्वाभाविकं नेत्याह एवं नव
प्रकाराद्याप्रज्ञाकाले तु पार्वति एकाकाराद्यादिशक्तिर्जरामर·
त्वकारिणीति । आद्याशिवादिक्षितिसन्तस्य जगतो निदानत्वात् आ
द्यशक्तिः आद्यस्य सकलवर्णादिभूतस्य प्रकाशात्मनः परशिव·
स्य शक्तिर्विमर्शिनी एकाकारा तेन निरन्तरसामरस्यमापन्ना परा
प्रज्ञाकाले तत्त्वज्ञाने भवति एवमुक्तप्रकारेण नवप्रकारा नवधा
भिन्ना एवंविधसृजकस्य जरामरकारिणी अजरामरत्वलक्षणः
शिवः तत्त्वमप्यकरोति अत्रैव वक्ष्यति नवनिमोदिताप्रज्ञात्रिभिर्भेदै
र्व्यवस्थितेति प्रासंगिकमुपसंहृत्य प्रकृतमेव प्रयानं मन्त्रसंकेतमुद्दि
शति मन्त्रसंकेतकस्तस्या नानाकारो व्यवस्थितः नानामन्त्रक्रमेणै
व पारंपर्येण लभ्यते इति । तस्याः परमशिवसामरस्यरूपायाः परा
या यो मन्त्रः सौभाग्यविद्यारूपः तस्य संकेतो गूढार्थप्रदर्शनं नानाका
रोऽनन्तरवक्ष्यमाणबहुविधरूपः नानामन्त्रक्रमेणैव नन्तरं पूर्वोक्तकस्तु

ह्यादिनानाप्रपंचपरिणामैव पारंपर्येण लभ्यते सोपानावरोहरीत्या।
शिवादिक्षित्यन्तपर्यन्तपरम्परोपदेशक्रमेण लभ्यते नाम यथा पारंप
र्यविहीनानामसंप्रदायवतामनुवृत्तमार्गबोधिगतानारपाठमात्रपर्य
वसितानामनर्थायैव केवलमित्यर्थः अत एवाहति पारंपर्यविही
नाये ज्ञानमात्रेण गर्विताः तेषां समयलोपनं विकुर्वन्ति मरीचय इ
ति उद्दिष्टस्य मंत्रसंकेतस्य विभागं प्रतिजानीते षड्विधमर्थं देवे
शि कथयामि तवानघे इति। षड्विध अनन्तरवक्ष्यमाणभावार्था
दिप्रकारेण षड्विधः अनघे परिशिष्टत्वादिदोषरहिते तेन त्वं मंदश
रूपया विमर्शशक्तेः प्रकाशात्मकोऽहं कथयामि तद्विभागमाह
भावार्थः संप्रदायार्थो निगर्भार्थश्च कौलिकः तथा सर्वरहस्यार्थो मह
तत्त्वार्थ एव चेति। वक्ष्यमाणलक्षणत्वान्न स्पष्टार्थः षोढादिमात्रक्र
मेण लक्षणानि कथयिष्यन्नादौ भावार्थमाह अक्षरार्थो हि भावार्थः
केवलः परमेश्वरि। न क्षरन्तीत्यक्षराणि नित्यपरशिववाचकत्वात्
किंच ताल्वोष्ठव्यापाराभिव्यञ्जकत्वमेषां अतएवाक्षराण्येवाक्षराणि
तेषामर्थोऽभिधेयः श्रीसौभाग्यविद्यावयवपञ्चदशाक्षराणामर्थो
भावार्थः अक्षरार्थमेवाह योगिनीभिस्तथा वीरैर्वीरेन्द्रैः सर्वदा प्रिये
शिवशक्तिसमायोगाज्जनितो मन्त्रराजक इति। योगिन्यायोगाः शिवसं
बन्धो नित्यं विद्यते आसामिति योगिन्यो विमर्शशक्त्यंशभूते ज्ञान
क्रियात्मकभावारतीपृथ्वीरुद्राण्यः वीराः उक्तार्थाः तद्योगिनीनिम
संबन्धभूताः प्रकाशांशभूताः वामाज्येष्ठारौद्र्यात्मकं ब्रह्मविष्णुरुद्राः
सृष्टिस्थितिसंहारकर्तारो वीरेन्द्राः सृष्टिस्थितिसंहारकर्तारो वीरेन्द्राः
सृष्टिस्थितिसंहारपदान्ता नाख्याकारिणः शान्तात्मिकात्मानः शिवश
क्तिमिथुनत्रयसमष्टिरूपाविवीजशिवेश्वरवर्तिकामकलाख्याभिधे
याप्तैर्विद्याक्षराभिधेयमर्थैर्मिथुनवत्तदृष्टैः शिवशक्तिसमायोगाः
च्छिवशक्त्योः समागमः संपर्कस्तन्मिथुनीकृत्य मन्त्रराजकः सौभाग्य
विद्यारूपः सकलमंत्रोत्तमत्वाज्जनितः कालआदिकर्मणिकः जातः भा

वित्त इति यावत् तस्यार्थस्य नित्यत्वात् अयमेवार्थो मयास्मिन् भागे स्मयो
दयप्रपञ्चितः यद्यप्येवं महाविद्यात्मा मातावतरन्वये एकविश्रान्तिः
वतरानन्तादिजननी ज्ञाता चतुरात्मवर्गफलदात्री अन्तरविमर्शरू
पोऽस्यां शोभिन्ना चतुष्कलीमेवं वामादीच्छादिमयाम्यकरोद्धन्त्रामस्व
निचत्वारि वामांशो ब्रह्मा स्यादिच्छैवैतस्य भारती शक्तिः अनयोरनमि
थुनसृष्टिः प्राग्वाग्भवात्मकं बीजं ज्येष्ठांशो विष्णुः स्याज्ज्ञाना विश्वंभ
रातयोर्मिथुनमिदमेव दक्षिणे यत्नयत्नं श्रीकामराजमध्याहो यो
ऽयात्मकस्तु रुद्रः क्रियामयी शक्तिरस्य रुद्राणी युगलमिदं तार्तीयं
बीजं जनयति पश्चिमाम्नायः स्याद् दविकास्वरूपः शंभुः शान्तात्मिका
स्य शक्तिः स्यात् मिथुनमिदं शिवशक्त्योरुत्तरसमयात्मत्रयमयिति
ष्ठेत् एवमनुत्तरशान्तोऽसत्तं स्याद्धन्दुरूपिणी परा ज्ञाता च तत्र स्वात्मि
कोऽयं पश्यन्ती मातृकामयी विद्यासृष्टिः पूर्वाम्नायो वाग्भवबीजं त
दात्मकं त्रिविधम् सृष्टिस्थितिसंहारैर्भिन्ना सृष्टिस्त्रिमूर्तिमूर्तिः स्या
त् ब्रह्मात्र सृष्टिसृष्टावधिपतिरेतस्य भारती शक्तिः सोऽयं रस्यार्थ
स्यात्मएव शिवशक्तिवाचिकस्यापि मस्यार्थः स्याद्त्र स्वशक्तिमयरूप
माणिसंयोगात् सृष्टिस्थितौ तु विष्णुः कर्ता विश्वंभरास्य शक्तिः स्यात्
विष्णुः कलिपरेण्या लालिमे रेनन्तु शक्तिरयः स्यात् रुद्रोऽधिपतिः शक्ति
रौद्री स्यात् तत्र सृष्टिसंहारे हरवर्णयुगलमनयो वाचकमथो त्ररस्य रु
द्रः स्यात् रुद्राद्दारं संपर्कौ द्रौद्री तच्छक्तिरस्य हस्यार्थः अत्र वत्र शान्तवर्णा
स्य प्राप्यस्य शक्तिबीजभूतत्वात् अथ विसर्गः शिवशक्त्योः सर्गतां
श्रितयोः स्वमयी कामकलाकलयित्री तद्यमयी रक्तशुक्लमिश्रतनुः
रक्तो बिन्दुः शुक्लः शंभुः परस्तदेकार्थम् एवं द्वितीयबीजं स्थितिरूपं
दक्षिणाम्नायात्म स्यात् सृष्टिस्थित्यादिविभेदाद्वसन्ति ता एव देवता
स्तत्रत्रककलवर्णमध्यस्थितो हकारः स्थितिस्वरूपत्वमध्यद्योतय
ति परयनिरूपः संविद्वराकारः संहारात्मकपश्चिमसमयेतत्तद्दे
वतातीयमस्तिसृष्ट्यादि वशात्तापवा त्रापि देवतामवसन् सृष्टौ मा

क्रे नियतप्रायामास्याः स्पशक्तिबीजत्वात् सात्मांसहृतिस्रष्टौ शिव
मन्त्रमर्मभासते शक्तिः त्रिमयेत्तरीयबीजेनाख्यारूपत्वरार्धयात्म
नितोशक्तिशिवावयिवसतोनिरन्तरसामरस्यमापन्नौसृष्ट्यादिभे
दभिन्नश्रीविद्यावर्णयुगलनवकात्मनवनादवर्गरूपामाता साम
रस्यमाभिहाविततत्त्वाशारूपस्पर्शौरूपरसौगन्धश्चेति भूतसृष्टानां मा
व्यापकभावांश्चयस्तुः क्रमेणतस्मात्वोतिष यःशकलानि मात्र
दात्मिकाः स्युस्तथैव नतत्त्वोः वर्णैः समष्टिरेषाविद्याव्याप्नोति
तानि सर्वाणि सर्गादिस्थितिरूपः संशेरेणउभिस्तदात्मनावितनः
सर्गेणकादिवर्णैरपिषट्त्रिंशद्धिरात्मनोवयवैः पुनरष्टत्रनवि
नुप्रभेदभिन्नांश्च तद्रूपावयवान् षट्त्रिंशत्संख्याकांस्तन्मयान
श्नुतेहिसामानाव्यष्टिसमष्टिभेदेस्तत्वात्मानत्वबीजपीठमयीव
तरार्धयात्मनापिचमातानिष्कमातृकामयीविद्येति तुरीयमन्त्रस्या
र्थमाह तन्मयीं परमानन्दनन्दितां स्पन्दरूपिणीम् निसर्गसुन्द
रीं वीरां तां स्वरूपमुपास्महे इति । तन्मयीमारभ्यादिब्रह्म दिचत्व
मिथुनवाचकबीजत्रयसमष्टिरूपवाच्यांपरमानन्दनन्दितां परम
शिवसामरस्यपरिस्फुरत्परमानन्दविभेदिनीं स्पन्दरूपिणीं शिवा
दिक्षितमन्तषट्त्रिंशत्तत्वस्पन्दरूपिणीं निसर्गसुन्दरीं सर्वप्राणि
ष्वात्मतया प्रमास्पन्दीभूतां महात्रिपुरसुन्दरीं प्रकाशविमर्श
सामरस्यरूपां परां ज्ञातृज्ञानात्मतया स्वैरमुपास्महे स्वेच्छयाविह
रन्ति स्वैराचारं विरहन्तीं समर्थः स्वैरेव वदन्ति स्वैराचारेण संप्रज
त्वहन्तेदन्तयोः समेति मन्त्रशक्त्यर्थमाह शिवशक्त्यात्मसंघट्टरूपत्र
त्याणिश्रावते तत्त्वयाप्रसराश्चेषभूविविन्दोपलक्षिते ज्ञातृज्ञानम
याकारकारणामन्त्ररूपिणीमिति । शिवशक्त्यात्मसंघट्टरूपेशि
वशक्त्यात्मनोः प्रकाशविमर्शयोः संघट्टः सामरस्यं तद्रूपे ब्रह्मणि स्व
हिरण्यविसर्गस्थाना तो हृदयनादात्मतत्त्वस्पात्मेव ब्रह्माणि वैयासि
कतत्त्वाकरीत्या सर्वप्राणिष्वात्मनिशाश्वते भूतभविष्यत्कालस्था

योहृ॰
टी॰
२३
23

लिनि तत्तथा प्रसरात्मेष प्रभुवितत्सद्रूपेन प्रकाशात्मा परामृश्यते तदुक्तं
भगवद्गीतासु ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति शिव
स्य प्रकाशस्य प्रथा विमर्शशक्तिः यथा दीपस्य तत्प्रभायाः प्रसरः षट्
त्रिंशत्तत्त्वात्मना परिणामः तस्यात्मेषः शिवता वन्मात्रतया पर्यव
सानं तस्य प्रभुविविश्रामस्थाने अत्र श्रुतिः सर्वं खल्विदं ब्रह्मेति तज्ज
लानीति शान्त उपासीतेति परमेश्वर्यवानित्युक्तः अत्र श्रुतिः इन्द्रो मा
याभिः पुरुरूप ईयत इति तत्स्ववल्ल्येन्द्रकमिति नापलक्षिते काकवदे
वदत्तगृहमिति वहिष्कस्सर्जनादिव्यवहारः अस्योपलक्षणं तत्स्वरू
पपर्मे इति यावत् प्रकाशविमर्शसामरस्यरूपे नित्ये विश्वसृष्टिस्थि
तिसंहारकारिणि तत्त्वकृतात्मकमहैश्वर्यपरामृष्टपरमात्मनिवि
षये ज्ञातुरादरेनैरन्तर्यपारैवास्तासम्मद्भावतत्त्वकर्षलक्षणमनवा
रतस्तन्मयाकारकारणलक्षणत्राणं मन्त्ररूपिणी कोऽर्थः उक्तवि
शेषणपरप्रकाशविषयमननात्मसाधकतन्मयरूपताप्रतिपा
दनेन त्रायते इति निरुक्त्या तुरीयलक्षणमहामन्त्ररूपिणीमित्यर्थः
नतूक्तलक्षणविशेषणविशेषिका तुरीयमन्त्ररूपिणी किंलक्षणी
येमतत्राह तेषां समष्टिरूपेण पराशक्तिरूपमातृकेति । तन्मयी
मिति पूर्वोक्तमेव तेषां वर्णादीनां भारत्यादीनां चक्रस्थादिसमष्टिरू
पेण लक्षणेन लक्षिता पराशक्तिः तुरीयार्णे पराशक्तिरेव न ता
स्य कार्यकारणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य श
क्तिरेव तत्स्य कार्यकुरणं विविधैव श्रूयते स्वाभाविके ज्ञानवलक्रि
या च ले इति श्रुतिप्रतिपादिता परैव मातृकात्र विलसन्ती हन्त मूर्तिमा
स्वतीर्णस्वरूपिणी भवति कायति नानानामप्रपञ्चरूपेण मातृका दे
वी रत्नसिंहं केरीमा मातृका पश्यन्ती मध्यमा वैखरी रूपेण व्याहृता
अत्र श्रुतिः चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनी
षिणः गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति
कोऽर्थः ब्रह्मादिसदाशिवपरसमष्टिरूपता लक्षणा पश्यन्ती मध्यमा वै

रूपी विस्तारप्रकाशविमर्शसामरस्यरूपा तुरीयपदमन्त्रगोखर्येष्ठक्रम ·त्रि
तद्वर्णद्वयमध्ये कूटत्रनिवसति तच्चेदं ततन्मन्त्रस्य तद्वर्णद्वयवाच्यस्यकः ·पु
संबन्धः इत्यत आह मध्यविन्दुविसर्गान्तःसमास्थानमये परे कुटिला ४५
रूपके तस्याः प्रतिरूपे वियत्कले इति । तस्याः परायाः मध्यविन्दुविस
र्गान्तःसमास्थानमये मध्यविन्दुर्ध्वविन्दुः अकारहकारसामर
स्यरूपः कामाख्यः तदुक्तं कामकलाविलासे विन्दुरहंकारात्मा रवि
रेतन्मिथुनसमरसाकारः कामः कमनीयतेति विसर्गश्च विन्दु
श्चामरूपं हिन्दुश्चामरूपविन्दुद्वयं न त्वकारः तदुक्तं तत्रैव कलाचद
हनेन्दुविग्रहो विन्दुरिति तयोरन्तः कामाख्यकलयोर्द्वयोरपि मध्ये
समास्थानमये निवसद्रूपे परे अहान्तरे वर्णमामान्यन्तत्वात् अ
नापेक्षया आदेरकारस्य परत्वमाद्यपेक्षयान्तस्य हकारस्य परत्वं तेन
परे हान्तरे व्यापिना माद्यन्ते कारहकाररूपे अहान्तरे कथ्यते कुटिलारूपि
के कुटिले अकुलकुण्डलिन्यौ कुटिलरूपत्वात्तत्स्वरूपे तयोः प्रतिविं
वरूपे वियत्कले वियच्छब्देन शून्यं लक्ष्यते तेन वियद्विन्दुः कलाविन्दुरर्ध
द्वयमात्रावती हकारलिपिः कोऽर्थः शिवशक्तिसामरस्यरूपमयोर्ध
विन्द्वन्तर्गतो निवसति हकारः तस्यश्चासरूपकलान्तरावयवविन्दु
द्वयान्तर्गतमात्रारूपे निवसतो द्वे द्वे आद्यान्तरे अकुलकुलकुण्ड
लिनीरूपे परापररूपे तद्वयवत्वात्तयोः परारूपयोः प्रतिविंवरूपे वि
न्दु हकारान्तरे अकारहकारयोः स्मरणमस्फुरितत्वादित्यर्थः मन्त्र।
निगमभूतकामकलायां अकारहकारयोः स्थितिमुक्त्वाथ चतुर्थीम
न्त्रे तद्वर्णद्वयस्थितिक्रमेणाह मध्यप्राणप्रथारूपस्पन्दव्योम्नि स्थिता
पुनः मध्यमे मन्त्रपीठे त्विति । मध्यमे मन्त्रपीठे वाग्भवशक्तिवीज
योर्मध्यगते कामराजाख्ये कूटरूपे पीठे मध्यप्राणप्रथारूपस्पन्दव्यो
म्नि स्थिता मध्यप्राणः कामकलायोगतविन्दुद्वयमध्यगतप्राणो हका
रस्तस्य प्रथा प्रथनेन प्रतीतिः श्रुतिगोचरमात्ररूपं स्पन्दव्योम हकारः
तस्मिन् व्योम्नि पुनः स्थिता हकारस्य विमर्शशक्तिस्फूर्तिमयत्वात् तदुक्तं

योगि. टी. २४

२५

संकेतपद्धत्यां हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तित इति तृ
तीयपिण्डके पुनः शक्तिकूटद्वयस्फुरेदिति। तृतीयपिण्डके शक्तिबी
जे चत्वारस्तत्र पिण्डेषु पुनरित्यर्थः द्वितीयबीजवत्स्फुटभावेन स्फुरति किं
तच्छक्तिकूटद्वयस्फुरेत् शक्तिकूटं शषसहानां वर्णानां वर्गः तथा च
पञ्चकूटं षट्कूटमिति शक्तिकूटद्वयोः वर्णाः द्वितीयादन्यस्तृतीयः स
कारः तद्वर्गान्तृतीयवर्णत्वात् षोडशमातृसशषसहाः शक्तिवर्गः अत्रैव वा
वसति वश्येशादिचतुर्वर्णैः सहितं शक्तिमेव चेति पुनः शक्तिकूटद्व
यस्फुरेदिति शक्तिकूटं तृतीयसकारोपरि अविभागेन स्फुरत्सप्रका
शमानेन सकलवर्णोद्यमनुत्तरम् तदुक्तं संकेतपद्धत्यां अकार
स्सर्ववर्णाग्र्यः प्रकाशः परमः शिव इति परावयवभूताकारहका
रावेव कामकलोर्ध्वबिन्दौ मात्रायां चेति स्थितत्वात् पुनः स्थूलभावमा
साद्य हृत्थभूतौ कामराजबीजान्तर्गतककारलकारमध्यगतह
कारे शक्तिबीजादिगतसकारे गतासकारे च निवसत इत्यर्थः ननु
मध्यपिण्डे तृतीयपिण्डे च परावयवभूतयोरकारयोरवस्थानमुक्तं
प्रथमबीजे किमिति नोक्तं उच्यते दक्षिणस्रोतःपक्षपातिन्याः सौ
भाग्यदेवतायाः परायाः परापरशक्तिप्रधानत्वात् स्थिते अपरापरश
क्तिन्वितत्वात् मध्यबीजस्य स्थितिरूपत्वात् तत्र विमर्शशक्तेरेवस्था
नमुक्तं शिवस्य संहाररूपत्वाच्छक्तिबीजस्य च संहारात्मकत्वात् प्रका
शस्य च तत्रावस्थानमुक्तं विशेषेण सामान्यतस्तु वाग्भवे अत एव त
दुत्तरद्वयसंभवात् तद्विषमयत्वं परायाः कथितमित्याह वलत्यास
स्थितस्यात्तयथार्थमस्य वाच्यस्य विद्यामृतमयस्य च वाचकाक्षरसंयुक्तैः
कथिता विश्वरूपिणीति। वलतोऽभावश्चलता अस्यां संस्थितस्य वल
त्वनामात्रेनश्वरत्वमजावशिष्टक्रियाविद्या च कृतमादिसकलाप्रपञ्च
स्थितस्य यथार्थधर्मस्य पूर्वोक्तयथार्थधर्मनिर्वचनयथार्थमस्यद्वाच्यशि
वशक्तिद्वयस्य विद्यामृतमयस्य विश्वसंसारोरामाहरेतत्वात् अमृता
मृतं मरणं तद्रहितत्वान्मुक्तिः अत उक्तिः तमेव विद्वानमृत इह भ।

वतीति तन्मयस्य तदुभयहेतुत्वात् तयोर्वाच्यस्याभिधेयस्य वाचका
दरसंपुटकेस्य तदुभयात्मकशिवशक्तिमयवाच्यवाचकाकारस्य का
रसंयोगाविश्वरूपिणी विद्यावक्तृत्वादिमयरूपिणी अतएव तेषां
समष्टिरूपेणैव पराशक्तिं तमातृकाम् । तेषां सर्वेषां समष्टिरूपेणाद्वि
तीयेन सर्वेणैव परां विश्वोत्तीर्णस्य परशिवस्य मातृकामुक्तिनिर्वि
चनाम् कूटत्रयात्मिकां देवीं समष्टिव्यष्टिरूपिणीमिति । वाग्भ
वकामराजशक्तिबीजात्मिकां देवीं प्रकाशविमर्शसामरस्यरूपा
मतएव समष्टिव्यष्टिरूपिणीं कूटत्रयात्मनाव्यष्टिरूपिणीम् आ
द्यांशक्तिं भावयन्तो भावार्थ इति मन्त्रवत् इति । आद्यांशक्तिं सकला
जगदादिभूतत्वया इति पूर्वोक्तक्रमेण भावयन्तो योगिनो भावार्थ
श्चेदानीं संप्रदायार्थमाह संप्रदायो महाबोधरूपो गुरुमूर्त्याविस्थि
तः विश्वाकारप्रथायास्तु महत्त्वं च यदाश्रयमिति । सम्प्रदायस्याथा
र्थो नकर्णे शिष्यस्य प्रदीयत इति संप्रदायः महाबोधरूपः महतो
देशकालाकारैरनवच्छिन्नप्रकाशस्य बोधः परिज्ञानं रूपमस्य गु
रुमूर्त्याविस्थितः गृणाति तत्त्वमात्मीयमात्मीकृतजगत्त्रयम् उपाया
यपदरूपाय शिवाय गुरवे नमः इत्यभियुक्तवचनोक्तरीत्यात्मपर
मात्मप्रकटनपरो गुरुस्तस्यैव मूर्त्याविस्थितः नामस्यानाकलिता
गमशास्त्रस्यानधिगताखिलवेदवेदाङ्गस्यानवधारितपरमार्थ
स्य मूर्त्याविस्थितः अत्र प्रमाणवचनम् सर्वतोदिशिवावेति सदसः
श्लिष्टितत्त्वाणाम् तेनासौ नानुगृह्णाति किञ्चित्तस्य गुरोर्गिरा इ
त्यत्र गुरोरिति गुरुमानिनः किञ्चित्तस्य गुरुत्वाभावात् विश्वशिवा
द्वितिसन्तः षट्त्रिंशत्तत्त्वात्मकं तदाकारप्रथा विश्वशक्तिः अत्र श्रुतिः
सिसृक्षेतो लोकानिति सिसृक्षेति तस्या महत्त्वं तदाकारत्वे तदाश्र
यमाकोशः परमशिवसामरस्यरूपायाः परायाबीजत्रयरूपेण
परिणताया विश्वमयता वास्तवगुरुमूर्त्तिनैव लभ्यत इत्यर्थः विश्वा
कारप्रथायास्तु महत्त्वं च यदाश्रयमित्यस्यैवार्थो विवर एवमुक्तमार्थ

स्यमहत्त्वात्समस्तसावधानतयाश्रोतव्यमित्याह शिवशक्त्याद्ययामूल
विद्ययापरमेश्वरि जगत्कृत्स्नंयथाव्याप्तंशृणुष्वावहितःप्रियेइति ।
शिवोकारःशक्तिरीकारःतावाद्यौरेतभूतौयस्याःसातथाविधयाएवंवि
धरिम्णाप्रथमयामूलविद्ययाकृत्स्नंजगदेवंभूततथाव्याप्तंशृणुप्र
कारेणेति अतएवतांसावहितासमस्तसावधानाशृणु एवंविद्ययाविश्व
व्याप्तत्वमेवप्रतिजानीते पञ्चभूतमयंविश्वंतन्मयीसासमनान्तनी
तन्मयीमूलविद्याचतथाचकथयामितेइति । पञ्चभूतमयंविश्व
भूतानिपृथिव्यप्तेजोवाय्वाकाशाःविश्वमुक्तलक्षणंसापराभट्टा
रिकैवतातन्मयीपञ्चभूतात्मिकामूलविद्यापितन्मयी[illegible]वाचिका
पञ्चभूतवाचिकाअतएवतदुभयमयीतत्प्रकारंकथयामीत्यर्थः । त
स्माद्वैतस्मादात्मनआकाशःसंभूतआकाशाद्वायुर्वायोरग्निरग्नेरा
पः अद्भ्यःपृथिवीत्युपनिषदुक्तरीत्याप्रकाशात्मकात्परमशिवात्प
ञ्चभूतानामुत्पत्तिःविमर्शात्मिकायाशक्तेस्तद्वाचकानांविद्याव
र्णानामुत्पत्तिरितिद्विस्थितिःएवंस्थितेस्याःकिंवाच्यंकिंवाचक
मितिशंकापरिहरन्वर्णभूतसृष्टिप्रतिपादनपुरःसरंविश्वमय
तामेवाह हकाराद्व्योमसंभूतंककारात्तुप्रभञ्जनः रेफादग्निःस
काराज्जलतत्त्वस्यसंभवः लकारात्पृथिवीजातातस्माद्विश्वमयीच
मेति । हकाराद्व्योमसंभूतंप्रथमंविमर्शात्मकेनाकाशवाचको
हकारोजातस्तदनन्तरंतद्वाच्यव्योमप्रकाशात्मनःपरमशिवात्सं
भूतंपश्चाद्वायुवाचकःककारोजातःककारानन्तरंककारवाच्यः
प्रभञ्जनोजातःपश्चादग्निवाचकोरेफःसञ्जातस्तदनन्तरंरेफवा
चकोग्निःसंभूतःपुनर्जलतत्त्ववाचकःसकारःसञ्जातःसकारा
ज्जलतत्त्वंसंभूतंतदनन्तरंपृथिवीवाचकोलकारोजातःलकारा
त्पृथ्वीजातेत्यर्थः यस्माच्छिवशक्तिसामरस्यरूपपरावयवरूप
प्रकाशविमर्शाभ्यांपञ्चभूतानितद्वर्णाश्चजातानितस्मादु
भयसामरस्यरूपासापरासावयवभूतभूतवर्णमयविश्वमयीस

र्थः तदुक्तं कामकलाविलासे स्फुरत्तादृक्रूपेण बिन्दोर्नादस्तस्मादयो
रवोऽव्यक्तः तस्माद्गगनसमीरणदहनोदकभूमिवर्णसंभूतिः अथवि
बरादपि बिन्दोर्गगनानिलवह्निवारिभूमिजनिः एतत्पञ्चकवि
कृतिर्जगदिदमवाच्यजाण्डपर्यन्तम् मातामानमेयं बिन्दुत्रयवि
त्नबीजत्रूपाणि धामत्रयपीठत्रयशक्तित्रयभेदभावितान्यपि च।
तेषु क्रमेण लिङ्गत्रितयं तद्वत्मातृकात्रितयम् इत्थंत्रिमयत्तुरी
यबीजे पीठादिभेदिनी विद्येति ननु वंवियथक्रमेण विद्यायां वर्णाः
किमिति न स्थिताः उच्यते सम्यग्वंवियथक्रमो भवति तथापि सृ
र्वोक्तसृष्टिस्थितिसंहाराणामवभासनार्थम् विद्यायामक्रमेणव
र्णोपक्रान्ते तेन भूतवर्णक्रमो वासनाक्रमेवाधितेनोत्साहते वास
नार्थत्वाद्वर्णानामनुत्तरहिभूतसंख्यायेवाह्निशाणि किमिति न भव
न्ति अस्यामपि वह्निविस्फूयतेऽस्मादाह गुणाः पञ्चदशाख्याता भूतानां
तन्मयीशिवेति। भूतानां पञ्चानां व्याप्यव्यापकभावेन पञ्चदश
गुणाः स्वरतस्तन्मयीतदात्मिका तत्संख्यावद्वर्णवती यविद्याशिवा
शोकमोहमयसंसाररूपामंगलपरिपन्थिपरमोऽहेतप्रयारूपापर
ममङ्गलार्थत्वात् ननु विद्यान्तरसंख्यायावन्तः परिगणिताः किंत
न्मयता वासनावक्तुं शक्यतेऽस्मादाह यस्य यस्य पदार्थस्य यथा शक्ति
रुदीरिता मामासर्वेश्वरीदेवी मम सर्वो महेश्वर इति। लोके यस्य
यस्य पदार्थस्य या या शक्तिः किञ्चित्कारणसामर्थ्यलक्षणा विद्यते
सा सा शक्तिः सर्वेश्वरी देवी सर्वस्य शिवादिक्षित्यन्तस्य प्रमेयेश्वरी
नियामिका देवी परा सम सर्वः पदार्थः महेश्वरः विश्वजगन्नियो
यामकः परमशिवः सर्वलोके यद्वस्तु यत्किञ्चित्कारणसामर्थ्यरू
पेण परैव परिणता तत्सामर्थ्यवद्वस्तुरूपेण परशिवः परिणत इति
वक्तुं शक्यते किं वक्तव्यं तदुभयमयविद्यावर्णसमानसंख्याव पदा
र्थरूपेण तावत् परिणता विद्यार्थः तदुक्तमभियुक्तैः त्वं चन्द्रिकाश
शिनि तिग्मरुचौ रुचिस्त्वं त्वं चेतनासि पुरुषे पवने बलं त्वम् त्वं स्वा

द्रुतासितसलिलेशिवविनितवमूर्च्छानिःसारमेवनिखिलंवहृते जगत्वा
स्यात्इति नवभूतगुणमयीशिवेस्वरूकशिकायास्तत्त्वत्रयोत्कृतेरस्मा
द्र मामपञ्चदशार्णैः साविद्याभूतगुणात्मिका पञ्चभिस्ततथाष
ड्भिस्तथा चतुर्भिरपि वाक्तैरिति । सा शिवापरेणाविकावाच्यवाचकयोर
भेदिनी पञ्चभिरक्षरैर्वाग्भववीजस्यावयवैः षड्भिरक्षरैः कामवीज
स्यावयवैः चतुर्भिरक्षरैः शक्तिवीजस्यावयवैः नक्षरन्नीति लक्षणा
णितद्यानिमत्वात् एवं विद्यासांशोभासारह्नितपञ्चदशार्णैस्मामा
तएवभूतात्मिकावीजत्रयमक्षरशोविभज्यभूतगुणात्मकत्वा वा
सताप्रकाशइदानीमक्षराणांवयवशोविभज्यषट्त्रिंशतत्त्वात्मकत्वास
नामाह स्वरव्यञ्जनभेदेनसप्तत्रिंशात्मभेदिनी सप्तत्रिंशत्स्वभेदेनष
ट्त्रिंशतत्त्वरूपिणी तत्त्वातीतस्वभावा च विद्येशाभाव्यन्ते सदेति ।
स्वरव्यञ्जनभेदेन प्रथमवीजे ककारश्चतुर्थमीकारश्चेति पञ्च स्व
राः शिष्टानि षड्व्यञ्जनानि सप्तसेवति त्र्योदशानि तीयवीजे प्रकार
त्रयमीकारश्चेति चत्वारः स्वराः शिष्टानि व्यञ्जनानि पञ्च एवं नव
ति एवं विभागे त्रयस्त्रिंशत् वीजत्रयान्ते विन्दव स्त्रय इति षट्त्रिंशत्
एतत्समष्टिरेका एवं सप्तत्रिंशतत्प्रभेदिनी विद्यासमष्टिरूपा एवंस
प्तत्रिंशत्प्रभेद षट्त्रिंशतत्त्वरूपिणी तत्त्वातीतस्वभावा च विद्येशाव्य
ष्टिसमष्टिभेदेन षट्त्रिंशतत्त्वात्मिका तदतीतेय षट्त्रिंशतत्त्वात्मा
......व......तानि तेरूपवती सप्तत्रिंशात्मभेदेन तत्त्वातीतस्वभावा च स्वस्य
भावः स्वभावः शिवस्य यादृशो भावस्तादृशाः स्वभाव इति भावयितव्य
मित्यर्थः तत्त्वानां लक्षणानि मयैव सौभाग्यसुधोदये निरूपितानि
यथा यदयमनुत्तरमूर्तिर्निजेच्छयाखिलमपि जगत्स्रष्टुम् पः
स्पन्दे स स्पन्दः प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः इच्छासेवस्वच्छास्त
तस्समवायिनी सतीशक्तिः सचराचरस्य जगतो वीजनिखिलस्य
निजनिलीनस्य स्वेच्छाशत्त्वरूढीर्णीजगदात्मनयासमामायनिवस
कएवनिखिलानुग्रहनिरतः सदाशिवोभिहितः विश्वस्यं एवपश्या

स्यपन्निदन्तया निखिलमीश्वरो जातः सा भवति शुद्धविद्यापद
न्ताहन्तयोरभेदस्मृतिः मायाविभेदबुद्धिर्निजांशजातेषु निखि
लजीवेषु निजं स्वतस्य निरंकुशविभवं वेलेव वारिधेरुद्धेः सततया प
रिमितमूर्तिः संकुचितसमस्तशक्तिरेषपुमान् रविरिव सन्ध्या
रक्तः संहृतशक्तिः स्वभासनेपि षट्पटुः संहृणीकर्तृतायाः सा
न्यस्य शक्तयस्तस्य संकोचात्संकुचिताः कलारूपेण ह्यवस्थे।
वम् तत्सर्वकर्तृता सा संकुचिता कतिपयार्थमात्रपरा किंचि
त्कर्तृत्वममुं कलयन्ती कीर्तिते कलानाम सर्वज्ञतास्य शक्तिः
परिमितत्वमुपरताल्पवेद्यमात्रपराज्ञानमुत्पादयन्ती विद्येति नि
गद्यते बुधै रागो नित्यपरिपूर्णतृप्तिः शक्तिस्तस्यैव परिमिता
सती भोगेषु रञ्जयन्ती सततममुं रागतत्त्वतां याता नामानित्य
तास्य शक्तिर्निकृष्य नियतोदयेप्रदानेन नियतपरिच्छेदकरीत्वं
मास्थाय कालतत्त्वरूपेण याति स्वतन्त्रताख्या शक्तिः संकोच।
शालिनी सैव कृत्याकृत्येष्ववशं नियतममुं नियमयन्त्यभूनि
यतिः इच्छादित्रिसमष्टिः शक्तिः शान्तास्य संकुचिरूपा संकलि
तेच्छाद्यात्मकसत्त्वादिसाम्यरूपिणीत्व सती शुद्धाद्दिसामरस्य।
स्वरूपचित्तात्मिका मतापकृतिः इच्छास्य रजोरूपाहंकृतिनाम्नी
दहं प्रतीतिकरी जानाति सत्त्वरूपा निर्णयगोचरस्य कारणं बुद्धिः
तस्य क्रियातमोमयमूर्तिर्मन उच्यते विकल्पकरी वामादिदेव
भेदैः स एव संकुचितविग्रहो देवः ज्ञानक्रियोपरागप्राधान्याद्धि
यविषयरूपो भूत्वा श्रोत्रं चक्षुः स्पर्शनजिह्वाघ्राणानि गोचर
करणानि शब्दस्पर्शरूपरसगन्धांश्चेति भूतसूक्ष्माणि ग्राह्यमे
वातिनिकृष्टो जातो भूतात्मनापि भूतेशः गगनमनिलश्च तेजः
सलिलभूमिश्च पञ्चभूतानि श्रोत्रादिकरणवेद्याः शब्दाद्यास्तानि
वेदकास्येषाम् वचनकरी वागासीत्पाणिः स्यात्करणभूत आ
दाने गगनविसर्गानन्दत्रितयं पादादिकं करणम् गत्यन्तीभू

यो॰
टी॰
२०
27

भिः स्यादापः सांसिद्धिः कद्रवो तेजः उष्णस्पर्शमरूपस्पर्शो वायुरस्व
रं सशब्दमिति पुनरपि सिद्धावलोकनन्यायेन भूतगुणानां पञ्च
दशानां विद्यायामवस्थानमाह रूपं तावदित्याह पृथिव्यादिषु भूतेषु
व्यापकं चोत्तरोत्तरम् भूतत्रयस्तनं व्याप्यमिति । पृथिव्यादिषु
आदिशब्दादप्तेजोवाय्वाकाशा गृह्यन्ते पृथिव्यादिषु भूतेषु उ
त्तरं भूतं व्यापकं अधिकवृत्ति अधस्तनं भूतं व्याप्यं न्यूनवृत्तिः
कोऽर्थः आकाशं अधस्तनानां भूतानां व्यापकमधिकवृत्ति
त्वात् अन्यान्यपि चत्वारि भूतानि व्याप्यानि न्यूनवृत्तित्वात् एवं
वायुरप्यादीनां त्रयाणां व्यापकत्वानि त्रीणि व्याप्यानि एवं तेजो
ऽप्यधस्तनयोर्व्यापकं भूतेऽपि व्याप्ये एवमापः पृथिव्याः व्यापकः
पृथिवी व्याप्येत्यर्थः तेन व्यापकगुणा व्याप्येष्ववस्थिता इत्याह ।
तद्गुणा व्यापकाश्रयाः व्याप्येष्ववस्थिता देवि स्थूलसूक्ष्मविभेदत
इति । व्यापकाश्रयास्तद्गुणा व्यापकगुणा व्याप्येष्ववस्थिताः
स्थूलसूक्ष्मविभेदतः स्थूलमधिकवृत्ति व्यापकं सूक्ष्ममल्पवृत्ति
व्याप्यं व्यापकव्याप्ययोः स्थूलसूक्ष्मविभेदाद्व्यापकगुणा व्याप्ये
षु तिष्ठन्तीत्यर्थः । ननु कस्य कस्य भूतस्य गुणाः केषु केषु भू
तेषु स्थिता विद्यायां कानि कान्यक्षराणि कस्य कस्य भूतस्य गु
णान् लक्षयन्तीत्यत आह तस्माद्व्योमगुणः शब्दो वाय्वादीन्व्या
प्य संस्थितः व्योमबीजेन सहितं विद्यायां लक्षयेद्ध्रुवं पञ्चकमिति । त
स्माद्व्योम्नः स्वेतरभूतेभ्यः स्थूलत्वाद्व्यापकत्वेन तद्गुणः शब्दः
वाय्वादीन् वायुतेजःसलिलपृथिव्यात्मकानि व्याप्य स्थितः वि
द्यायां व्योमबीजैः पञ्चभिः पञ्चभूतेषु स्थितानां शब्दानां पञ्च
कं लक्षयेत् व्योमवाचकत्वाद्धकारपञ्चकं तद्गुणशब्दपञ्चकं
लक्षयतीत्यर्थः । ननु विद्यायां षट् हकाराणि च सन्ति अत्रास्य
हकारस्य किं प्रयोजनमित्यत आह तेषां कारणरूपेण स्थितं
ध्वनिमयं परमम् इति । तेषां शब्दानां कारणरूपेण स्थितः कार

णात्मनास्थितोध्वनिर्नादाशब्दानां कारणं तदुक्तमभियुक्तैः पिंडे
वाचकविस्तरस्य महतः संस्कारदोषस्थिति नीदोसौ तव देवि मू
र्ध्निसमासीमानमुल्लङ्घ्य वर्त्तते यद्वा काण्डइवक्रमेण विरसत्वन्नामा
मणीयस्तनीमाजिह्वपरिचिदृशामनुभवन्मूर्तिस्तनीयान्समे
तितन्मर्यंतलक्षत्वात परं कामराजबीजस्थितककारलकारम
ध्यगतहकारात्परं कोयं: कामराजमध्यस्थितः षष्ठो हकारः आ
काशादिपञ्चभूतसूक्ष्मगतशब्दपञ्चककारणनादरूपः काम
राजबीजस्थितिरूपतां लक्षयतीत्यर्थः । ननु हकारादिवर्णा आ
काशादिभूतवाचकाः स्युः कथं शब्दादिपञ्चभूतगुणानाम
पि वाचका इत्युच्यते इत्यत आह भवेद्गुणवतां बीजं गुणानामपि
वाचकम् । गुणवतां गुणाः शब्दाद्याः पञ्च तद्वतामाकाशादी
नां भूतानां बीजजातावेकवचनम् अत्र विद्यायां हकारादीनि प
ञ्चभूताक्षराणि मन्त्रनामानि अत्रैवोक्तं हकाराद्व्योमसंभूतमि
त्यादि अतो बीजानीत्युच्यन्ते ककारादिहकारान्तानां मन्त्रना
नां बीजत्वमुक्तं तदुक्तं विरूगगनचन्द्रिकायां षड्विसर्गमहिम
स्तुतेः कलाबिन्दुसर्गरहिता स्वयं प्रोच्चे सर्वप्रवेशशिनः कला
स्थायेयोनयो वियुतबीजतस्वरा इति परापञ्चाशिकायामपु
क्तं येयं मातृकादेवी बीजयोन्यात्मना स्थितेति तानि तद्गुण
नां शब्दादीनां वाचकानि लक्षणानि हकाराद्यक्षराणि आकाश
यर्थेषु संकेतितत्वात् तद्गुणेषु शब्दादिषु लक्षणामेव तदुक्त
मभियुक्तैः साक्षात्संकेतितं योर्थमभिधत्ते स वाचक इति को
ऽयः शब्दादिगुणवतामाकाशादिभूतानां यानि बीजानि वाच
कानि हकारादीनि तानि तद्गुणानां शब्दादीनां लक्षकानीत्य
त्र लक्षणीयनिमित्तमाह कार्यकारणभावेन तयोरैक्यानिव
क्षयेति । तयोर्गुणगुणिनोः गुणी कार्यं गुणः कारणं अत्र का
र्यकारणभावेन एकत्वविवक्षया विवक्षितमेकत्वं नतु तात्त्विकं

गुणगुणिनोः कार्यकारणभावादेकत्वमारोप्य तत्संबन्धं तन्निमि-
त्तीकृत्य लक्षणया गुणिशब्दो गुणे प्रयोक्तव्य इत्यर्थः तदुक्तं स्वच्छ
न्दसंग्रहे शकप्रान्तत्वयोरत्वविशेषमापन्नरूपतः शब्दस्तु शब्द
तन्मात्रमृदुत्वकठिनत्वतः विशिष्टस्पर्शरूपस्तु स्पर्शतन्मात्र
संज्ञकः नीलपीतत्वशुक्लविशिष्टरूपमेव च रूपतन्मात्रमित्यु
क्तम् मधुराम्लत्वसंयुक्तम् रसतन्मात्रसंज्ञकं सौरभ्यादिवि
शेषतः गन्धः स्याद्गन्धतन्मात्रं तेभ्यो वै भूतपञ्चकम् आका
शश्शब्दतन्मात्रान्निःसः शब्दगुणं महत् व्यापकं निर्मलं तत्त्वम
वकाशप्रदानकम् स्पर्शतन्मात्रतो वायुश्चलरूपो भवन्नभः ज
गत्प्राणोऽनिलो व्यूहेप्रेरणं च लघुर्भवेत् शब्दस्पर्शगुणः प्रोक्तो
गमागमनकर्मकृत् शब्दस्पर्शगुणः प्रोक्तो गमागमे तेजस्तत्त्वं
वभास्वरम् रूपतन्मात्रकारं च पाककर्मकरं शिवे रसतन्मात्र
तोजातं वारितत्त्वं द्रवात्मकम् शब्दस्पर्शरूपरसगुणं संप्रापक
र्मकृत् गन्धतन्मात्रतो जातं पृथ्वीतत्त्वं कठिनामला शब्दस्पर्शरू
परसगन्धपञ्चगुणात्मकम् पृथिवीतत्त्वमाख्यातं कठिनं सर्व
धारणम् पृथ्व्यादिव्योमतत्त्वान्तं पञ्चकं पूर्वपूर्वकम् कार्यंशृष्टा
समष्टिरूपं पञ्चकं क्रमाच्चिन्ति पूर्वविद्यास्थहकारपञ्चकस्य पञ्च
भूतस्थितिप्रारूपञ्चकलक्षणामुक्त्वेदानीं वाय्वादिभूतचतुष्ट
यस्थितं स्पर्शचतुष्टयं वायुवाचके रत्नैस्तद्गुणं स्पर्शचतुष्टयं
लक्षयति महामायात्रयेणापिकारेण च बिन्दुना वाय्वग्निज
लभूमीनां स्पर्शानां च चतुष्टयम् उत्पन्नं भावयेद्देवि स्थूलसूक्ष्म
विभेदितं इति । महामायापंकारेस्त्वेषां त्रयं बीजशिखवर्त्तिनामी
कारेण बिन्दु हयहार्थमात्रामयाणां त्रयेकारेण च बिन्दुनातः
दक्षस्य कारणेनाकारहकारसामरस्यरूपेणाकामाख्येनोर्ध्व
बिन्दुना वाय्वग्निजलभूमीनां च चतुष्टयमुत्पन्नं लसंभावयेत्
स्थूलसूक्ष्मविभेदतः इति सूक्ष्माणि पृथ्व्यप्तेजांसि स्थूले वायुर

वीजीनेभ्यः अत एवं वियेन ईकारत्रयेण विन्दवः षट्सन्तिकारणविन्दुः
समष्टिः वृत्तहृदयस्य षड्विन्दुलाञ्छितं वृत्तात्मकत्वाद्वायुमण्डलस्य तदु
क्तमभियुक्तैः कण्ठादितालुवन्त षट्कं वृत्तं षड्विन्दुलाञ्छितम् धूम्रमि
ति तद्वायुमण्डलवाचकेन ईकारत्रयेण समष्टिविन्दुनाच स्थूलसू
क्ष्मविभेदतः वायुरप्यस्थूलसूक्ष्मविभेदतः वाय्वादिमवतत्त्वकं यस्यितं स्प
र्शवत्तत्त्वयभावयेदित्यर्थः वायुवाचकैर्वायुगुणं स्पर्शं च तत्त्वयल
क्षयित्वा इदानीं तेजोवाचकैस्तैरस्तद्गुणं रूपं त्रयं च लक्षयति रू
पाणि त्रितयं तद्वत्त्रिभी रेफैर्विभावितामिति । रूपाणां त्रितयं वह्नि
वरिष्ठमिस्थानां रूपाणां त्रितयं त्रिभी रेफैर्विभावितं लक्षितं तत्र रूप
पृथिव्यम्बुतेजसां साधारणं कथं तेजोवीजेन रेफेन लक्षितमित्यत आह
प्रधानं तेजसो रूपं तद्वीजेन हि लक्ष्यत इति ननु त्रिष्वपि भूतेषु विद्य
ते रूपं तथापि वाय्वाकाशयोरभावात्प्रथमं तेजसो रूपं प्रधानं पश्चादि
तरयोः भूतयोस्तस्य वीजेन रेफेन जन्यते प्रकाश्यते तेजस्तत्त्वं प्रादु
र्भावः एवं तेजोवाचकैस्तै रेस्तद्गुणं रसद्वयं लक्षयति विद्यास्थ
चन्द्रवीजैस्तु स्थूलः सूक्ष्मो रसः स्मृत इति । विद्यास्थैस्त्रिवीजैः स्थि
तैः चन्द्रवीजैः सकारैरभिधानमात्रमेतत् तदुक्तमभियुक्तैः सो
मेन्दुचन्द्रामृतरश्मिविन्दुभिरेकममदिति स्थूलः सूक्ष्मः स्थूलरसोऽनव
गतोव्यापकत्वात् सूक्ष्मो रसोऽभूतत्वागतो व्याप्यत्वात् स्मृतो भा
वितः स्मृतिर्हि भावना ननु विद्यायामपि सकारत्रयमस्ति अप्
थिव्यप्तत्त्वरसद्वयमेव तत्रेणामकारेण किमुच्यत इत्यत आह संवन्धो
विद्यते लोके रसस्याप्यमृतस्य चेति । अमृतस्य स्वधायाः रसस्या
पि संवन्धो लोके विदितः सुरासुरैः पानियो मथ्यमानेन तत्सारभू
तममृतमुदितमिति पुराणप्रसिद्धा लोके परिज्ञातं अतोऽमृतस्य
सारभूतत्वाद्गुणो रसस्तत्तीयमकारेण लक्ष्यते कोऽर्थः अमृतं स्थू
लममृतं तत्सारभूतं सूक्ष्मं तद्वाप्यं पृथिवीचक्रसूक्ष्मातेन सलिला
मृत पृथिव्यन्तरस्थितो रसः विद्यास्थैस्त्रिभिः सकारैर्लक्ष्यत इत्यर्थः

पूर्वमधावकैरक्षरैरस्मृणां वमत्रयं लक्षयित्वेदानीं पृथिवीवाचकैर्वर्णैः पृ
थिवीगुणं गन्धं लक्षयति वसुन्धरागुणो गन्धस्तल्लिपिर्गन्धवाचिको
ऽयं वसुन्धरायाः पृथिव्या गुणो गन्धस्तल्लिपिः पृथिवीवाचकवर्णो
लकारो गन्धवाचकः ननु विद्यायां लकारत्रयमस्ति तत्रैकेन लका
रेण पृथिवीगुणो गन्धो लक्षितः शिष्टाभ्यां किं क्रियत इत्याह भुव
नत्रयं स्वव्याप्त्या व्याप्तं महेश्वरीति । भुवनत्रयं लोकत्रयं तत्स्वव
म्यात् लोकत्रयाधारत्वात् आधाराधेयभावः स्वव्याप्तस्मात्स्वव्या
प्तेर्हेतोः पृथिव्याख्यं तत्तेन पृथिवीभागत्रयगतगन्धत्रयलक्षकं लका
रत्रयमित्यर्थः इकाद्योमसंपुटककाद्यन्तप्रमन्त्रेन इत्येवं वाग्भवीच
कत्वयोक्तस्यापि ककारस्य प्रमातृवाचकत्वेनापि वक्ष्यमाणत्वात् अमेर
खैः स्पर्शवत्त्वं लक्षयित्वेदानीं ककारत्रयेण प्रमातृत्रयं लक्षयति
शुद्धशुद्धमिश्राणां प्रमातृणामपरं वपुः क्रोधेशत्रितयेनास्य विद्या
त्मेन प्रकाशितमिति । शुद्धाः प्रमातारो भेदधीमात्रसाराः शिवाहंभा
वभावनाः सकलाः पशवः तदुक्तं स्वच्छन्दसंग्रहे पशवस्त्रिप्रकाराः
स्युस्तेष्वेके सकलाः मताः प्रलयाकलनामानस्तेषां केचिन्मते ह्यपरि
विज्ञानकेवलास्त्वमे तेषां रूपक्रमात्पृथक् अनादिमलसंछन्नो मा
याकर्मवृतो विभुः शरीरी शिवतत्त्वज्ञो भेदैकरसिको लघुः सर्वदा
कर्मकर्ता च स्वकर्मफलभोजकः नित्यं विषयसंरक्तो भावाः योऽस्या
पुमानयमिति शुद्धाः प्रमातारः पक्वमलविज्ञानाः शिवतावन्मा
त्रसाराः ज्ञानकेवलाः पशवः तदुक्तं महास्वच्छन्दसंग्रहे मलमात्रे
ण संछन्ना पश्चविज्ञानकेवलाः स्वपक्वमलविज्ञानकेवलाः स्वस्व
यं प्रिये सतीव्रशक्तिपातेन कुरुते तांश्च केवलानिति मिश्राः प्रमा
तारः पुर्यष्टकसूक्ष्मशरीरमात्रसंवृताः प्राक् स्वस्वकर्मानुभावार्थ
मनेकयोनिषु संभूय तत्कर्मानुभावेन कर्मद्वयसाम्ये सति स्वपक्व
मलकर्माणः गुरुं विनाशिवानुग्रहशालिनः क्रियाज्ञानसाधार
णाः प्रलयाकलाः पशवः तदुक्तं स्वच्छन्दसंग्रहे प्रलयाकलस

त्रकाः पृथक्त्वकपारीराश्च स्वस्वकर्मवशात् स्थिये येसर्वयोनिषु संस्था
प्य भोगायाप्य स्वकर्मणाम् उक्ता भोगा निजेशांतकर्मसाम्येशिवः स्व
यम् स्वपक्वमलकर्माणस्तान्किञ्चिद्दत्त्वशुभंच नत्वनवादितत्वा
नां मध्ये लोकस्य रक्षिये ति एवं त्रिविधानां प्रमातॄणां वपुः स्वरूपमप
रमम् क्रोयेशात्रितयेनसमेनश्रीकण्ठव्यासमपरियस्त्रक्रोयेशः
ककारस्तेषां त्रितयेन विषयस्थेन बीजत्रितयस्थेन प्रकाश्यते अज्ञ
ते कोऽयः बीजत्रयगतककारत्रयेण सकलविज्ञानकेवलप्रल
याकलाख्यत्रिविधपशुरूपशरीरशुद्धमिश्रप्रमातृत्रयस्वरूपं ख्या
प्यते इत्यर्थः विद्याख्यानामन्त्राणां वामनामुक्तात्तद्वयवभूतानां
मकाराणां द्वादशासंज्ञकानां वामनामाहेत्यामाद्दर्शे पूर्वविद्यास्य
क्रोयेशात्रितयेन प्रमातृत्रयं लक्षयित्वेदानीं विद्याख्यश्रीकण्ठद्वाद
शमध्यस्थायदशकेनामक्रममनन्तेरणप्राणंचरमेणाश्शेवलक्षय
ति श्रीकण्ठदशकं तद्ददशकम्स्याहविवाचकम् प्राणोभूतः स्थितोहृदे
वितद्धदेकादशाः परइति। श्रीकण्ठदशकं हृल्लेखात्रयवर्जितहका
रादिद्वादशार्णान्तरोपरिगतानामकाराणां मध्ये श्रीकण्ठदशकं श्री
कण्ठाख्यकारस्तेषांदशकं अमक्रोजीवोनादिसंछन्नतयास्वम
लशिवत्वापरिज्ञानकारणेन्द्रियादिनरूवर्गान्तःपातितयाकेव
लचिन्मात्रतयाविस्मृतः तदुक्तं अनादिमलसंछन्नो मायाकर्मेद्व
तो विभुः शरीरी शिवतत्त्वज्ञो भैरवैकरसिको लघु तस्य वाचकम्
अकारः सर्ववर्णाग्र्यः प्रकाशः परमाशिव इति संकेतपदस्मृकारी
त्याअकारवाच्यः परमशिवः परमशिवांशत्वात् तद्वत्परमशिववत्
यथापरमशिवकारवाच्यस्तथा तदङ्गभूतो जीवोप्यकारेणाच्य
तइत्यर्थः तद्वज्जीववत् यथाशिवांशो जीवः परमशिववाचकः
श्रीकण्ठेनलक्ष्यतेतद्वज्जीवदेकादशास्य श्रीकण्ठो जीवाधारभूतः प्रा
णरूपः प्राणस्य निरूपकः स्थितः प्राणो हि जीवस्याधारः प्राणेनवि
ना जीवस्यानवस्थानात् परः परो द्वादशः श्रीकण्ठः ९ह्रुष्ठुरूपा।

यो॰ह॰
टी॰
३॰
30

स्यवाचकः विश्वस्यपूरणात्परमशिवः तदुक्तं चिद्गगनचन्द्रिकायाम्
विश्वस्य पूरणान्निशिवात्मनीश्वरेऽपूरणात्तद्रूपतामुपैतु शिवे नमः प्रति
दृष्टुमर्हथ यस्तामतत्त्वालिङ्गयोत्तद्धमस्य इतिपुरुषएवेदं सर्वमिति
श्रुतिः ननु श्रीकण्ठोद्धादशके विद्यायांविद्यते एकेन शिवः कथ्य
ते एकेनजीवः एकेनप्राण इति त्रिभिरेवान्तंकिमस्येति मत आह
एकः सन्नेवपुरुषो बहुधाजायते हि स इति। सपमेकेनपुरुषः क
थ्यते द्वाभ्यांजीवप्राणौ तथापि स एकः सन्नेव एकमेवाद्वितीयं
ब्रह्म स्यास्यामभवदिति उपनिषदुक्तरीत्यासद्रूप एकोपि पुरुषः
बहुधाजायते हि शब्दः प्रसिद्धौ अस्मिन्नर्थे प्रमाणं इन्द्रो मायाभिः पुरु
रूपईयत एकएव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा
चैव दृश्यते जलचन्द्रवदिति सएवमेकएव शिवो भवति जीवप्राणा
त्मना बहुधा विभिन्नस्सन् एतमर्थं द्योतयितुं विद्यायां बहवः श्रीकंठा
दितादृशार्थाः ग्रहणं हि वासनानुक्ता बिन्दुनादादीनां च वास
नामाह हृदेश्वरसदेशाख्यादेवतामिति विग्रहाः बिन्दुत्रयेण क
थिता इति। कदस्तेनायि यतिस्सजस्तत्त्वस्वान्तर्भूतं पुरुषरागवि
द्यानियतिकालकलामायान्तं तदुक्तं स्वच्छन्दसंग्रहे पुरुषादि
कमायान्तं तेजस्तत्त्वं महेश्वरीति ईश्वरसदाशिवौ वायुतत्त्वात्म
कौ तदुक्तमत्रैव विद्या चेश्वरसादाख्यौ वायुतत्त्वसमीरितमिति
अतो हृदेश्वरसदेशाख्यादेवतामिति विग्रहाः परिच्छिन्नरूपाः त
दुक्तमत्रैव यस्सदाशिवपर्यन्तं विनाशोत्पत्तिसंयुतमिति बिन्दु
त्रयेण कथिताः बिन्दुत्रयं बीजशिखरवर्तिकास्सकलोर्ध्वगतां वि
न्दूर्नाचिन्तयम् अमितामितिविग्रहाः शान्तिशक्तिस्तत्त्वनादवि
नयवोधनात् इति। शान्तिरव्यक्तध्वनिलक्षणो नादो विलं जग
दुपरीकृत्य यत्र लयमेति सब्रह्मरन्ध्रावसानभूमिः ऊर्ध्वशक्ती ना
प्रशान्तिस्थानं हेतत्वात् तदुक्तं स्वच्छन्दसंग्रहे नाडायारन्ध्रनादा
न्तोभिन्नास्सर्वमिदंजगत् अयशान्ताविनिर्भिद्य ऊर्ध्वशक्त्यवसानकः

नाडाब्रह्मबिलेलीनस्वभक्तध्वनिलक्षण इति शक्तिरूर्ध्वशक्तिः
रुपरिगतशक्तितत्वं तदुक्तमत्रैव ब्रह्माणी त्वपराशक्तिः ब्रह्मणो
ब्रह्मरन्ध्रगामिनी हार्दं साभोद्रमार्गस्परोधयित्वा अवस्थिता तां वि
द्यात्तव शरीरे हृदूर्ध्वशक्तिं परां शिवाम् शक्तितत्वात्मिकां देवी प्रसु
प्तभुजगाकृतिम् शक्तितत्वं समाख्यातं भुवनेशाश्रितं महदिति शं
भुः शिवः शिवतत्वं शक्तितत्वोपरिस्थितम् तदुक्तमत्रैव शिव
तत्वं समाख्यातं तत्स्थं शक्तितत्वत इति अमितामितविग्रहा अत
एवानन्ताः अपरिछिन्नरूपाः व्योमतत्वान्तर्गतत्वात् तदुक्तं त
त्रैव शिवतत्वं शिवो व्योम नादत्रितयवोधना वाग्भवकामराज
शक्तिवीजोपरिगतविन्दुत्रयोपरिगतरोधिनीत्रितयोर्ध्वभाग
गतानां नादानां त्रयमेषां क्रमेण वोधकं लक्षकं ते नादः त्रितयवो
धनाः वाग्भववीजोपरिगतविन्दूपरिवर्त्तिना नादेन शक्तिः तार्त्ती
यवीजशिखरवर्त्तिना नादेन शक्ति वोध्यमत इत्यर्थः पूर्वविन्दुना
रवासनाभुक्के दर्भी सर्वमन्त्रमयवासनामपि मोदाहरणमाह
वागुरामूलवलये सूत्राद्याः कवलीकृताः तथा मन्त्राः समस्ता
श्च विद्यायामत्र संस्थिता इति । वागुरा मृगवन्धिनी अत्र तु वागुरा
शब्देन मत्स्यग्रहणहेतुर्जालं लक्ष्यते पाणिग्रहणसाम्यात् अस
या मूलवलय इत्युपपन्नं स्यात् मृगवन्धिन्या मूलवलयस्याभा
वात् रज्जुनिर्मितत्वात् सूत्रादीनामप्यभावात् सूत्राद्याः सूत्राणि
तन्तवः अत्राद्यशब्दाज्जालप्रान्ते आयसगुलिकाः प्रेता गृह्यन्ते या
या लोहादिमये वलयजालावयवानां तन्तूनां मूलं कलितं त
था समस्तमन्त्राणां मूलभूता या वैखरी विद्या यामस्यां विद्यमानाः
अतो विद्यायामत्र समस्तमन्त्राः स्थिता इत्याह गुरूपदेशक्रमेण
यमर्थः संप्राप्य इत्याह गुरुक्रमेण संप्राप्तः संप्रदायार्थ इति इ
ति गुरुक्रमः पारंपर्यक्रमः तदुपदेशक्रमेणैव शिवादिविग्रहा
त्मकं सर्वकारकारणत्वधनिरूपं परं स्वं संस्पृष्टं यवलतेजसम

ज्ञा टी ११
12

ने॰ टी॰ ३१
31

वाग्रूपं प्रसृतं ततो मन्त्रता शक्ति केवलम् अथ कर्मकरूपेणेति निष्का-
लकर्मकारणम् परानन्दस्वरूपं तत्स्वच्छन्दादिप्रभेदतः अष्टषष्ट्यु-
त्तराष्टाः प्राक्स्वच्छन्दभैरवः तद्धि सप्रपञ्चेन शास्त्रवाक्यानाश्रितो-
ऽपरः तत्सर्वशास्त्रतो नात्र कथितं न च विस्तरम् तदेतत्सारभूतेन मया
भिन्नशिवेन तत् मन्त्रसिद्धामनस्थेन पञ्चमन्त्रशरीरिणा कौलि-
कादिषु सिद्धान्तपूर्णायाविलमागमम् साधनं पुरुषार्थस्य कौ-
लिकं चातिकौलिकम् अस्मत्कामथमेयं च शिवेन कथितं पुरा
तज्ज्ञानमीश्वरे दत्तमीश्वरेणाशिवेश्वया विद्यायामादितो दत्तं वि-
द्येशाय च तत्ततः विद्येश्वरेण दत्तं तज्ज्ञानं नियमितिक्रमात् दत्तं रु-
द्रेभ्यस्ततस्तु गुणात्तेषु ख्यापयच्च श्रीकण्ठेश्वरेणैव दत्तं तेन ततः
परम् श्रीकण्ठेन प्रदानादि दशरुद्रान्तिकं क्रमात् दीक्षयित्वा विद्या-
नेनैव दत्तं ज्ञानमनविके दीक्षयित्वाभिषिच्य श्रीकण्ठेन ममापि
च दत्तं श्रीदक्षिणं सर्वं सर्वकामार्थसाधनमिति स्वच्छन्दभैरवो-
करीत्या मयोदितः विषमपदैः संप्रदायविद्भिपरिज्ञानार्थं श्लोकैः
पूर्वोक्तकरीत्या कथितः संप्रदायार्थः विना गुरूपदेशं ज्ञप्तिबलेन
पुराणादिश्लोकैव गृहीतमशक्य इत्यर्थः अथ क्रमप्राप्तं निर्गर्भार्थ-
माह निर्गर्भोऽपि महादेवि शिवगुर्वात्मगोचर इति । निर्गर्भोऽपि नि-
र्गर्भार्थः शिवो वाङ्मनगोचरः सकलनिष्कलत्वादिगुणरहितः
स्ताद्दृशः स्वात्मतया वक्ष्यमाणेन विदिताविलगमार्थो गुरुस्ताद्द-
शः गुरुकरुणालाभविगलितसकलपाशविशदस्वरूपानुभवशा-
नात्मा शिवः तदुक्तं स्वच्छन्दसंग्रहे तन्मात्रातीतवर्णरोहे वाङ्मनोऽती-
गोचरम् सनिष्कलं वा सकलं नीरूपं निर्विकल्पकम् निर्द्वन्द्वपर-
मं तत्त्वशिवाख्यं परमं पदम् सर्वविद्याचार्यो माहात्म्यमेव परायणः गु-
रुवक्त्रप्रयोगेन पश्चात्तत्रैव योजयेदिति गुरुः गृणाति तत्त्वमात्मा क्रा-
सजगत्त्रयम् उपायोपाययोगेन शिवाय गुरुवेन भवति एवंविधशि-
वगुर्वात्मगोचरानुसन्धानात्मकौ लौकिको निर्गर्भार्थ इत्यर्थः न

नत्वकेनशिवगुर्वात्मनोंप्रकारेणैक्यमनुसन्धीयतइत्याह तत्प्र
कारंवदेदेवेशिदिङ्मात्रेणवदामितेइति । तत्प्रकारंशिवगुर्वात्म
नामैक्यानुसन्धानात्मकंदिङ्मात्रेणनिर्देशमात्रेणवदामिना
शेषविशेषप्रतिपादनेप्रपञ्चेनेत्यर्थः तत्प्रकारमाह निष्क
लत्वंशिवेबुद्ध्वातद्रूपत्वंगुरोरपि तन्निरीक्षणसामर्थ्यादात्मन
श्शिवात्मताम् भावयेद्भक्तिनम्रः सन्शंकामेघाकलंकितइति
कलाअवयवानिष्कलत्वंनिरवयवत्वंशिवेशुद्धेनिष्कलत्वेनबु
द्ध्वागृणाते तत्वमात्मीयमित्याद्यभियुक्तवचनोक्तरीत्यानिष्कलं
निखिलात्मकंशिवोस्म्यात्मतयावीक्ष्यमाणस्यैवगुरुत्वाद्गुरोर
पितद्रूपत्वंशिवात्मकत्वंबुद्ध्वातन्निरीक्षणसामर्थ्याद्गुरोराज्ञा
पालनेनकेवलंनिष्प्रपञ्चमेवनिरीक्षणंतादृशाद्वैतविदंभोपि
स्याद्वीभूततयाविशुद्धाःशिष्यास्तल्लीयते आत्मन्स्वविद्वत्वनइ
त्यादि वाक्योक्तरीत्यागुरोर्निरीक्षणंनिखिलपाशच्छेदनमागा
हिसामर्थ्यंवशात्सामर्थ्यातिशुद्धिःशिष्योभक्तिरसतःप्रत्ययमन्त्र
परशिवोहंभावभावनावेशः प्रत्यहंस्वानन्देनेत्ययपद्माभ्यासव
शात् शंकामेघाकलंकितः शंकासंकोचः संसारित्वाभिमानः
तद्योन्मेषः पुत्रभार्यादिवास्वार्थाभिनिवेशः तेनाकलंकितः
विगताहंममताभिमानः आत्मनश्शिवात्मताभावयेत् जपा
कुसुमसामीप्यविगमात्स्फटिकस्येवनैर्मल्यमिवाद्वैतभावनाभा
वितगुरुकटाक्षपातपाटितपाशपटलः परिपूर्णस्वकंपश्येदि
त्यर्थः अनन्तरंक्रमप्राप्तंकौलिकार्थमाह कौलिकंकथयिष्या
मिचक्रदेवतयोरपि विधायुर्वात्मनामैक्यमिति । कौलिकंकौ
लिकाख्यमर्थंकथयिष्यामि चक्रदेवतागुरुविद्यासाधकानामै
क्यानुसन्धानंकौलिकोयऽर्थः अक्षरार्थःस्पष्टः तत्प्रकारमाह
तत्प्रकारः प्रदर्श्यते । इत्यादिरूपेणकौलिकार्थस्तु कथितेवीरव
न्दितरम्येनेन आदौविद्यायाचक्रयोरैक्यमाह लकारेस्वतरश्राणीषि

लकारैर्विद्यावीजत्रयगतैश्चतुरस्राणि भूगृहाणि पृथिवीमण्डलं
पीतं चतुरस्रं वज्रशोभनमिति स्वच्छन्दसंग्रहात्करीषिमा भूमण्डलस्य
चतुरस्ररूपत्वात्तत्त्ववाचके लकारे चतुरस्रत्रयं जातमित्यर्थः
वृत्तत्रितयसंयुतम् सरोरुहद्वयं शाक्तं कर्णिकोमात्मकं प्रियेइति ।
तदुक्तं च तन्त्रः शातीयाख्येमादने तदथ शक्तिरिति हंसपारमेश्वरे
ऽप्युक्तं शिवो हकारः इत्युक्तं सकारे शक्तिरव्ययेति शाक्ते लकारे
वृत्तत्रयसंयुक्तं सरोरुहद्वयं चतुरस्रान्तरे पुकं वृत्तेन तद्बहिर्नालानेः
कोऽष्टादलसोमात्मकं पद्मं तदन्तश्च द्वितीयं वृत्तं तदन्तश्चाष्टदलप
द्मं सूर्यात्मकम् एवं वृत्तत्रयसमन्वितमग्निमात्मकं सरोरुहद्वय
जातमित्यर्थः हृल्लेखात्रयसंभूतैरष्टैर्नवसप्त्यकैः विन्दुत्रययु
तैर्जातं नवयोन्यात्मकं प्रियेइति । जलबिम्बस्य वृत्तेन वेष्टितं च प
द्मलाञ्छितमिति स्वच्छन्दसंग्रहोक्तरीत्या जलबिम्बस्य पद्मद्वय
पद्मकलाञ्छितवृत्तरूपत्वात् जलतत्त्ववाचकैः सकारैर्वृत्तत्र
यसंयुक्तपद्मद्वयं जातं च युताद्धृल्लेखात्रयसंभूतैर्वीजत्रयगतहृ
ल्लेखात्रयावयवगतैरष्टैर्हकाररेफकाराख्यैर्विन्दुत्रययुतैर्नी
वसत्व्योमके नवयोन्यात्मकं चक्रं जातमित्यर्थः नन्वपद्मद्वयान
न्तरं चतुर्द्वारदशारद्वयात्मकचक्रत्रयस्य कथनेयुक्तं किमिति
तदुल्लंघ्य नवयोनिचक्रं कथितमुच्यते नवयोनिचक्रस्य परिष्ठा
रस्तारे कृते तिसृभिः शक्तिभिः वह्निभिश्च द्विदशचतुर्दशकोणा
त्मकं जातं ततो नवयोनिचक्रानन्तरमेतच्चक्रत्रयमुच्यते इत्येतत
सर्वमनसिनिधाय मण्डलत्रययुक्तं तच्चक्रं शतपत्रानलात्मकम् व्योम
वीजत्रयेणैवेति । मण्डलत्रययुक्तं वृत्तत्रयान्तर्गतं शक्त्यनलात्म
कम् चक्रं नवयोनिचक्रस्य परिष्ठारस्तारे कृते सति तिसृभिस्ति
सृभिः शक्तिभिरनलैश्चत्रिभिर्निष्पन्नत्वात् द्विदशारचतुर्दशार
कोणात्मकं चक्रत्रयं व्योमवीजत्रयेणैव हकारत्रयेणैव हकार
स्य व्योमवाचकत्वात् हृल्लेखात्रये हकारत्रयं गतं तापिष्टेन हकार

त्रयेणचतुर्दशारादिचक्रत्रितयं जातमित्यर्थः प्रमातृत्रितयात्मि
तम् इच्छाज्ञानक्रियारूपं मातृत्रयसंभूतम् सदाशिवासनं देविम
हाबिन्दुत्रयं परमिति । प्रमातारस्त्रिविधा उक्तरूपा अष्टष्टकमि
श्रात्मानस्तेषां त्रयेणाविंशतिपञ्चाब्धिवानुग्रहतो मलकर्मवि
पाकात् पृथिव्यग्नितेजोमनेजोवाय्वधिपतितामात्तेनतत्समष्टि
तथा हतं प्रांतत्तुक्तं स्वच्छन्दसंग्रहे मलादीनामपाकेतत्साम्या
नुग्रहोभवेत् आधिकारिकमैश्वर्यं शिवानुग्रहमात्रतः पशवस्त्रि
प्रकारास्तु प्रागुक्तः परमेश्वरि अपक्वमलकर्माणस्ताम्किन्वि
दत्तुशुद्धच जलतत्त्वादितत्त्वानांमध्येलोकेश्वरस्त्रियेति इच्छाज्ञा
नक्रियारूपं मातृत्रयसंभूतम् इच्छाज्ञानक्रियाशक्तिप्रधानप्र
मातृत्रयनिरूपकानां साधनानां कारणानां त्रयेण संभूतं मिश्रि
तं सदाशिवासनं पृथिव्यादिवायुतत्त्वानामधिपतिभिर्ब्रह्मविष्णु
रुद्रेश्वरैस्तुभिः पादरूपेणयुतंपञ्चभूतात्मकं काशाधिपतिसदा
शिवरूपपञ्चमञ्चासनं महाबिन्दुमयं परपरशिवैर्विकरनिकरे
प्रतिफलति विमर्शदर्पणेविशदे प्रतिरुचिरुचिरैकरूपे चित्रम
येनिविशते महाबिन्दुरिति कामकलाविलासोक्तरीत्यापरशिव
प्रतिबिंबमहाबिन्द्वात्मकपरमुत्कृष्टशिवशक्त्योरधिवासयोग्य
त्वात् नउक्तं ज्ञानदीपविमर्शिन्यां उड्डियानपीठकदेवतानां:
श्रीमच्च देवतावत्तत्पादत्वेन श्रीमदर्पवतकाद्यः ऐंनं लं पृथि
व्याधिपतये ब्रह्मणे नमः वं अब्धिपतये विष्णवे नमः रं तेजो
ऽधिपतये रुद्राय नमः यं वाय्वधिपतये ईशानाय नमः एतान
ख्येही आकाशाधिपतये पञ्चवक्त्रसदाशिवमहाप्रेतपद्मासना
यनमः इति मञ्चिकाशिवमभ्यर्च्य इति मंत्रमयं चक्रं देवतायाः प
रं वपुरिति । इत्यमुक्तप्रकारेण मंत्रात्मकं चक्रं इदानीं चक्रेण देव
तायापैक्यमाह देवतायाः परं वपुः चक्रं देवतायाः परमस्थूलं वपुः त
तः पद्मनिभां देवीमित्यत्र देवतायाः करचरणादिमत्स्थूलं तदेवत्रि

कोणादिरूहान्तःश्रीचक्रपदनिवासावरणदेवतारूपेणावयवयो
विभक्तस्यैवेन्दवासनामकंसंविदेवताश्रीचक्ररूपवपुषास्थितेनसर्वथाः
तदुक्तमत्रैव एवंरूपंपरंतेजः श्रीचक्रवपुषास्थितम् तदीया
शक्तिनिकरस्फुरदूर्मिसमाकृतमिति एतदेवोपपादयति ए
कादशाधिकशतदेवतात्मतयापुनरिति एतां प्रकादशोत्तरश
तदेवताः त्रिकोणाग्रदक्षवामकोणेषुकामेश्वर्यादिकास्तिस्रः
तद्बहिरष्टकोणान्तरालेत्रिकोणान्वितेनचतद्दिक्त्रयेष्टौकामेश्व
रकामेश्वर्यौयुग्यदेवताअष्टकोणेष्टौवशिन्याद्याः अष्टदेवताअ
ष्टकोणान्तरालेषडंगदेवताषड्अन्तर्दशारकोणेसर्वज्ञाद्यादशदे
वताद्वितीयदशारेसर्वसिद्धिप्रदाद्यादशदेवताचतुर्दशारेसर्वा
संक्षोभिण्याद्याश्चतुर्दशाष्टदलेह्यनंगकुसुमाद्याः षोडशदलेका
माकर्षिण्याद्याः षोडशश्रन्तश्चतुरश्रेअणिमाद्यादेवतादशमध्यचतुर
श्रेब्राह्म्याद्याअष्टौबाह्यचतुरश्रेअणिमाद्यादशएवमेकादशोत्तर
शतादेवतात्मतयासमाकारभूतश्रीचक्ररूपिणीश्रीचक्रदेवतेत्य
र्थः ननुषट्कोलिकार्थोवामकेश्वरतन्त्रोक्तसूचितरहस्यार्थंकायपरि
मन् देवतागुरुरूपिण्याणामेवगणेशोऽन्यत्रसूचितकालिकार्थाविद्य
णोति एकादशाधिकशतदेवतात्मतयापुनरिति । पुनःशब्दादे
कादशाधिकशतदेवतात्मतयैनस्वगणेशात्वमहादेव्याइस्येनना
यिकाकाद्विवदत्वयः षड्गोक्तत्रिकोणादिवर्तरश्मान्तश्रीचक्रपद
निवासैकादशाधिकशतदेवतात्मतयागणेशत्वमहादेव्याः स
सोमरविपावकैः इच्छाज्ञानक्रियाभिस्त्रिगुणावयवैः पुनः शब्दरू
पात्तस्मादेवीति । महादेव्यास्तत्तत्स्वज्ञाकरदेवतासमूहोगणः देव्याः सो
मरविपावकैर्निजरूपेणास्थिताः इच्छाशिरःप्रदेशस्थाज्ञानंचतद्दे
योगतम् क्रियापादगतातस्याइतिसंकेतपद्धत्युक्तरीत्याइच्छादि
काम्यधीत्र्यवयवागुणाः सत्त्वरजस्तमांसितत्स्वावयवैर्मूर्तेर्नवभिः त्रि
दरूपावयवादेवी तामकर्मेन्द्रियरूपितदर्थोरेवदेवपिकरणेषा

न्तैरैः पुनः प्रकृत्या च गुणेनाथ पुंस्त्वं च न्येन चात्मना नतत्त्वविग्रहा
जायतेति । ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि बोधकर
णानि कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि तेषामर्थः शब्द
स्पर्शरसरूपगन्धाः वचनादानगमनविसर्गानन्दाख्यकरणानि म
नोऽहंकारबुद्धिचित्तान्यन्तःकरणानि प्रकृतिर्गुणसाम्यमव्यक्तं गुणे
गुणतत्त्वं सत्त्वे तु सुखमोहनं नाम मूलं पुंस्त्वं च य आत्मा पुरुषतत्त्वे त
तु कंचुकसंछन्नं सगुणे एभिर्मायादिभिः षड्भिः परिपूर्णः पशुः पुमान्
भुंक्ते भोगान्यथा देवी तथा पुरुषसंज्ञकः सेव मायार्थ भोगार्थं
पशोरव्यक्तसंज्ञकम् मूलप्रकृतिविश्वस्य गुणत्रितयरूपकम्
अभूत्तस्याः प्रकृत्यां तु गुणतत्त्वं बभूव ह तद्गुः सुखदुःखमोहात्मा मूलं
सत्त्वं रजस्तमः बुद्धिव्यापारनियतरूपमव्यक्तगुणात्मकम् विषया
त्मा तु बुद्धिः स्याद्गुणास्तत्र प्रयोजकाः गुणत्रयानुसारेण त्रिधा क
र्मानुसारतः तया बुद्ध्या समुद्भूतोऽहंकारस्त्रिप्रकारकः स वै जीवन
संरम्भरूपेण कमलासनम् विशतस्तत्र भेदेन त्रिधा कर्मानुसारतः
सोऽयं तैजसवैकारिभौतिकाख्यस्वरूपतः विकाराश्चस्य भेदाश्च
वाग्यादीन्द्रियसम्भवैः वाचिकार्थाः स्पृशीशानि तत्र तत्र नियन्तृभिः
प्राप्नोति सानुविद्याभिरवस्थाभिन्नयात्मजे संकल्पकारणं बुद्धिज्ञा
नकर्मेन्द्रियाणि च भूततन्मात्रशब्दस्पर्शरसरूपगन्धका ज्ञानाद्गा
दीन्द्रियाणां व्यापाराः परमेश्वरि श्रोत्रत्वक्चक्षुरसनाघ्राणान्य ।
तानि पञ्च वै बुद्धीन्द्रियाणि व्यापारस्तेषामेकैकतः क्रमात् शब्दस्प
र्शरूपरसगन्धानां ग्रहणं प्रिये कर्मेन्द्रियाणां वाक्पाणिपादपायुगु
पस्थितः वचनादानगमनानन्तसंगानन्दकं क्रमात् कर्मेन्द्रियाणां
व्यापारः पञ्चानामपि कीर्तितः एतानि दशबाह्यानि करणान्यान्तर
त्रयम् मनोबुद्धिरहंकारमन्तःकरणसंज्ञकमिति एतैः सावयवैः सं
भूतैः सप्तविंशतितत्त्वविग्रह एता देवी स्वयं गृहीतविग्रहा योगिनी
नामधेयाच्यते त्वगादिधातुनाम्नीभिः डाकिन्यादिभिरप्यसौ वर्णाष्टक

योह॰ टी॰ ३४ 34

निविष्टाभिर्योगिनीभिस्संयुता योगिनीरूपमास्थाय राजतेविश्व
विग्रहेति। योगिनीरूपेणविहरति अत्रैववक्ष्यति अष्टाष्टकं कर्तव्यं
विनशाठ्यविवर्जितम् त्वमेवतासांरूपेणक्रीडसेविश्वमोहिनीति
प्राणापानौसमानश्चोदानव्यानौतथापुनः नागः कूर्मोथकृकरोदेवद
त्तोधनञ्जयः जीवात्मापरमात्माचेत्येतेराशिस्वरूपिणीति। प्राणा
दिधनञ्जयान्तादशवायवोजीवात्माकलनरूपः पश्यपरमात्मापु
नरात्मान्तर्यामिस्वरूपः तदुक्तमुपनिषद्भिः सर्वभूतानामन्तर्यामी
त्येतैर्द्वादशभिराशिस्वरूपिणीति गणेशेत्यादिपदंविद्यापदेपियो
जयति अकथादित्रिपञ्चात्मतीताद्यादिक्रमेणच गणेशोमहा
विद्यापरावागादिवाङ्मयीति। अकारहकारसमरस्यरूपापरा
वागादिवाच्योद्यमाना: पश्यन्तीमध्यमावैखर्योवाचश्चतस्रः प
रावागादिवाचः तदुक्तं संकेतपद्धतौ अकारःसर्ववर्णाग्र्यः प्रका
शःपरमशिवः हकारोन्त्यःकलारूपोविमर्शाख्यःप्रकीर्तितः अ
नयोःसामरस्यंयत्परस्मिन्नहमितिस्फुटम् वामाद्यैःपिण्डितोयोसावव
र्णःपरिकीर्तितः आद्यावस्यशिरोरौद्रीवक्त्रंवामाप्रकीर्तिता अंबिका
वाङ्कुशस्थाज्येष्ठाचैवनासाग्रता अर्धार्धकलारूपापश्चाद्या[illegible]
वस्थितः अवर्णःसर्ववर्णानांनष्टपृथक्भासतेवपुः। रवस्याशिरःप्र
देशःस्यात्क्रियाचतदयोगता ज्ञानंपादगतंतस्यशान्त्याद्यार्धम
ध्यगाः अष्टधानहतःप्रोक्तःस्वरूपादिप्रतिभेदतः स्वरूपस्पर्शस्तथा
नादोथनिविन्दुस्तथैवच शक्तिर्बीजंतरंचेति अष्टधानादहतःस्मृतः व
र्णात्मिकास्ततसंख्याहतःसपरिकीर्तितः हकारःकथितोयोसौसंयो
गाद्विविधःस्मृतः समष्टिरूपमेवद्धिमातृकापीठमुत्तमम् अनाह
तहतेमैत्रैस्त्रिभिर्भेदैःसमन्ततः स्थितोयोसौमहापीठमकाराख्या
जयस्यमावित्ति एवमेतत्परादिवक्त्रविधतयावाङ्मयीअवरविमर्श
रूपोंशांशोभिन्नाचतत्कलोसैवेत्यादिसौभाग्यसुधोदयप्रतिपादि
तरीत्यापरापश्यन्तीमध्यमावैखरीमयत्वाद्विद्यायाअकथादित्रि

पंक्त्यात्मतार्तीयादिक्रमेण च अकथादीत्यादिशब्देन अकारककारथ
कारैस्त्रिभिः संबध्यंते आदयः षोडश विसर्गान्ताः कादयस्तान्ताः थाद
यः सान्ताः षोडशपदस्य कथादिवर्णात्मकतार्तीयादिकामराज
वाग्भवक्रमेण अकारादिपंक्तिमयं कामराजं ककारादिपंक्तिमयं
वाग्भव इति क्रमेण पंक्तिशब्देन गणपरः वर्त्तविंशमात्रकामयत्वात
अकथादिवैखर्यादिगणत्रयबीजत्रयत्वाच्चास्मायं महाविद्यागणेशा
भूदित्यर्थः बीजबिन्दुध्वनीनां च त्रिकूटेषु त्र्यात्मिकेति । कूटश
ब्दैस्त्रयं स्वरूपं यथोक्तमभियुक्तैः कूटेषु त्रिषु कार्यं गौरववशा
दीकारं स्फुगात् क्रमादिति सौभाग्यविद्याहृदये तेषु बीजबिन्दुध्व
नीनां च बीजस्येकारान्तविद्यात्वरजानं बिन्दुरूकलरूणः ध्वनिर्नादः
बीजबिन्दुध्वनीनां चेति तृतीयार्थे स्यान्दसः प्रयोगः कूटत्रये बीजा
नि त्रीणि बिन्दवस्त्रयो नादस्त्रय इति नवभिर्ग्रहात्मिका विद्येत्यर्थः
हृल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथाक्षरैः अष्टभिर्द्वादशभिर्वर्णैरे
कनवत्वस्वरूपिणीति । बीजत्रयशिखरवर्ति ह्रीकारत्रयं तत्संभूतै
स्तथाक्षरैः ईकाररेफाकारबिन्दुनादात्मकैः पंचभिर्दशभिरन्यो
हृल्लेखात्रयवर्जितैर्द्वादशभिर्वर्णैः कूटत्रयावयवैः एवं पञ्चद
शभिर्द्वादशवर्णैः कूटत्रयावयवैः एवं पञ्चदशभिर्द्वादशभिर्वर्णैः
सर्वैर्नवस्वरूपिणीत्यर्थः विद्यान्तर्भूतशक्त्याद्यैः शाक्तैः षड्भिस्तथा
क्षरैः योगिनीत्वं च विद्याया इति । विद्यायाः पञ्चदशाक्षर्या अन्त
र्भूताः शक्त्यष्टहृल्लेखास्तिस्रस्तदाद्यास्त्रयः लकाराश्चत्रयः एतैः षड्भिर
क्षरैर्विद्याया योगिनीत्वं योगिन्यः षड् डाकिन्याद्याः षट् राशित्वं वा
न्यवर्जितैरिति । विद्याया इत्यर्थः विद्यायाः पञ्चदशाक्षर्या अन्त्या
हृल्लेखास्तिस्रः तद्वर्जितैर्द्वादशभिर्वर्णैः राशित्वं भवेदित्यर्थः राश
योऽपि द्वादश मेषादयः उक्तमर्थं वक्ष्ये निर्दिशति एवं विश्वप्रकारा चच
क्ररूपा महेश्वरीति । एवमुक्तरीत्या योजितगणेशादिविश्वप्रकारा
महेश्वरी त्रिपुरसुन्दरी चक्ररूपा भवेदित्यर्थः देवतामंत्रविद्यापदैर्देव

यो॰हृ॰
टी॰
३५
35

वक्रपदेन गणेशत्वादिकं योज्यमित्यर्थः योजनप्रकारस्त्वष्टक।
णादिमध्यमध्यत्रिकोणरेखया गणेशत्वं नवचक्रगेहरूपत्वं तु तत्त्रय
वर्त्तदशकोणबहिर्दशारद्वयरूपेण तत्तद्रूपत्वमष्टकोणे ब्राह्म्या
दियोगिनीत्वं पञ्चशक्तिचतुर्वह्निपद्मद्वयभूगृहेशाशित्वं चेति
पुनश्च पूर्वोक्तलक्षणमेवार्थं गुरुशिष्ययोरप्यतिदिशति देव्या
देहो यथा प्रोक्तो गुरुदेहस्तथैव च तत्प्रसादाच्च शिष्योपि तद्रूप
ं प्रकाशत इति। देव्यास्त्रिपुरसुन्दर्या देहस्तनुः स्वेच्छागृहीतविग्रहो
यथा प्रोक्तः प्रकाशदशाधिकशतदेवतात्मतया पुनर्गणेशत्वमहादे
व्याद्यादिनाप्रणेन तत्त्वमात्मीयमित्याद्यभियुक्तवचनोक्तरीत्या
देवतारूपस्यैव गुरुत्वाद्गुरुदेहेपि यथा देव्या देहे गणेशत्वादिकं यो
जितम् तद्रूपो गुरुदेहोपि तथैवेत्यर्थः तत्प्रसादात्स्वप्रकाशवपु
षा गुरुः शिवाय प्रसीदतीति पदार्थमतेके तत्प्रसादमिह तत्त्वशोध
नप्राप्तमेदनुपयातिभावत इत्यभियुक्तरीत्या प्राप्तगुरुप्रसादः शिष्य
स्तद्रूपो देवतारूप एवं संप्रकाशत इति यथा देव्या देहे गणेशत्वादि
कं योजितं तथैव शिष्यदेहेपि योजनीयमित्यर्थः कौलिकार्थमुप
संहरति इत्येवं कौलिकार्थस्तु कथितो वीरवन्दित इति। इति शम्भुः
प्रसंगपरिसमाप्तिपरः एवं शम्भुः पूर्वोक्तानुवादपरः शेषं स्पष्टम् क्र
मप्राप्तं सर्वरहस्यार्थमाह तथा सर्वरहस्यार्थं कथयामि तवानघे
इति। तथा शम्भुः पूर्वोक्तार्थप्रकारपरामर्शार्थः सर्वरहस्यार्थं पूर्वो
क्तं सर्वेभ्यो रहस्यपरप्राप्तिरूपत्वात् सर्वरहस्यार्थमेवाह मूलाधारे
तडिद्रूपे वाग्भवाकारतां गते अष्टत्रिंशत्कलायुक्तपञ्चाशद्वर्णवि
ग्रहा विद्याकुण्डलिनीरूपा मण्डलत्रयभेदिनी तडित्कोटिनिभाप्रख्या
विसतन्तुः निराकृतिः व्योमेन्दुमण्डलासक्तास्त्र यास्तातः स्वरूपिणी
सदाद्या भजगत्कर्त्री सदानन्दस्वरूपिणी एषा सा त्वमिति बुद्धिस्तु रह
स्यार्थो महेश्वरीति। मूलाधारे पूर्वोक्तलक्षणे तडिद्रूपे विद्युत्सव
र्णिवर्णवाग्भवाकारतां गते वा वाग्परापश्यन्तीमध्यमावैखरीः ता

भिर्वीणाभिर्भवतीति वाग्भवं त्रिकोणम् तदुक्तं मयैव स्वात्मनः स्फुर
णमिच्छादिक्रियाशक्तिस्तरोहीयं वैखरी विग्रहेच्छन्तेन नदाकारतां
गतेन तद्रूपेण परिणते अष्टात्रिंशत्कलावह्निमायाद्दशसूर्यस्य तां
पिच्छाद्या द्वादश सोमस्यामृताद्याः षोडश कला एवमेता अष्टात्रिंश
त्कलास्ताभिर्युक्तैः पञ्चाशद्वर्णैः रकारादिलकारान्तैर्वह्निकलाभि
र्दशभिर्युक्ता मायाद्या दश वर्णाः सूर्यकलाभिर्द्वादशभिर्युक्ताः
अकारादयः षोडश स्वराः एवमेते पञ्चाशद्वर्णाः विशेयस्याः स्मातः
ष्या सौभाग्यविद्याया अक्षरमन्त्रभेदेन षट्त्रिंशत्तत्त्वरूपिणीति
पूर्वोक्तरीत्या षट्त्रिंशदवयवपञ्चदशाक्षरमयी वैखर्यात्मिका विद्या
र्थकुण्डलिनीरूपा तस्या मध्ये वह्निशिखात्मनायोर्ध्वमवस्थितानी
वारशूकवत्तन्वी पीता भास्वत्यणूपमा निलीना पद्ममध्यस्था विद्यु
ल्लेखेव भास्वरा रश्मिस्तुरीया भुजंगभोगसदृशीत्यतिलिता
मण्डलत्रयभेदिनी मण्डलत्रयमाधारहृदयभ्रूमध्यस्थितानां
वह्निसोमसमण्डलानां त्रयं तद्भेदिनी तत्र यं भित्वा नन्मध्यमार्गेण
कुण्डलं प्रविश्य सुप्तेत्यर्थः तडित्कोटिनिभा प्रत्यग्रतडितां कोटीनां नि
भा सदृशा प्रत्यग्रप्रभा यस्याः सा विसतन्तुनिभाकृतिः विसतन्तव
त्सूक्ष्मरूपा व्योमेन्दुमण्डलास्यकालललाटार्धसमारम्भकपालोर्ध्वी
वसानकम् ध्येयलोर्ध्वशिरोदेशः परव्योम प्रकीर्तितमिति स्वच्छ
न्दसंग्रहोक्तरीत्या परव्योम्नि यदिन्दुमण्डलं चिच्चन्द्रबिंबं तत्रास
क्तास्तथा स्रोतः स्वरूपिणी तद्विगलदमृतप्रवाहरूपा सदा व्याप्त
जगत्कृत्स्नं सदा कालत्रयेऽपि जगत्कृत्स्नं षट्त्रिंशत्तत्त्वात्मकं व्याप्य
यद्यतिशेषः सदानन्दस्वरूपिणी सदानन्दः परशिवः स्वरूपं यस्याः
अस्तीति सदानन्दस्वरूपिणीति एषा चिन्मयी कुण्डलिनी शक्तिः
स्वात्मेति बुद्धिस्तदात्मनया समावेशो रहस्यार्थ इत्यर्थः तदुक्तं वात
शतीशास्त्रे यदुल्लसति शृङ्गाटपीठात्कुटिलरूपिणी शिवार्कमण्डल
भिन्नाद्रावयन्ती न्दुमण्डलम् तदुद्रवामृतस्यन्दपरमानन्दनन्दिता

यो॰ वा॰ टी॰ ३९
38

कुलयोषित्कुलं त्यक्त्वा परं पुरुषमेति सा निर्लक्षणं निर्गुणं च कुल
कूपविवर्जितम् ततः स्वच्छन्दरूपात्तपरिशिष्टजगत्स्थितिम् तेन मा
र्गेण सन्तुष्टा पुनरेकाकिनी सती रमते सेयमस्मत्का त्रिपुराशक्ति
मागतीति क्रमशस्तं महातत्त्वार्थं वक्तुं प्रतिजानीते महातत्त्वार्थ इति
यत्तस्य देवि दास्मि ते । स्पष्टम् महातत्त्वार्थमाह निष्कले परमे सूक्ष्म
क्ष्मे निर्मले भाववर्जितम् आभातीति परे तत्त्वे प्रकाशानन्दविग्रहे
विश्वोत्तीर्णे विश्वमये तत्त्वे स्वात्मनियोजनमिति । निष्कले निरव
यवे कला अवयवाः महत्त्वेऽपि महीयसि परमे सूक्ष्मे अणोरणीयसि
निर्लेपे सकरणेन्द्रियाद्यगोचरे भाववर्जिते भावमागमामतीन्द्रियं च
यत्तस्य मुक्तमिति चिद्गगनचन्द्रिकोक्तरीत्या भावनातीतमप्यवा
भातीति पूर्वोक्तलक्षणं तदतीते परे तत्त्वे सकलतत्त्वातीते सकलत
त्त्वार्थे परमार्थे प्रकाशानन्दविग्रहे प्रकाशो ज्योतिषां ज्योतिरनु
त्तरमानन्दः तौ प्रकाशानन्दौ विग्रहो यस्य विश्वोत्तीर्णे विश्वस्त
लक्षणं तदुत्तीर्णे विश्वमये देशकालपदार्थात्मना यायद्यद्वस्त
यथा तथा तत्तद्रूपेण या भाति तां श्रये संविदं कलामिति श्रीमालि
न्युक्तवचनरीत्या तत्तदात्मतावभासमाने तत्तेन त्वमसीत्युपनिष
द्वाक्यार्थपरमार्थपरविद्याप्रदायकपरशिवरूपनिजगुरुप्रति
बोधितनिर्मलस्वभावे स्वात्मनियोजनं तदेकतानप्रवेशो महात
त्त्वार्थ इत्यर्थः ननु एवंविधलक्षणं स्वात्मतत्त्वं केन प्रमाणेनानुमी
यत इत्यत आह तदा प्रकाशमानं त्वं तेजसां तमसामपि अविनाभा
वरूपं तत्स्मात् द्विष्वसु सर्वं तत इति । यदा स शिवः सर्वप्राणिनां चित्ते
परिस्फुरति तदा आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थे
न इति तन्त्रान्तरोक्तरीत्या तेजसां सूर्यादीनां तमसां घटादीनां तान्य
नां प्रकाशमानं त्वं चित्ते तत्तदात्मनि शिवे प्रथमं परिस्फुरति सम
वेत तदिन्द्रियद्वारा तत्तदर्थानां परिस्फुरणं श्रुतश्रुतिः तमेव भान्त
मनुभाति सर्वमिति तस्मात्सर्वतः सर्वस्य विश्वस्योक्तलक्षणस्यावि

न्ताभावरूपत्वमविनाभवतीत्यविनाभावः कोऽस्यः विश्वमिदं दृश्यमा
पेक्षप्रतीतिकं दृश्यत्वात् यथाऽसंप्रतिपन्नो घटः यद्यदं दृश्यं तत्तद्दृष्ट
ऽपेक्षप्रतीतिकं न भवति यथाऽऽकाशविषाणमित्यन्वयव्यतिरेकलि
ङ्गेनानुमानप्रमाणेनानुमीयत इत्यर्थः अथवाऽलं प्रमाणचिन्तया
त्र प्रमाणानामपि तदनुप्रवेशेनैव प्रमाणत्वात्तेषामपि प्रत्यक्षं वा
प्रयत्नेन साधयितुमलं तस्य स्वप्रकाशत्वादित्याह प्रकाशते महान
न्दविद्याक्रीडारसोज्ज्वल इति । तथा देशकालाकारैरनवच्छिन्नत्वेन प्र
काशते स्वत एव तेन विना न किमपि प्रकाशयितुमलम् तस्यैव प्र
काशेन सर्वाणि प्रकाशन्त इति अत्र श्रुतिः न तत्र भासयते सूर्यो न
शशाङ्को न पावक इति तस्य भासा सर्वमिदं विभातीति च अभियुक्त
वचोऽपि अथवात्मैकतानानामतिरेवात्र साक्षिणी किं प्रमाणवचो
भिस्तु स्वप्रकाशे चिदात्मनि न हि वैकेतनं ज्योतिर्दीपालोकमपेक्षते
इति दिव्यक्रीडारसमुज्ज्वलो दिविभवो दिव्यः परशिवः तस्य क्रीडा विश्व
सर्जनादिव्यवहारक्रिया चिच्छक्तिः तयो रसः सामरस्यं तेनोज्ज्व
लो नित्यशिवशक्तिसामरस्यप्रणयनवृत्तीमाद्देवीत्यर्थः ननु म
हात्तत्त्वार्थज्ञानस्य फलं यागादिकरणमिव देहान्तरदेशान्तरका
लान्तरभाविप्रत्ययं नेत्याह निरस्तसर्वसंकल्पविकल्पस्थितिशीर्ष
कः । हानस्थो महात्मभावः सद्यः प्रत्ययकारक इति । इदमहं करिष्या
मीति मानसं कर्म संकल्पः एवं मया कर्तव्यमेवं नेति कोटिद्वयावल
म्बनं विकल्पः शिवस्यानन्यभावेन तत्त्वावेतौ निरस्तौ विज्ञातमात्रतः
तदुभयनिरासादेव मनसः स्थैर्यं स्थितिं जायते तत्पूर्वीको रहस्यार्थः
कर्मानहीकर्णनाद्योगप्रश्नत एव महात्मभावः न कस्यापि कथितः अत्य
न्तयत्नेन रक्षितः सद्यः प्रत्ययकारकः एतदाकर्णनं शिवोऽहमस्मीति
प्रत्ययः सद्य एव स्यादित्यर्थः ननु यमर्थः क्व स्थितः क्व न वा दृष्टः
किं वा तस्य फलमित्यत आह महात्मनार्णवे दृष्टः शंकरात त्र न यावे
ति विद्यापीठमिवद्ध्वंसस्थितोद्यासिद्धिद इति । विद्यापीठं शि

यो॰हृ॰
टी॰
३०
37

वयोविश्रान्तिस्थानं तत्त्वनिबध्यते ये भुक्तानि निबध्यन्तानि तद्वोयमस्ता
नि वाग्भवकामराजशक्त्याख्यानि बीजानि तेषु विद्यापीठनिबन्धे
षु संस्थितो दिव्यसिद्धिदः अकुले विषुसंज्ञे च मन्त्रोक्तरीत्या बीजत्रि
यशिखरवर्त्ति बिन्द्वर्धचन्द्र रोधिनी नादनादान्त शक्ति व्यापिकास
मनोन्मनानां क्रमेणान्तस्थीयमानेषु उन्मन्यन्ते देशकालानव
च्छिन्नपरचिदात्मकमहातत्त्वार्थः सुस्थितोऽयमर्थः तदुक्तं स्वच्छन्द
संग्रहे या चोक्ता समनाशक्तिस्तदूर्ध्वे उन्मना स्मृता नात्र कालक
लाभानं न तत्त्वं न च देवता सुनिर्वाणं परं शुद्धं रुद्रवक्त्रं तदुच्यते शिव
शक्तिरिति ख्याता निर्विकल्पा निरञ्जना तत्स्थानी तत्र वरारोहे वाङ्म
नोऽतीतगोचरम् सुनिष्कलं च सकलं नीरूपं निर्विकल्पकम् नि
र्द्वन्द्वं परमं तत्त्वं शिवाख्यं परमं पदमिति दिव्यतन्मनस्यन्ते निरस्तनिखिल
क्रमे महाशून्ये भवतीति दिव्यः परमेश्वरः सर्वोत्कृष्टसुसिद्धिः स्वाभे
दे नैव रिक्तानंततलक्षणां परमप्रयोजनं ददातीति दिव्यसिद्धिदः महा
ज्ञानार्णवे दृष्टः तादृशः परमशिवसमाधिरेव महाज्ञानेन देवाणि
वः निरन्तरगायन्परामृतनपरिपूर्णत्वात् तस्मिन् दृष्टः शिवोऽहंभावभा
वनया भावितः कोऽस्य अयं परमशिवप्राप्तिः लक्षणो महातत्त्वार्थः
सौभाग्यविद्याबीजत्रयशिखरवर्त्तिन्मन्यवसाने भूमाववस्थितः
तथाविधोफलदो मयान्निसं समाधिदशायां निरीक्षन्ते अत्र तत्त्वा
र्थे शंका त्वया न कार्या यथार्थदर्शी यथार्थवादी अत्राह त
त्त्वार्थमहागुणः इत्युक्तं तर्हि कीदृशैर्लभ्यत इत्यत आह कौलाचार
परैर्देवी पादुकाभावनापरैः योगिनीमीलनायुक्तैः प्राप्तसिद्ध्याभिषे
चनैः शंकाकलंकविगतैः सदा मुदितमानसैः पारंपर्येण विज्ञा
तरहस्यार्थविशारदैः । लभ्यत इति कुलशरीरं महाप्रयोजनं दे
ह तया तेषां येषां ते कौलाः तदुक्तं स्वच्छन्दसंग्रहे कुलज्ञानमतो वक्ष्ये
कौलिकानां हिताय वै यस्य विज्ञानमात्रेण योगिनो मायया योगि
नः सुगमाः सिद्धयः सर्वा भवन्ति सकलाः प्रिये शरीरं कुलमित्यु

क्रमितितेषामथादरः सर्वेषामपिशिष्याणां दीक्षितानामपिप्रिये
सर्वावस्थागतानां च स्वाचारणमतं स्मृतम् गुरुभक्तिप्रशान्तिश्च कृत्स्ना
श्रद्धा स्वमाकृतिः इति स्वच्छन्दसंग्रहोक्तरीत्या परमयाचारपरैः पादु
काभावनापरैः स्वप्रकाशशिवमूर्तिरेकिका तद्विमर्शतनुरेकि
कातयोः सामरस्यवपुरिष्यते परापादुकापरशिवात्मनेत्युरीतिम
स्मस्तउक्तरीत्या प्रकाशविमर्शतत्समष्टितया श्रीगुरुपादुकानु
न्तुभावनापरैः योगिनीमेलनोत्सुकैः यत्रयत्रमिलितामरीवय
स्तत्रतत्रविभुरेवजृम्भते तस्मात्तांहिनियमावलंवनध्यानपूजन
कथाविरुद्धवनेति प्रमाणवचनोक्तरीत्या मातृमानमेयसंविदो
योगिन्यस्तासां मेलनं अन्तर्मुखीभावेन परप्रमातृविश्रान्तिरोत
सुकैः अथ वा वाह्यमेलापचक्रकाचनार्थं समयिकशक्तिचक्रमे
लनं योगिनीमेलनं श्रावदिष्याभिषेचनैः लब्धपरशिवप्रायगुरु
वराभिमन्त्रितचिद्रसमयकलशसलिलसेकैः ततः प्रक्षालित
मलमयपाशैः अतएव शशाकलंकविगतैः इन्दुभवेन्नैवमनव
धारणं शशांकस्यैव कलंकः मालिन्यहेतुत्वात्तस्माद्विगतैः अतए
वसदामुदितमानसैः मेयावरणविगमाद्यथार्थवैः स्वरूपं परि
स्फुरति तच्चामलपाशविगमात्मदैवेषामनसि प्रमोदलक्षणं
परशिवरूपं प्रकाशते तैरित्यर्थः पारंपर्येणविज्ञातरहस्यार्थैर्वि
शारदैः लभ्यतेशिवादिगुरुपर्यन्तपरम्परयाविदितसकलरह
स्यार्थपर्यालोचनयापट्टमितिभिर्महात्मभिर्वाप्यर्थो लभ्यत इत्यर्थः
कौलाचारपरैरित्याद्युक्तगुणविहीनैरयमर्थो लभ्यत इति शपथपूर्
वमाह नासत्यादेवितांमत्तोलभन्तेरमस्रन्दीति सत्यम्। ननु मालि
गुरुपारंपर्यक्रमः पुस्तकपाठादिनावगम्यतिवलनाकिञ्चित्स्वात्मप्र
विज्ञानेनगवितास्तेषामसमयलोपेन संकेततः परिज्ञानं सम्पादयितुं
शक्यतइत्यत आह पारंपर्यविहीना येज्ञानमात्रेण गर्विताः तेषांस
मयलोपेन विकुर्वन्ति मरीचय इति। ये पारंपर्यविहीनाः शास्त्रमु।

यो॰
टी॰
३८
38

मन्त्रिवलेनकिञ्चिन्मात्रपरिज्ञानगर्विताःसमयःसाद्वंतनदथःशक्ति
रिमादिसमयशास्त्रविहितसकलमन्त्रान्तरमेकेनपरिज्ञानाभ्युपगा
रणादिक्रमणादिक्रमलोपेनविकुर्वन्ति मरीचयःसर्वपीठनिवासि
न्यःसर्वगात्रस्थिन्मरीचयःभैरवोभविताकारावलन्नाकुलमातरइ
तिप्रामाणिकवचनोक्तरीत्याब्राह्म्याद्याडाकिन्याद्याश्चतद्दिव्या
नदेवताविकुर्वन्तिविकारंकुर्वन्तिस्वस्वथानूदेकविरूपजननेनते
षांदेहंनाशयन्तीत्यर्थः ननुकस्मिन्दिनेकस्मिन्नक्षत्रेकस्मिन्वारे
कौलाचारक्रमेणयोगिनीमीलनंकार्यमित्यतआह यस्तुदिव्यर
सास्वादमोदमानविमर्शनः देवतातिथिनक्षत्रवारेष्वपिविवस्वतः
मरीचीन्प्रीणयन्नेवकारणानन्दघूर्णितइति । यस्तुकौलिका
चारपरोयोगिनीदिव्यरसास्वादमोदमानविमर्शनःदिव्यपरोगा
न्निभवतीतिदिव्यःपरशिवस्तेनरसःसामरस्यंतस्यास्वादोनुभ
वस्तेनमोदमानविमर्शनःविमर्शनंमनोवृत्तिर्यस्यसःअथवाप
रशिवकेपरामर्शपरिस्फुरदकृत्रिमानन्दकेवलःपश्चात्कार
णानन्दघूर्णितःस्वस्वमार्गोक्तविशुद्धिंविधायपरामृतभूतयाम
दिरयासंपादितानन्दोयोगिनीदेवतातिथीचतुर्दश्यष्टम्योपुष्यंन
क्षत्रंदेवतानक्षत्रंश्रवेत्रेववदन्ति निर्मशुभादिनेवारेसौरेचपरमेश्व
रिगौरीदिनेस्वनक्षत्रेचतुर्दश्यष्टमीषुचवक्रपूजाविशेषेणयोगि॰
नीनांसमाचरेदिति मरीचीन्प्रीणयन्नेवमरीचीन्तुकरूपाश्चिन्म
रीचीन्प्रीणयन्नेवतर्पयन्नेवएवकारोयोगमवच्छेदनपरउक्तका
लेषुसर्वत्रयोयोगिनीप्रीणनंकुर्यात्तस्यैवात्रसमवायोभवेदित्यर्थः
सर्वदाचविशेषेणलभतेशूणिवायतनमिति । कालविशेषकथनं
नैमित्तिकपूजार्थोतनार्थम् सर्वदाप्रसङ्गहमरीचिप्रीणनंकुर्यादेव
एवकारेणायमन्वयः निमर्चनाकरणेप्रसवायोत्स्नीतितात्पर्यम् नि
मार्चनायांतत्रायांमासनांसावृत्तिक्रमादिति स्वच्छन्दसंग्रहेकरी
साप्रायश्चित्तस्यकर्तव्यत्वविधानात् प्रकरणेप्रसवायएवभवति

करणेनफलमस्तीत्याह तमिति पूर्णबोधनमिति पूर्णबोधोत्र
विषयबोधलक्षणः स्वात्मशंभुरेवतिष्ठतेनिशमित्यस्यतुङ्करी
त्यानिरावरणचिद्रूपात्स्वात्मशंभुत्वंप्राप्नोतीत्यर्थः नतु पूर्णबोध
भावः केनकाक्रियताकालेनकेकात्संप्राप्यतइत्यतआह एवं
भावस्तुदेवेशिदैशिकेन्द्रप्रसादतः महाज्ञानमयोदेविसद्यःसं
प्राप्यतेनरैरिति । एवंभावःपूर्णबोधत्वंदैशिकेन्द्रप्रसादतः य
स्यगुरुणाकटाक्षपातेनपाशजालंविच्छिद्यतेसएवपरशिवः केव
लोदैशिकेन्द्रस्तत्प्रसादतः स्वप्रकाशवपुषः गुरुःशिवोयःप्रसी
दति पदार्थमस्तकेतत्प्रसादमितितत्पशोधनेप्राप्यमोदमुप
याति भावुकइत्यस्यतुङ्करीत्यात्वत्प्रसादग्रहणेनमहाज्ञानम
यनिरावरणचिन्मयः कौलाचारैपरैरित्यादि पूर्वोक्तविशेषण
विशेषितैः सद्योदैशिकेन्द्रप्रसादसमवाप्तिसमयएवसंप्राप्य
तेमंत्रसंकेतरूपंसहरति एवमेतत्परंज्ञानंविद्यागमगोचर
म् देविगुह्यप्रियेणैवव्याख्यातंतुरीयषड्विधम् सद्योयस्यप्रबोधेन
वीरचक्रेश्वरोभवेदिति । एवमुक्तप्रकारेणैतत्परंपरिपूर्णबोध
लक्षणंपरशिवतत्त्वपदंज्ञानंविद्यायाःश्रुतेः वर्णाःपञ्चदशात
एवागमागमहार्थबोधकत्वात् तद्गोचरंतदर्थतयाव्याख्यातंयद्
तात्रिविधप्रकारोभवेदित्यारभ्येतत्पर्यन्तेनश्लोकएतेनषड्विधोभा
वार्थः संप्रदायार्थइत्यादिनाप्रतिपादितषट्प्रकारः देविप्रका
शविमर्शसामरस्यरूपेपरशिवेतुरंगदैशिकेन्द्रकटाक्षपात
विहीनेरप्राप्यस्वरूपंसद्योयस्यप्रबोधेनषड्विधार्थस्यबोधन
वीरचक्रेश्वरोभवेत् इदन्ताहंकारहमिरणंगेनप्रलयप्रतिपाद
नपराबीजात्मचिद्भावचक्रेसम्यग्हस्तस्येश्वरःपरशिवः पूर्वोक्तषड्वि
धार्थविज्ञानसमयएवपरशिवोभवेदित्यर्थः । इतिश्रीमत्परा
महंसपरिव्राजकाचार्यश्रीपुण्यानन्दशिष्यामृतानन्दयोगिप्र
वरविरचितायांयोगिनीहृदयदीपिकायांमंत्रसंकेतोनामद्वितीयः

पटलः २ क्रमप्राप्तं पूजासंकेतं वक्तुं प्रतिजानीते पूजासंकेतमधु
नाकथयामि तवानघ इति । स्फुटम् श्रोतृप्रवृत्तये फलमाह यः
स्य प्रबोधमात्रेण जीवन्मुक्तः प्रमोदत इति । यस्य पूजासंकेतस्य प्र
बोधमात्रेण परादित्रिविभेदतः केवलपरिज्ञानेनैव जीवन्मुक्तः
जीवन्नेव मुक्तः सच्छिवोहमस्मीति प्रमोदते परशिवाहन्तामि
लिरेव प्रमोदहेतुः पूजासंकेतमारभते तत्र निसर्गोदिता पूजा त्रि
भिर्भेदैर्व्यवस्थितेति । प्रकाशात्मनो मम विमर्शशक्तेः विमर्शा
रूपिण्यास्तत्र निसर्गोदिता पूजा नित्यप्रत्यहं समुदिता विहिता त्रि
भिर्भेदैर्व्यवस्थिता पूजानामान्याह परा चाप्यपरा गौरि तृतीया च
परापरा इति । प्रथमा पूजा परा तत्र मा उच्यते परशिवाद्वैतप्रथाप्रा
पकत्वात् इतरपूजाभ्यामुत्तमा तदुक्तं संकेतपद्धतौ स्नानार्घ्य
पुष्पादिद्रव्यैर्या विहिता निशम्य सैव महिम्ना द्वैधाद्यैस्त्रिसा पूजा
परा स्थितिरिति अपरा द्वितीया पूजा भेदप्रसरा बालचक्रावरण
देवतारूपात्प्रथमानपूजावाह्यमादिवचनात् तृतीया पूजा परापरा वा
ऽस्मान्तरेयाम्बिप्रदृष्टयचिन्तयभावनामयीमध्यमा परापरात्म
कत्वात् तासां लक्षणानि क्रमेणाह प्रथमाद्वैतभावस्या सर्वप्रव
र गोचरेति । आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेने
ति पूर्वोक्तपरिपाट्या सर्वेषामिन्द्रियाणां ये व्यापारास्तेषां गोच
रीभूतः कोऽर्थः यत्र यत्र मनो याति बाह्ये वाभ्यन्तरेऽप्रिये तत्र तत्रा
परावस्थाव्यापकत्वात्तया प्रस्फितं तत्र यातुमार्गेण चेतसंभज्य
ते प्रभोः तत्पतन्मात्ररूपत्वात् खिलया द्राविता स्थितिरिति विज्ञान
भट्टारकोक्तरीत्या बाह्यस्य विलयलक्षणाद्वैतप्रथा परा पूजेत्यर्थः
द्वितीया चक्रपूजा च सर्वदा निष्पाद्यते मयेति । द्वितीया अपरापू
जा चक्रे रश्म्यादि बैन्दवान्तः श्रीचक्रपदनिवासावरणदेवतानां
मतो परा पूजेत्यर्थः सदा निष्पाद्यते मया सदा प्रत्यहं सर्वदैव नापि
मया निष्पाद्यते क्रियते प्रबोधकत्वात् अभेदप्रतीतेः तथाप्यपरा

ज्ञानदा सर्वैरपि ज्ञानिभिः कार्य इत्यर्थः अस्याद्वैतप्रसक्तप्रतिषेधः
स्यात् न वा तदाशङ्क्य तदुक्तं तन्त्रालोके लब्धरूपं क्वचित्किञ्चित्ताद
गेव निषिध्यते विधानमन्तरेणातो निषेधस्यैव संभव इति परा
परापूजामाह एवं ज्ञानमये देवि विततीयाद्वयप्रथामयीति । एवं
ज्ञानमये पूर्वोक्ताद्वैतभावनामये याद्वयप्रथामयी वा सा स्या
दृश्यगावरणविनष्टाशावस्थाविवज्ञानमवताविश्रान्तिरूपेति ।
या परापरापूजा तदुक्तमभियुक्तैः प्रकाशैकघनो यान्निर्विक
ल्पाद्यसवादिकान् निहितपाशस्पर्शनष्टाशावस्थाविवर्जिताकृती
विति पूजाविधानमाह उत्तमा सा परा ज्ञेया विधानेष्टगुणसंप्रता
मिति । परापूजा उत्तमस्य कथनादपरापरापरयोरधमत्वमध्यम
त्वे चोपलक्षयति सा ज्ञेया ज्ञानं यया ज्ञानेन कार्या अपरापूजा पश्चा
द्वक्ष्यते अस्य ज्ञेयत्वात्परत्वमतएव चोत्तमत्वं चेत्यर्थः संप्रति ज्ञेया
याः पूजाया विधानेष्वष्टगुणविधानमेव वृणोति महापद्मवनान्तः
स्थे वाग्भवे गुरुपादुकाम् आप्यायितजगद्रूपां परमामृतवर्षिणी
म् सञ्चिन्तयेदिति । महापद्मवनस्याधोमुखमितसहस्रदलाकु
लकमलापरदलैराकुलत्वाद्वनमिति तदुक्तं स्वच्छन्दसंग्रहे या
वाहूर्ध्वकुलपद्मं सहस्रारमधोमुखम् ध्यात्वा निष्कलासक्तमध्यम्वा
ङ्ख्यशक्तिकम् व्यापिनी केवला शश्वदमृतौघप्रवर्षिणी महा
पद्मवनं चैवं समनान्तस्योपरीति तस्यान्तःकर्णिकामध्ये तत्
स्थे वाग्भवरूपिणि पूर्वोक्तकरी सा वाचः परापश्यन्ती मध्यमा वैख
र्यो भवन्त्यस्मादिति वाग्भवं त्रिकोणं तत्र गुरुपादुकां शृणोति तत्र
मात्मीयमित्यादि पूर्वोक्ताभियुक्तवचनोक्तरीत्या विमर्शरूपः परा
मर्शिशिवस्य स्वप्रकाशा शिवमूर्तिरेकिकोऽसम्बद्धकरी सा त्रिभेदवती
आप्यायितचराचरां परमामृतवर्षिणीं निरन्तरनिर्विवादविद्रसामृ
तवर्षिणीं सञ्चिन्त्यात्मतया विचिन्त्य गुरुपादुकापरामर्शेन न्तर
मान्तरमेव प्रसादस्वीकारमाह परमाद्वैतभावनामदघूर्णितस्तु ति

परमः परशिवेक्ष्येनाद्वैतभावनामोहमस्मीति समावेशरूपा सैव म
दैरसंबंधेन मदहेतुत्वात् तत्कृतेन मदेन घूर्णितः मदितः स्वप्रकाशाव
बोधात् हर्षितादिश्च स्तुङ्करीमायपरशिवाद्वैतभावनालक्षणगुरुप्र
सादस्वीकारप्रोल्लसत्परमानन्दपरवशः इत्यर्थः प्रसादस्वीकारानन्त
रमानन्तरं जपमेवाह दहरान्तरसंसर्पणाद्वालोकनततत्परइति । द
हरं वियदंबरं वेश्मस्मृ तस्य पुण्डरीकपुरमध्यसंस्थितमिति दह
रोस्मिन्नन्तराकाश इति श्रुत्या हृदयाब्जमध्यगतमाकाशं दहरमित्युच्य
ते दहरमेव दहरं तदन्तरे संसर्पणाद्वा दहरान्तरसंसर्पणाद्व
स्यालोकनं विभावनं तत्र तत्परः तदेकमभियुक्तः शानन्दलक्षण
मनाहतनाम्नि देशेनादात्मकापरिणतं तत्र रूपमीशो प्रत्यङ्गस्त
ब्धिनमनसा परिचीयमानं शंसन्निनेत्रमलिलैः पुलकैश्चयथामा
इति संयमेन्द्रियसञ्चारं प्राणस्वादमन्तरम् एवमेव जपः प्रो
क्तो न त्वबाह्यजपो जपइत्यभियुक्तवचनोक्तरीत्या स्वात्मनादानुस
न्धानलक्षणं जपं कुर्यात् न तु नानाविधोच्चारणलक्षणं बाह्यज
पं कुर्यादित्याह विकल्परूपसंजल्पविप्लवइति । विकल्परूपा
णां नानाविधरूपाणां मन्त्राणां संजल्पउच्चारस्तल्लक्षणजपवि
प्लवः जपातीतः स्वयं नादो मन्त्रात्मा जपईरितइति तादृशमपि
ध्यानं कुर्यादित्याह अन्तर्भावसमेति । तत्र प्रत्ययैकतानाध्यानमिति
योगशास्त्रोक्तरीत्या विजातीयप्रत्ययान्तरितसजातीयप्रत्यय
प्रवाहलक्षणोध्यानेन सदाप्राप्तान्तःस्फुरितेनान्तर्भावः परशि
वोपरीभूयादित्यर्थः तदुक्तं विज्ञानभैरवे ध्यानं यानिष्कलाचि
न्तानिराकारानिराश्रया न तु ध्यानं शरीराक्षमुखहस्तादिकल्प
नेति विकल्पोल्लासदलितसंकोचसन्ततिसान्द्रइति । विद्बु
द्धिमहाभगाभिन्नसंकोचसन्तरस्समस्तुङ्करीमायपरिकलितसूर्पण
भावः अतएवातिसान्द्रः महात्रिपुरसुन्दरीनामधेयपरिचितकलो
लासास्पदपरमसुन्दरैवमासादपरशिवाभिन्नइत्यर्थः इनामधे

तादृशीं कुर्यादित्याह इन्द्रियप्रीणनैर्देव्यै विहितस्यात्मपूजनम् इति ।
इन्द्रियाणि श्रोत्रादीनि तेषां प्रीणनानि इष्टानि विशिष्टशब्दस्प
र्शरूपरसगन्धवन्ति तैः विहितं स्यात् मदेवतया पूजनं यत्तेन मत्ता
त्वाविधः तदुक्तं कुलाम्नायरहस्यविधौ इन्द्रियद्वारसंग्राह्यैर्गन्धा
द्यैरात्मदेवताम् स्वभावेन समाराध्य ज्ञाताऽसौ सोऽयं महाभव इति ज
ग्धिपानकृतोल्लासरसानन्दविजृम्भणात् भावयेद्भरितावस्थां
महानन्दस्ततो भवेदिति विज्ञानभट्टारके करणीया श्रोत्रादीन्द्रि
यविषयग्राह्यानुभवजनितानन्दानां महानन्देन समीरसीकर
णेन पूजनमर्थः अथ परां पूजां वक्तुं तदङ्गभूतं षोढान्यासमाह न्या
सं निर्वर्तयेद्देहे षोढान्यासपुरस्सरं इति । षोढान्यासपुरस्सरेण त
भिस्तु चिन्तितैर्देहे निगद्यत इति शेषः षोढा षट्प्रकारको न्यासः ता
न्प्रकारमाह गणेशः प्रथमो न्यासो द्वितीयस्तु ग्रहैर्मतः नक्षत्रैस्तु
तृतीयः स्याद्योगिनीभिश्चतुर्थकः राशिभिः पञ्चमो न्यासः षष्ठः
पीठैः निगद्यत इति । न्यासं न्यासजातं ज्ञात्वैकवचनं निर्वर्तये
दिति शेषः षोढा षट्प्रकारन्यासमाहात्म्यफलमाह षोढान्या
सस्तु संप्रोक्ताः सर्वत्रैवापराजितः एवं यो न्यस्तगात्रस्तु संपूज्यः स
र्वयोगिभिः नास्य स्पृष्टा लोकेऽपि मातरस्त्रिजगतः एवं वश्यः स
र्वेषां स स्वयं परमेश्वरः षोढान्यासविहीनं यं प्रणमेद्देवपार्वति ।
स चिरान्मृत्युमाप्नोति नरकं प्रतिपद्यत इति । प्रोक्ताय षोढान्या
सः सर्वत्र सर्वलोकेष्वपि अपराजितः अप्रतिहतसामर्थ्यात् द्विप्र
काशवान्स्वयमेव परमेश्वरः अत एव लोकेषु जनेषु स एव योगिभिः
पूज्यः किं वक्तव्यं सर्वेषां अपि पूज्यः नास्य स्पृष्टः कोटिलोके अस्ति
यदि वेदेषु बलादृष्टः प्रणमयति सोऽमृतो भवेन्नरकं च प्रतिपद्यत
इत्यर्थः षोढान्यासप्रकारं वक्तुं प्रतिजानीते षोढान्यासप्रकारं च ।
कथयामि तवानघे इति । स्पष्टम् तत्प्रकारमाह विघ्नेशो विघ्नराज
श्च विनायकः शिवोत्तमो विघ्नहृद्विघ्नकर्ता च गणनायक एव च एकद

नोच्छिष्टश्च गजवक्त्रो निरञ्जनः कपर्दवान्दीर्घमुखः शंकुकर्णो वृष
ध्वजः गणनाथो गजेन्द्रश्च शूर्पकर्णस्त्रिलोचनः लंबोदरो महानादश्च
तुर्मूर्तिः सदाशिवः आमोदो दुर्मुखश्चैव सुमुखश्च प्रमोदकः एकपादो
द्विजिह्वश्च शूरवीरश्च षण्मुखः वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः
सेनानीर्ग्रामणीर्मत्तो विमत्तो मत्तवाहनः जटी मुण्डी तथा खड्गी वरे
ण्यो वृषकेतनः भक्तिप्रियो गणेशश्च मेघनादो गणेश्वर इति । नामे
तानि तावद्व्याख्येयानीति तेषां ध्यानमाह तरुणारुणसंकाशान्गजे
वक्त्रांस्त्रिलोचनान् पाशाङ्कुशवराभीतिहस्ताञ्छक्तिसमन्वितानिति ।
तरुणारुणसवर्णान् गजवक्त्रमिव वक्त्रं येषां ते गजवक्त्रास्तान् ऊर्ध्वक
रयोः पाशाङ्कुशौ अधः करयोः वराभयदर्शनात् षडक्षरादिभिः समन्वि
तान् अत्र सूचितानां नामामागमान्तरपठितेति चोक्तत्वान्नवदामः
मासः स्थानमाह एतांस्तु विमृशेद्देवि मातृकास्थानवस्थितानिति ।
एतान्गणेशान् मातृकान्यासस्थानेषु मातृकावैखरीन्यासस्थाने
षु मृशेदित्यर्थः तद्विन्यासमाह । स्वरैर्लसहितं सूर्यहृदयाय च षवि
मृशेत बिन्दुस्थाने तथा सूक्ष्मतियादिवर्णचतुष्टये: भ्रूमध्ये लोचनद्वन्द्वे क
वर्गाधिपतिप्रिये हृदये विमृशेत् कुङ्कुं चवर्गादिपतिं प्रिये नाभौ शने ।
श्चरं चैव पवर्गेशं स्मरेत्प्रिये वक्त्रमादिचतुर्वर्णैः सहितं गाऊमेव च द्वौ
कारसहितं हेतं पादौ देवेशि विमृशेदिति । स्वैरेरकारादिविसर्गा
न्तैः षोडशभिः सहितेन नाम्नादौ सूर्यहृदयायो विमृशेत् बिन्दुस्थाने
ललाटे अत्रैवोक्तदीपाकारो ध्रुमात्रश्च ललाटेन्दुतद्धते इत्यादिना
तथा सतिं चन्द्रमसं यादिवर्णचतुष्टये हरले वै विमृशेदित्यर्थः भ्रूम
ध्ये सवेरकं लोचनद्वन्द्वे कवर्गस्याधिपतिमधिपतिं विमृशेत् हृदये
वत्समिमथुमन्मथमादौ देवेशि विमृशेदित्यन्तेन नवत्र्याणस्थानानि न्या
सं चाह ललाटे दक्षनेत्रे च वामे कर्णद्वये पुनः पुटयोर्नासिकायाश्च
कण्ठस्कन्दद्वये पुनः पश्चात्कर्परयुग्मे च मणिबन्धद्वये तथा हस्तयो
र्नाभिदेशे च कटिबन्धे ततः परम् ऊरुयुग्मे तथा जान्वोर्लम्बद्वये च पद

हृदयम् ज्वलत्कालानलप्रख्या वरदाभयपाणयः नतिपाणयोऽम्बिनीश्वरीः
सर्वाभरणभूषिता एतास्त्वि मले देवि स्थाने ष्वष्टस्वरार्चिता इति । क
टिवक्त्र इति कटिवक्त्रयोरिति हृत्पद्मपरिभ्रमण्यास्समविंशति संख्यानघट
नेकर्णिहृदय इति दक्षिणादितः इत्तनेत्र वामे चेतिक्रमस्योपक्रान्तत्वात्
वरदाभयपाणयः नतिपाणय इत्युक्त्वा वाऽऽवृत्तवृषयंगम्यतेशेषं स्वागम
म् योगिनीन्यासमाह विशुद्धौ हृदये नाभौ स्वाधिष्ठाने च मूलके आज्ञा
यां धातुनाथाश्च मलकाभादिदेवताः अमृतादियुताः सम्यग् नेव
स्मरेन्म्रशीति । विशुद्धौ तालमूले धातवस्त्वगसृङ्मांसमेदोऽस्थिसंस्ता
शुक्राणि तेषां नाथाः स्वामिनो डादिदेवताः डाकिनी राकिणी लाकिनी
काकिनी शाकिनी हाकिन्यः अमृतादियुताः स्वच्छन्दसंग्रहोक्ता यथा
अमृता प्रथमा देवि द्वितीया कर्षिणी मता इन्द्राणी तु तृतीया स्यादी
शानी च चतुर्थिका पंचमी स्यादुमा देवि षष्ठी चैवोर्ध्वकेशिनी स
प्तमी ऋद्धिका प्रोक्ता ऋद्धा चाष्टमिकी मता लूकाननवमिका प्रो
क्ता लृषा स्यादशमी मता एकादशी तिसा चैकपादा द्वादशिका शि
वे ऐश्वर्याभिरतापश्चादोंकारी तु त्रयोदशी चतुर्दश्यौषधा न्मास्वाप
न्वेपिक दशात्मिका षोडशी त्ववन्तरा देवि प्रोक्ताः षोडशकण्ठगाः का
लरात्री च रोती नागायत्री च ततः परम् चण्डायारी च नारणिमाचन्द्र
च्छायाजयापि च ॐकारी त्वाननरूपा च टंकहस्ता ततः परम् ठंकारी
द्वादशा खेला द्वादशारे समर्चयेत् डामरी चैव फंकारी णामिनी ताम
सी तथा थान्त्रा दान्ता यूणी धात्री क्रिया नाद्या च पार्वती फेंकारी दश
पत्रे भुवर्चादी शान्ति समर्चयेदिति वन्यनी भद्रकालीति महामाया यश
स्विनी रक्तालंबोष्ठिका चैव पूजयेत्क्रमशः प्रिये इति चतुष्पत्रे च देवे
शि वरदा च श्रियं तथा षंसा सरस्वती चैव पूजयेत्क्रमशः शिवे इति
हमा हंसवती चैव पूजये द्विपत्रके इति एताभिः शक्तिभिर्युक्ता ध्या
तव्या स्मरेच्छरीति न्यासं निर्वर्त्य वै मातरोप्यात्मा अपीत्यर्थः ध्या
नं निर्वर्त्य अन्तरोन्मासरूपार्थः ध्यानेनागमान्तरादवगन्तव्यम्

राशिमासमाह पादे लिंगे च कुक्षौ च हृदये वा कुमूलके दक्षिणांसपार्श्वमार
भ्य वामपार्श्वावसानकम् मेषादिराशयो वर्णैः न्यस्तव्याः सह पार्वतीति
पादादिस्थानेषु दक्षिणादितो वामान्तं मेषादिराशयः वर्णैर्मातृकाद्य
ैः सह न्यस्तव्याः राशीनां वर्णा आगमान्तरसंवादान्नियोज्यन्ते आद्यैश्च
तुर्भिः सहितो मेषो दक्षपदे स्वरैः उकाराद्यैस्त्रिभिर्वर्णैर्वृषभो लिंगद
क्षिणे ऋकाराद्यैस्त्रिभिर्वर्णैर्मिथुनं कुक्षिदक्षिणे ऐऔभ्यां सहितः सिं
हो दक्षिणे वा कुमूलके अंअः शवर्गेतः कन्यापि वा दक्षिणभागतः
कवर्गेण तुला मूर्ध्नि वामे तु वा कुमूलके वृश्चिकश्च चवर्गेण टवर्गेण ध
नुर्हृदि वामे तवर्गसंयुक्तो मकरः कटिवामतः पवर्गेण युतः कुम्भो वा
मे लिंगप्रदेशतः यवर्गाद्यन्तसंयुक्तो मीनः स्याद्वामपादके इति पी
ठन्यासमाह पीठानि विन्यसेद्देवि मातृकास्थानके प्रिये । मातृका
स्थानक इति जातावेकवचनं वैखरीवर्णस्थानेष्वित्यर्थः तेषां नामा
नि कथ्यन्ते शृणु सावहिता प्रिये इति । वक्तव्यापीठनाम्नां यान्नमस्य
कृतानां वा यथा नाम भवेत्यर्थः तन्नामान्याह कामरूपं वाराणसीं नेपा
लं पौण्ड्रवर्धनः पुरस्थिरं कन्यकुब्जं पूर्णशैलं तथार्बुदम् आम्रातके
श्वरैकाम्रं त्रिस्रोतः कामकोटकम् कैलासं भृगुनगरं केदारं चन्द्रपु
करम् श्रीपीठमेकवीरं च जालांध्रं मालवं तथा कुलान्तं देविकोटं च
गोकर्णं मारुतेश्वरम् अट्टहासं च विरजं राजगृहं महापथम् कोला
पुरमलापुरं एकारं च जयन्तिका उज्जयिन्यपि चित्राख्या क्षीरकं हस्तिना
पुरम् उड्डीशं च प्रयागाख्यं षष्ठीमायापुरी तथा जलेशं मलयं शैलं मे
रुं गिरिवरं तथा माहेन्द्रं वामनं चैव हिरण्यपुरमेव च महालक्ष्मीपुरो
ड्याणं छायाछत्रमतः परम् एते पीठाः समुद्दिष्टाः मातृकारूपकाः स्थि
ता इति । मातृकारूपकाः स्थिताः पीठा मातृकारूपा येषां ते मातृकारू
पकाः क्रमेणादिक्षान्तानामेकैकवर्णरूपकैकस्थानाच्च युक्तास्तत्तत्स्था
नेषु पीठानां न्यासं कुर्यादित्याह षोढान्यासान्तरमव्ययंप्रभावित्वात्
श्रीचक्रन्यासस्य तद्विधानं श्रीचक्रन्यासमाह एवं षोढां पुराकृत्वा श्री

चक्रन्यासं समाचरेदिति। एवमुक्तप्रकारेण षोढा षट्प्रकारं न्यासं कृ
त्वा श्रीचक्रन्यासं समाचरेदित्यर्थः श्रीचक्रन्यासस्य महाप्रयोजनमप्यक
थितमपि अथ प्रियायै कथयामीत्याह श्रीमत्त्रिपुरसुन्दर्याश्चक्रन्यास
शृणु प्रिये यन्न कस्यचिदाख्यातं तत्त्वशुद्धिकरं परमिति। आनन्दकण
भितार्थशब्दस्पर्शादिपञ्चकृत्त्वेन प्रकटत्वविरतं येन तदादिष्टाविद्धविग्रहा उ
पाभिरुक्तवचनोक्तरीत्या न्यासकोचलत्वेन दारिद्र्यनिवर्तिनी परिष्कृणीया
ग्रहरूपा संविष्टीरितिसच्यते तदुक्तौ त्रिपुरसुन्दरी त्रिभुवनेश्वरीय रूपत्वात्
संकुचितभेदलक्षणप्रपंचापरपर्यायपरमदौर्भाग्यपरिपन्थिपरमा
द्वैतसौभाग्यपदादिरूपा सर्वप्राणिस्वात्मतयापरप्रेमास्पदीभूतापरा
चित्कला तस्याः चक्रशिवादिदितिपर्यन्ततत्त्वचक्रमयं तदविनाभावभूमिः
तस्या न्यासं शृणु प्रिये मम प्रियायै ममैकरसलालसायै कथयामि
यन्न कस्यचिदाख्यातमिति रहस्यत्वात् तत्त्वशुद्धिकरं परं तत्त्वोः षट्त्रिं
शततत्त्वात्मनः शुद्धिं परविमर्शावसानलक्षणं करोति अत एव परमुत्कृ
ष्टमिति तन्न्यासेभ्यः श्रीचक्रन्यासप्रकारमाह वत्तरश्चादिरेखायै नम
इत्यादितो न्यसेत दहनाममध्याप्रतिस्फिक्कपादांगुलीषु वामाङ्घ्रि
गुलिषु स्फिके पादे वामदक्षके मत्तृतिमूलदक्षेषु व्यापकत्वेन सु
न्दरीति। वत्तरश्चादिरेखायै नमइत्याद्या मन्त्रेणादितो दहनास्याङ्गादिषु
लिष्टष्ठान्तस्थानेषु दशसु व्यापकत्वेन न्यसेत् दहनास्याष्टष्ठपसाङ्गा
ग्रः सप्तलिमूलेति मूलं शिरसः पुरस्ताङ्ग्रागः स्फिक्क सृक् सन्धिपृष्ठ
ममेत पञ्चस्थानेषु प्रमत्तव्याः शक्तीराह सैवस्थानदशकेषु सर्वाणिमा
द्यादशा न्यसेत सिद्धीरिति। अणिमा लघिमा महिमेशित्व प्राकाम्य भुक्ति
च्छा प्राप्तिसर्वकामाख्याः सिद्धयो दश वत्तरश्च मध्यरेखायां व्यापकमा
ह। तदन्तश्च तत्तु व्यापकत्वेन सुन्दरि वत्तरश्च मध्यरेखायै नम इति वि
न्यसेदिति। तदन्तः सिद्धिस्थानानामन्तर्देशे वत्तर्दशी वत्तरश्च मध्य
रेखायै नम इत्यादि मन्त्रेणानु व्यापकत्वेन विन्यसेदित्यर्थः वत्तरश्च
मध्यरेखायां मन्त्रव्याः शक्तीराह तस्यास्थानेषु देवीः पीठस्थानेषु या

यो॰हृ॰
टी॰
४२
43

न्यासाष्टकमिति । तस्यां चतुरस्रमध्यरेखायामष्टस्थानेषु ब्रह्माण्याद्याः
ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही न्द्राणी चामुण्डा महालक्ष्म्यः
तथा विन्यसेदेवं चान्वयः तेषां स्थानाष्टकमाह पादांगुष्ठद्वये पार्श्वद्वये
मूर्धन्यपार्श्वके वामदक्षिणजान्वोश्च वहिरंसद्वये तथेति । स्थंडं चतुरस्रा
न्तरेखाव्यापकमाह । समस्ताश्च तृतीयचतुरस्रान्तरेखायै नमः इत्यपि विन्यसे
द्व्यापकत्वेन पूर्वोक्तान्तश्च विग्रह इति । चतुरस्रान्तरेखायै नमः इत्या
दिमन्त्रेण विग्रहे देहे पूर्वोक्तान्तस्य पूर्वोक्तानां ब्राह्म्यादिस्थानानामन्त
र्देशेषु व्यापकत्वेन न्यसेत्ताः शक्तीराह तस्याः स्थानेषु दशसमुद्राणां द
शकं न्यसेदिति तस्याश्चतुरस्रान्तरेखाया दशस्थानेषु त्रिखण्डामुद्रा
सहितानां सर्वसंक्षोभिण्यादिमुद्राणां दशकं न्यसेत् तासां स्थानान्याह ब्र
ह्माण्याद्यष्टस्थानान्तः तासामष्टौ न्यसेदथः शिष्टे द्वे द्वादशान्ते च पादां
गुष्ठे च विन्यसेदिति तासां मुद्राणां मध्येऽष्टौ मुद्रा ब्रह्माण्याद्यष्टस्थाना
नामन्तर्देशेष्वष्टसु विन्यस्य शिष्टे द्वे द्वादशान्तपादांगुष्ठेषु विन्यसे
त् द्वादशान्ते षोडशान्ते न्दुमण्डलादथः सूर्यमण्डलस्थाने तदंकस्थ
त् द्वादशान्तं षोडशान्तमिति व्योमस्थाने न्दुमण्डलम् तथा तस्या
कारसंग्रहे षोडशान्तमिति व्योतव्योमस्थाने न्दुमण्डलम् तथा तस्या
नके सूर्यविंबं द्वादशशक्तिकम् द्वादशान्तस्य तेन स्थितव्योमपदे ।
शकम् इति तेन विन्दुतत्त्वं चतुष्कं त्रांवुजे च तत्र सूर्यविन्दुमयस्थोर्ध्व
सार्धकांगुलि देशतः इति रीत्या ललाटस्थानविन्दुतत्वोपरिस्थितं
सूर्यमण्डलस्थाने ललाटोर्ध्वं द्वादशान्तपदेन लक्ष्यते षोडशदला
पद्मं च व्यापकमाह तदन्तः षोडशदलपद्माय नमः इत्ययं विन्यसेदिति ।
तेषां चतुरस्राणामन्तर्देव्याः शक्तीराह षोडशदलपद्माय नमः इत्या
दिमन्त्रेण षोडशदलं दक्षिणतः श्रोत्रपृष्ठादिस्थानानि संस्पृश्य व्याप
कं विन्यसेदित्यर्थः तद्दलेकामाकर्षिण्याद्याश्च विन्यसेदिति । तद्दले
जातावेकत्वेन तद्दलेषु कामकर्षिण्यादिकाः पर्णास्पर्शरूपरसगन्धचित्त
धैर्यस्मृतिनामबीजात्माऽमृतशरीराकर्षिण्यन्ता न्यसेत् तद्दलस्थाना
माह दलानि वदक्षिणश्रोत्रपृष्ठमंसकूर्परम करस्थं वीरुजानुगुल्फ

पादतले तथा वामपादतलाग्रेऽवं न्यसेदष्टकमतमिति । दलानी
न्यादितथोत्पन्नं तस्याष्टकम् एवमुक्तप्रकारेण वामपादतलादिवामश्रो
ण्यष्टान्तमेतद्देवाष्टकमंतस्थानाष्टकं द्वयषोडशदलानपीत्यर्थः
अष्टदलव्यापकमाह तदन्तरे वाष्टदलपद्मायनमः समपि विन्यसे
दिति । तदन्तरे षोडशदलपद्मान्तरे अष्टदलपद्मायनमः इति मंत्रेण
दक्षशंखादिस्थानानि संस्पृश्य व्यापकं न्यसेदित्यर्थः तद्दलान्याह
तद्दलेष्वष्टदक्षशंखे च जत्रुके ऊर्ध्वनागुल्फ गुल्फे जत्रु शंखे च वामतइ
ति । शंखजत्र्वादिषष्टानां शरीरावयवावच्छिन्नानामंगेषु प्रसिद्धत्वा
दवगतिः तद्दलेष्वष्टस्वरूपाः शक्तीराह अनंगकुसुमाद्यास्तु शक्तीर
ष्टौ च विन्यसेदिति । अनंगकुसुमानंगमेखलानंगमदनानंगमदनातुरानंग
वेगिनी अनंगांकुशानंगमालिन्यः शेषं स्पष्टम् चतुर्दशारव्याप
कमाह तदन्तश्चतुर्दशारचक्रायनमः समपीविन्यसेदिति । तदन्तरष्ट
दलपद्मस्यान्तश्चतुर्दशारचक्रायनमः इति मंत्रेण चतुर्दशकोण
स्थानानि ललाटादीनि संस्पृश्य व्यापकं विन्यस्य चतुर्दशकोणे
ष्वस्थाः शक्तीराह तत्कोणेषु न्यसेच्छक्तीश्चतुर्दश सर्वसंक्षोभिका
द्यास्त्विति । सर्वसंक्षोभिण्याद्याः सर्वसंक्षोभिणी सर्वविद्राविणी सर्वाक
र्षिणी सर्वाह्लादकारिणी संमोहनी सर्वस्तंभनी जृंभणी वशंकरी रंजनी
उन्मादिनी सर्वार्थसाधनी संपत्तिपूरिणी मन्त्रमयी द्वन्द्वक्षयंकरी सर्वपा
श्र्वान्तकोणानि प्रतिज्ञापूर्वकमाह तस्य कोणानि वक्ष्याम्यहम् ल
लाटे दक्षभागे च दक्षगण्डे समप्यतः पार्श्वान्ततरुजंगान्त वा
मजंघादिपार्श्वति वामोरु वामपार्श्वे तु वामांसे वामगण्डके ललाट
वामभागे च तथा वै पृष्ठ इत्यपि इति । दक्षभागे ललाटस्यैव ललाटे
इति प्रकृतत्वात् दक्षगण्डे दक्षांसमप्यतः इत्यर्थः पार्श्वान्ततरुजंगा
न्तेरिति त्रिभिरपि दक्षशब्दो युज्यते वामजंघादिशब्दाः पार्श्वान्ता
रंभयोः तकः वामांस इत्यत्रापि समप्य इति योज्यं पृष्ठमिति शिरसः पृष्ठ
मवमेयं दक्षवामयोः प्रथमं ललाटे पादानात् ललाटशिरसः पर

स्ताङ्गाः बहिर्दशारचक्रव्यापकमाह ततो दशारचक्राय नमः इत्यपि चार्च
तीति । ततस्तत्र दशकोणान्तरे दशारचक्राय नमः इति मन्त्रेण दक्षनाभ्या
दिदशकोणानि समस्तशपव्यापकमपि शम्भुर्द्धिन्यसेदिति यो ऽयम् दशार
चक्रस्य कोणान्याह तस्य कोणानि दक्षनासिकामूलनेत्रके कुक्षी
शवायुकोणेषु जानुद्वयगुदेषु च कुक्षिनैर्ऋत्यवह्न्याग्निकोणा यो ऽस्येति
तस्य दशारचक्रस्य कोणानि दशसु दक्षनासादिस्थानेषु भावनीयानी
त्यर्थः कुक्षीशवायुकोणेषु स्थान्दमन्वाह्निमेव कुवचनम् जानुद्वय
मारभ्योरुद्वयपर्यन्तं कुक्षिशब्देन लक्ष्यते तेन कुक्षेरुपरिभागः प्राचीश्च
यो भागः प्रतीची दक्षिणवामपार्श्वे च दक्षिणो दीर्घेण बाहुलक्ष्यते तेन
वामबाहुमूल[illegible]मीशकोणं वामोरुमूलं वायुकोणं दक्षिणोरुमूलं
नैर्ऋतकोणं दक्षिणबाहुमूलं वह्निकोणमागमयत् दशकोणेषु
न्यसनीयाः सर्वेषु नः सर्वसिद्धिप्रदाया नामशक्तीर्नांदशकप्रिय इति ॥
सर्वसिद्धिप्रदायाः सर्वसिद्धिप्रदा सर्वसंपत्प्रदा प्रियंकरी मंगलका
रिणी कामप्रदा दुःखविमोचिनी मृत्युप्रशमनी विघ्ननिवारिणी अं
गसुन्दरी सौभाग्यदायिन्य शेषस्याष्टम् अन्तर्दशारव्यापकमाह तद
न्तश्च दशारादि चक्राय नमः इत्यपि विन्यसेदिति । तदन्तर्बाह्यदशारा
न्तर्दशारचक्राय नमः इति मन्त्रेण दक्षनासादि दशकोणानि समस्तव्याप
व्यापकं विन्यस्य दशकोणेषु न्यसनीयाः शक्तीराह तस्य कोणेषु सर्व
ज्ञाद्याश्च विन्यसेदिति । सर्वज्ञाद्याः सर्वज्ञा सर्वशक्तिः सर्वैश्वर्यप्रदा
यिनी ज्ञानमयी व्याधिविनाशिनी आधारस्वरूपा पापहरा आनन्दम
यी रक्षास्वरूपिणी सर्वेप्सितफलप्रदाः स्याष्टमम् तस्य कोणान्याह
दक्षनासास्रक्किणी च स्तनद्वयमेव च सेवनी वामस्तनं च स्तनस्र
क्किणी नासिका नासाग्रे चैव विज्ञेयं कोणान्तं दशकं तथेति । स्याष्टम
अष्टकोणचक्रव्यापकमाह तदन्तश्चाष्टकोणादिचक्राय नमः इत्यपि
विन्यसेति । तदन्तर्दशारान्तरष्टकोणादिचक्राय नमः इति मन्त्रेण
चिबुकाद्यष्टकोणानि समस्तशपव्यापकं विन्यस्याष्टकोणचक्रस्या

दिवम् त्रिकोणादीनवचक्रेभ्यः प्रथममुत्पन्नत्वात् अष्टकोणे
षुस्स्रस्थाः शक्तीराह तस्य कोणेषु वशिन्याद्यष्टकं न्यसेदिति ।
तस्याष्टारचक्रस्य कोणेषु वशिन्याद्यष्टकम् न्यसेदिति तस्याष्टारचक्र
कोणेषु कामेश्वरीमोदिनीविमलारुणाजयिनीसर्वेश्वरीकौलि
न्यः तस्य कोणाष्टकमाह चिबुककण्ठहृदयनाभीनां चैव दक्षिण
म ज्ञेयं पार्श्वचतुष्कं च मणिपूरादिवामकम् चतुष्टयं च पार्श्वाना
मेतत्कोणाष्टकं पुनरिति । चिबुकादीनां पार्श्वचतुष्कं दक्षिणम
णिपूरादि मणिपूरकं नाभिस्थानं नाभिहृदयकण्ठचिबुकानां
पार्श्वचतुष्कं चैतत्कोणाष्टकम् अनन्तरमायुधावरणमास
माह हृदयस्य त्रिकोणस्य चतुर्दिक्षु बहिर्न्यसेत् शरचापौ पा
शसृणी इति । कामेश्वरीकामेश्वरयोः शरचापौ च सृणी चेपा
शं च चतुष्टयम् मिलितं न्यसेत् शरचापपाशसृणी इति पुंस्त्रीभेद
न प्रत्येकं द्वन्द्वमित्यष्टौ अत्रैवं वदन्ति बाणानेवेचषुर्वौ चापौ का
र्णौ पाशाङ्कुशं न्यसेदित्यादि हृदये मध्यकोणस्था इति । हृदयम
ध्यस्थाने निम्नत्रिकोणकारो हृदयस्य निम्नत्रिकोणकारो
हृदयस्य त्रिकोणमुच्यते तस्य चतुर्दिक्षु शरादि कामेश्वरीबाणा
न्यसेत् तत्तत्त्रिकोणव्यापकमुच्यते त्रिकोणाय नमस्तथा विन्य
सेदिति । त्रिकोणाय नम इति मन्त्रेण रेखात्रयं सर्वस्य व्यापकं वि
न्यस्य त्रिकोणे न्यस्तव्या देवीराह तस्य कोणेषु अग्रदक्षोत्तरेषु च
कामेश्वर्यादिदेवीश्च मध्ये देवीं च विन्यसेदिति । तस्य त्रिकोण
स्य अग्रदक्षोत्तरेषु कामेश्वरीं वज्रेश्वरीं भगमालिनीं न्यसेत् सा का
मेश्वर्यादिदेवीनां मध्ये देवीं च विन्यसेदिति मध्ये बैन्दव श्रीचक्रे
देवीं प्रकाशविमर्शसामरस्यरूपां त्रिपुरसुन्दरीं विन्यसेदित्यर्थः
श्रीचक्रन्यासमुपसंहरति एवं मयोदितं देवि न्यासो गुप्ततमः क्रमः
इति । स्पष्टम् अतस्तव यागोऽप्यभिमाह एतदुक्तं तत्कार्यं त्वया वै
वीरवन्दिते इति । स्पष्टम् ननु किमेतत्केनापि कथनीयमि

माह समयस्थाय दातव्यमिति । समयस्थाय कौलिकाय समयाचा
रनिष्ठाय देयं पशुमयाचारपराय न देयमित्याह नतु कौलिकसम
यस्थाय सर्वस्मै देयं नेत्याह नाशिष्टाय कदाचनेति । समयस्थाया
प्यशिष्टायासेन न देयम् मयाप्येतत्त्वदन्यतोपि न कस्यापि पुरा प्र
कटीकृतमिति आह गुह्याद्गुह्यतरं चैतन्न कस्यप्रकटीकृतमिति
गुह्याद्गुह्यतरं रहस्यादप्यतिरहस्यत्वात् एतत्तव मदंशभूतविम-
र्शात्मिकायाः प्रियतमाया अपि यतो मया यत्प्रकटीकृतं पुरान्य-
स्मै न प्रकटीकृतमित्यर्थः अस्यैव न्यासस्य पुनः प्रकारान्तरमाह
मूलदेव्यादिकन्यासमणिमान्तं पुनर्न्यसेदिति । पूर्वमणिमादिमूल
देव्यन्तं श्रीचक्रावरणदेवतान्यासमुक्तं इदानीं मूलदेव्याद्यणिमान्तं
पुनः श्रीचक्रावरणदेवतानां न्यासं कुर्यादित्यर्थः मूलदेवतान्यास
प्रकारमाह शिरस्त्रिकोणे पूर्वादिकामेश्वर्यादिकं न्यसेदिति । मू
लदेव्यादिकमिति देनैव शिरस्त्रिकोणमध्ये मूलदेव्याः प्रथमं न्या
सं ज्ञेयः पश्चाच्छिरस्त्रिकोणे शिरसः कपालमध्ये निम्नत्रिकोणा
कारमस्ति तद्बाल्ये मृदुतरं दृश्यते तत्र पूर्वादिकामेश्वर्यादिकं न्य
सेदिति आदिशब्दाद्दक्षिणोत्तरयोर्ग्रहणम् आदिशब्देन वज्रेश्वरी
भगमालिनी विन्यसेदित्यर्थः आयुधावरणन्यासमाह बाणान्ने
त्रेषु वा चापौ कर्णौ पाशाङ्कुशद्वयं पुनः स्तनद्वयं तन्नासाग्रे दक्षिणाद्य
तु विन्यसेदिति । बाणान्कामेश्वर्यैकामेश्वर्या नेत्रयोश्चापौ भ्रुवोः
पाशाङ्कुशद्वयं कर्णयोः स्तनद्वयं तन्नासाग्रे नासामयपार्श्वयोः नेत्रे क
र्णनासाग्रे इति चैकवचनं प्रयोगे द्विवचनोपलक्षणं दक्षिणाद्यमि
ति कथनादेव दक्षिणकामेश्वरस्य वामे कामेश्वर्याश्चायुधानि वि
न्यसेदित्यर्थः वशिन्याद्यावरणन्यासमाह मुण्डमालाक्रमेणैव न्य
सेद्वाग्देवताष्टकमिति । मुण्डं शिरस्तस्य मालाक्रमेणाष्टदिक्षु
परितो वाग्देवताष्टकाधिष्ठात्रीणां वशिन्यादीनामष्टकं न्यसेत न
त्वेवं चक्रात्तुपरि अर्धचन्द्राद्युन्मनस्यन्तानां स्थलानां वा यद्वा तासा

नः किमिति नोक्तमित्याह वैन्दवादीनि चक्राणि समस्तानि वशानि नः
ति । वैन्दवादीनि चक्राणि चतुरश्रान्तानि नव चक्राणि समस्तानि
स्थूलत्वात् अर्थवन्द्यायुक्तमनन्तानि भावनीयानीत्यर्थः अतः स्थूल
मात्मप्रसंगेन स्थूलानामेव न्यासो विधीयत इति भावः सर्वज्ञाद्यावरणन्या
समाह नेत्रमूले त्वपांगे च कर्णपूर्वान्तरे पुनः चूडादिके च निर्मार्य्ये ।
शेषार्थे कर्णपृष्ठयोरिति । कर्णान्तरं कर्णस्य पश्चाद्भागः चूडादिके
चूडायामादिलिलाटं तदपि कर्णान्तरानन्तरं न्यसेदिति संप्रदायः
निम्नशिरः पश्चान्निम्नस्थलमवटोरेव कोष्ठः चूडादि नेत्रमूलापा
गकर्णपूर्वपृष्ठेषु सर्वज्ञादीनां दशानामर्थं विन्यसेत् अथ तासा
मेवार्थं प्रवदक्कर्णपृष्ठपूर्वाग्रनेत्रापांगमूलेषु विन्यसेदित्यर्थः
ननु सर्वज्ञादीनां नाम न कथितं कथमत्र ता एव समस्ता इति
कथ्यन्ते उच्यते पूर्वचक्रे वशिन्याद्याः समस्ताः कथिताः अनन्त
रोपरिचक्रे सर्वसिद्ध्याद्याः समस्ताः कथ्यन्ते अतस्तयोरपि मध्य
देशस्थाने अपारिशेष्यात्सर्वज्ञाद्या एव समस्ता इति एतेन सर्व
सिद्ध्याद्यावरणन्यासमाह सर्वसिद्धादिकं कण्ठे प्राग्दक्षिणेन वि
न्यसेदिति स्पष्टम् । सर्वसंक्षोभिण्याद्यावरणन्यासमाह हृद
ये मनुकोणस्थाः शक्तयोपि च पूर्ववदिति । हृदये वक्षसि पूर्ववत्
प्राग्दक्षिणेन मनुकोणस्थाः शक्तयस्तद्देशकोणस्थाः सर्वसं
क्षोभिण्याद्याः समस्ता इति शेषः अनंगकुसुमाद्यावरणन्यासमा
ह नाभौ वसुदलं तत्र वंशवामेव पार्श्वके उदरे सव्यपार्श्वे च समसे
दादि च तत्त्वयम् वंशवामान्तरालादि न्यसेदष्टकत्रयमिति ।
नाभौ नाभिप्रदेशे अष्टदलं पद्मं तद्धि वंशं वंशपृष्ठस्थानि मध्यपा
र्श्वदक्षिणं वंशवामान्तरालादिं वंशवामपार्श्वयोरन्तरालं वामपा
र्श्वपृष्ठभागयोरन्तरालं पृष्ठभागदक्षपार्श्वयोरन्तरालं दक्षपार्श्व
पृष्ठवंशयोरन्तराले न्यसेत् अन्यत्तत्त्वयं अनंगरेखानंगवे
गिन्यानंगांकुशानंगमालिनीनां चतुष्टयं नाभिदेशस्य पश्चिमा ।

यो॰वि॰
टी॰
४८
५१

दाद्दक्षिणान्तमनंगकुसुमादीनां चतुष्टयं वायव्यादिनैर्ऋत्यान्तमनंगरे॥
खादीनां चतुष्टयं स्मरेदित्यर्थः॥ कामाकर्षिण्याद्यावरणमासमाह
स्वाधिष्ठाने स्मरेत्तस्य पूर्वादिदलावसानकमिति। स्वाधिष्ठानकम
लप्रदेशे तस्य पूर्वा॰ पूर्वादिभागमारभ्य दलावसानकं दक्षिण
दिगवसानकपर्यन्तं चतुर्दिक्षु प्रतिदिशं चतस्रश्चतस्रः शक्तयः
कामाकर्षिण्याद्याः क्रमेण स्मर्तव्याः ननु कामकर्षिण्याद्याः का॥
श्चमनुमीयन्ते इति चेदुच्यते पूर्ववदेव पूर्वोत्तरचक्रशक्तीनामा
मग्रहणसादिशेषान्नामाद्यक्षरमवमीयन्ते सर्वसंक्षोभिण्या
दिगुह्यशक्त्यावरणमासमाह मूलाधारे स्मरेन्मुद्रादशकं साध॥
कोत्तम इति। मूलाधारे मूलाधारप्रदेशे शिष्टमष्टम ननु किंमू
लाधारे मुद्रादशकं ध्यानेन स्मर्तव्यमित्याशंकायामाह पुनः स
व्ये च वंशे च वामे चैवान्तरालके ऊर्ध्वाधो दशमुद्राश्च ऊर्ध्वाधोवर्जि॰
तं पुनरिति। पुनः शाक्तान्नाभौ त्वष्टदले न तदूर्ध्वाष्टदलस्मासो॰
क्रस्थानानि उच्यन्ते वंशे पृष्ठवंशे सव्ये च पार्श्वे चकारादुत्तरयो
र्ग्रहणं वामे चैवान्तरालके पृष्ठवंशवामपार्श्वान्तराले च कारादृक्षि
मपार्श्वीयान्तरालानि गृह्यन्ते कोष्ठः पृष्ठवंशादिदिशि वायवाभ्य॥
न्तराले वाधायस्ताश्च दशमुद्रा स्मरेत् ननूर्ध्वाध इति किमान्तरंस्या
न द्वयं नेत्याह ऊर्ध्वाधो वर्जितं पुनरिति अनन्तरोधायस्थानद्वयं इ
शानदिशो मध्ये स्थानमस्य प्रकीर्तितं नैर्ऋतां तु दिशो मध्ये स्थान
मस्य प्रकीर्तितमिति तत्त्वविमर्श्यामस्मदुक्तरीत्या दशलोकपाला
र्वैनरीत्येव स्थानद्वयमित्यर्थः ब्रह्माण्याद्यावरणमासमाह ब्रह्माण्या
द्यष्टकं दद्यात्तु जंगायामिति। विसर्गस्य तु ऊर्ध्वगोः शिष्टमष्टम् ननु दद्या
ज्जंगायामस्मेदित्युक्तं तासां कानि स्थानानीत्याह तास्य पूर्ववदिति
ता ब्रह्माण्याद्याः पूर्ववत्स्मरेत् सव्ये च वंशे चेत्युक्तस्थाने पुनश्च पृष्ठवंशा
शेषेन पश्चाद्भागो लक्ष्यते जंगायाः पश्चिमादिचतुर्दिक्षु वायव्याद्य
न्तराले पुनश्च ता ब्रह्माण्याद्याः स्मर्तव्या इत्यर्थः अणिमाद्यावरणमास॥

माह वामजंघामूलमारभ्य वामपादिक्रमतोऽपि च सिद्ध्यष्टकं न्यसेत् तेषु हृदयपा
दतले न्यसेदिति । वामजंघामूलमारभ्य वामजंघायाः पश्चिमभागमारभ्य वा
मपादिक्रमतोऽपि च वामान्तरालादिक्रमेण तेषु पूर्वोक्तेषु स्थानेषु सिद्ध्यष्ट
कं न्यसेदिति शिष्टहृदयपादतले न्यसेदिति उक्तमाप्ताकर्षं दर्शयन्नुपा
सकत्वफलभूतानां वासनानां विद्यते कारणात्मस्तंन्यासं दीपादीपमिवो
दितम् एवं विन्यस्य देवीं पीठस्वात्माभेदेन चिन्तयेदिति । कारणात्म
कात्मविमर्शात्मारस्वरूपान्निखिलनिधानजगद्रूपादीपादीपमि
व प्रसृतं महाभासं कारणानुरूपं एवमुक्तप्रकारेणादितं कथितं
न्यासं विन्यस्य स्वात्मनोऽभेदेन चिन्तयेत् श्रीचक्रावयवात्मशक्तिकान्
देहावयवैरपृथक्त्वेन विभाव्य तदधिष्ठात्र्या परया च स्वात्मनोऽप्यभेदं
भावयेदित्यर्थः उक्तैस्त्रिभिः बालादिभिर्न्यासैः परारूपचिदानन्दलह
रीं भावयन्नरिपक्वहृदये बाह्यपूजाक्रियायोग्यतायै करशुद्ध्यादिन्या
सं कुर्यादित्याह ततश्च करशुद्ध्यादिन्यासं कुर्यात्समाहितः इति । त
तस्त्रिविधन्यासानन्तरं करशुद्ध्यादिन्यासं कारणात्मपरामृष्टका
र्यरूपांगुलिस्थितानाम् करोमि चिन्मयीं शुद्धिं करयोः स्पर्शिणोपिनी
मितमिमुक्तवचनोक्तरीत्या करशुद्धिन्यासमादिर्यस्य न्यासस्य जाता
वेकांवसमाहितः सावहितः करशुद्ध्यादिन्यासः चतः पातीशास्त्रोक्त
तेनात्रोच्यते केवलनाम्नैव गृह्यते तत्रादौ उक्तविद्यान्यासमाह मूर्ध्नि
गुह्ये च हृदये नेत्रत्रितये एव च श्रोत्रयोर्युगले देवि मुखे च भुजयोः
पुनः पृष्ठे जानुनि नाभौ च विद्यान्यासं समाचरेदिति । जानुनि जानुनो
विद्याबीजत्रयेण न्यासो विद्यान्यासः मूर्ध्नि वाग्भवबीजं हृदये शक्ति
बीजं गुह्ये कामराजबीजमित्येवं स्थानत्रयबीजत्रयमुच्चरेन्न्यसेदि
त्यर्थः करशुद्ध्यादीनां नामान्याह करशुद्धिपुनरेव न्यासनानि षड
ङ्गकम् श्रीकण्ठादींश्च वाग्देवीरिति । वाग्देव्यो वशिन्याद्याः श्रीकण्ठ
न्यासः स्वच्छन्दसंग्रहोक्तः तत्रान्तरप्रसिद्धत्वान्नात्रोक्तः पीठस्पष्टका
मेश्वर्यादिदेवीनां न्यासमाह आधारे हृदये पुनः पीठवायौ वेन्दवस्था

यो॰हृ॰
टी॰
४०
47

नेऽग्निचक्रादिकां समेत । वैन्दवस्थाने शिखायामिति मन्त्रयेन क्रमसे
यः वैन्दवस्थानं दीपाकारोर्ध्वमात्रमूललाटं हन्तमिष्यत इति पूर्वोक्तं ल
लाटं शिखानामकुण्डलिमाश्रयं शिवस्य विश्रान्तिस्थाने अत्र श्रुतिः
तस्याः शिखायाः मध्ये परमात्मा व्यवस्थित इति तेन तद्धामिस्थाने
ब्रह्मरन्ध्रलक्षणे अग्निचक्रादिकाः अग्निचक्रे कामगिर्यालये मित्री
शनाथात्मकं कामेश्वरी देवी रुद्रात्मशक्ति श्रीपादुकां पूजयामि सूर्य
चक्रे जालन्धरपीठे षष्ठीशनाथात्मके वज्रेश्वरी देवी विष्ण्वात्मशा
क्ति श्री सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके भगमालिनी देवी
ब्रह्मात्मशक्ति श्री ब्रह्मचक्रे उड्डीयानपीठे श्रीचक्रनाथात्मके श्रीमा
हात्रिपुरसुन्दरी देवी परब्रह्मात्मशक्ति श्रीरिति मंत्रे संप्रदायः शाक्रमः
अग्निसूर्यसोमब्रह्मचक्रादिका अग्निचक्रादिका ॥ अथवा हृदयभ्रू
मध्यब्रह्मरन्ध्रेषु सूर्यवह्निसोमब्रह्मचक्रेषु कामगिरिजालन्धरउ
ड्डियानपूर्णगिरिपीठेषु रुद्रविष्णुब्रह्मपरब्रह्मचक्रेषु कामेश्वरी
वज्रेश्वरी भगमालिनी महात्रिपुरसुन्दरीरूपे सदिगर्थः अयमेवार्थः
संप्रदायविद्भिः देशिकैः पद्धतिषु प्रपञ्चित इत्यर्थः तत्त्वत्रयसमावृतं त
त्त्वत्रयं समस्तं च विद्याबीजत्रयान्वितम् पादादिनाभिपर्यन्तमाग
लेशिरसस्तथा । व्यापकं चेति विमृश्येति तत्त्वत्रयमात्मविद्याशि
वाख्यतत्त्वानां त्रयं समस्तं च तत्त्वत्रयं समष्टिरूपं तुरीयतत्त्वं तदुक्तं
स्वच्छन्दसंग्रहे पराद्यमायान्तमात्मतत्त्वस्यान्तर्गतं स्मृतम् शुद्धवि
द्येश्वरसदाशिवविद्याख्यतत्त्वमाशिवशक्तिद्वयं चैव शिवतत्त्वं प्रकी
र्तितम् प्रमातृमेयप्रमितिरूपमेतत्त्रयात्मकम् एतत्तत्त्वं शिवतत्त्वं
सर्वतत्त्वमयं शुभम् इति विद्याबीजत्रयान्वितम् विद्याबीजानि वा
ग्भवकामराजशक्तिबीजानि एतद्बीजसमुदायरूपं तुरीयबीजं तै
स्त्रिभिर्बीजैरन्वितं पादादानाभिपर्यन्तपदसामर्थ्यान्नाभ्यन्तं आ
गलं लभ्यते शिरस इति पञ्चमी सामर्थ्यात् गलादिति लभ्यते कोऽर्थः
आत्मविद्याशिवशक्तितुरीयतत्त्वानि मूलविद्यावाग्भवकामरा

नशक्तित्वरीयवीजादिकानिचतुर्थीरसोन्तानि उस्त्रार्धपादादिनाभ्यन्त
राभ्यादिगलान्तगलादिशिरोन्तं संस्पर्शव्यापकं समसेदित्यर्थः भूयो।
पिपराहन्ताभावनामाह स्वात्मीकृत्यपरं शुनरिति। परं विश्वोत्तीर्णते
जः शुनः स्वात्मीकृत्यपूर्वं श्रीचक्रन्यासानन्तरं स्वाभेदेनचिन्तयेदिति
परेणैकवाक्यक्रम इदानीं करशुद्धिन्यासानन्तरमपि शुनः परं तेजोम
यवशात्स्वभिन्नमिवप्रतीयमानं स्वाभेदेनचिन्तयेदिति करशु।
द्धिन्यासस्यसामर्थ्यान्नायापगमस्वात्मतयाविभाव्येत्यर्थः स्वात्मी
कृत्यपुनः करशुद्ध्यादिन्यासस्यसामर्थ्यान्मायापरागस्वात्मतयाविभाव्ये
त्यर्थः अमृतत्वभावनामाह सुलपियेसुनर्देवी सोम्यागमेयामतत्ववे।
दिति। सौम्यज्ञलनरन्ध्रायो शुवसहस्रारकमलकर्णिकामध्यगत।
पूर्णसोममण्डलमध्यस्थितत्रिकोणान्तरस्थमस्थानन्तरात्मके अन
न्तरंमूलाधारचतुर्दलकर्णिकामध्यगताग्निमण्डलमध्यस्थत्रि
कोणान्तस्थमध्ये न स्थानुतत्त्वात्मस्वपरार्धकलारूपमाग्नेय द्वयोर
न्यस्यानलकुण्डलिनीरूपयोरयनूर्ध्वप्रसरतोर्योनिलिङ्गाकार।
योस्तामरस्यान्तरदमृतद्रवसारैस्तर्पयेदाप्लावयेत् अयमेव सं
प्रदायविद्भिर्दैशिकैः यहति शुरान्यासरस्मत्ते उक्तचतुर्वियन्या
समनुवादपुरस्सरमुपसंहरति एवं चतुर्विधोन्यासकर्तव्योवीरव
न्दिते षोढान्यासेणिमाद्यष्टमूलदेआधिकः प्रिये करशुद्ध्यादिक।
श्चैवसाधकेनस्वसिद्धये इति। एवमुक्तप्रकारेण षोढान्यासादिः
स्वसिद्धयेस्वेनन्यासस्यसामर्थ्यान्निराकृतप्रसूहतयापरमनिःश्रे
यसप्राप्तयेसाधकेनशुशुद्धानुकर्तव्यः नतसिद्धेनतस्यप्राप्तत्वात
नध्यानेनतपःक्रिया तदुक्तं विज्ञानभैरवभट्टारकैः यैरेवपूज्यतेद्रव्यै
स्तर्प्यतेवापरापरः यश्चैवपूजकः सर्वमस्यैवैकः क पूजनमिति न्यास
चतुष्टयस्यकालभेदेनविनियोगमाह प्रातःकालेथवापूजाकाले
वाहोमकर्मणि जपकालेथवातेषां विनियोगः पृथक् पृथक् पूजा
कालेसमस्तं वाकृत्वासाधकपुङ्गव इति। प्रातः षोढान्यासंमूर्तनासम

योह॰
टी॰
४८
48

योगिन्यादिभ्यां संहोमकाले मूलविद्यादिभ्यां संजपकाले करशुद्ध्यादिभ्यां
संजपं कुर्यादित्यर्थं पृथक्पृथग्विनियोगः अथवा पूजाकाले समस्तं
चतुर्विधं न्यासं कृत्वा साधकपुंगवः साधकश्रेष्ठः चतुर्विधन्यासकर
णसामर्थ्याधिष्ठितशीर्यमाणपाशजालत्वात्तत्र न्याससंमोहत्वात् अतए
व। षट्त्रिंशत्तत्त्वपर्यन्तन्यासं नेपरिकल्प्य च गणादियोगिनीनां च
मंत्रेणाथ बलिं दद्यादिति। षट्त्रिंशत्तत्त्वपर्यन्त हि स्यादिशिवान्तत
समुदायन्यासं नेपरिकल्प्य विन्मरीचीनामाधारत्वात् आसनं श्री
चक्रं परिकल्प्य तत्र श्रीपराक्रमोह्लस्तराजान्तरे स्थापयन् पृथिव्या
दिशिवान्तकम् सौवर्णं जनमकृतहेमदौपेणामन्त्रतो न पूजयेदिति गणा
दियोगिनीनामित्यत्र समस्तप्रकटपदमध्याहृतं च अदिपदेन गु
सतरसंप्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापरातिरहस्य।
योगिन्यः शृह्यन्ते बलिं पूजा तत्र निर्वोढुः बलिः पूजोपहारोऽपि दण्ड
भेदकलौशिवेति महाकविभिरप्युक्तं अवचितबलिपुष्पासादिना।
कोद्यः भाविनां बालपूजाकरणात् सर्वे यथोद्दालिवस्तूमाणेन लब्धान्त
र्मावेरदि समस्तं कुर्यात् अन्तर्यागार्थं स्वशरीरतत्त्वसमुदायरूपं च कवि।
भाव्य समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्याति
रहस्यपरापरातिरहस्ययोगिनीः श्रीचक्रपादुकाभ्यो नम इति योगि
नीमूलमंत्रेण स्वशिरसि पूजां कुर्यादित्यर्थः एतेन बाह्यपूजां सर्वम
प्यादावन्ते च कुर्यादिति सूचयन्नन्तरविघ्ननिरासमाह पिण्डरू
पपदस्थभेदनाडिभेदनम् गलहृन्मुखमूर्धस्थविद्यान्यासेन।
सन्दधीति। गलहृन्मुखमूर्धस्थचतुर्विधस्थानेषु विद्यान्यासेन सौ।
भाग्यविद्याया बीजचतुष्टयन्यासेन पिण्डकुण्डलिनी पिण्डशब्दे
न कुण्डलिनीस्थानं गुदमेढ्रान्तरं कन्दो लक्ष्यते रूपपदेति सुषुम्ना
ध्येयः पदं हंसः पदशब्देन हंसस्थानं हृदयं लक्ष्यते रूपं बिन्दुः रूपश
ब्देन बिन्दुस्थानं ललाटं लक्ष्यते ग्रन्थिशब्देन यत्र विश्वं सूत्रे मणिरिव
ग्रथ्यते तद्धि ब्रह्ममूलं ब्रह्मरन्ध्रं विन्यस्य लक्ष्यते एतच्चतुष्टयभेदाधि

ग्रभेदेन कोप्ययः गुह्यादिस्थानवत्तिष्ठेद्विद्याबीजवत्तिष्ठेदभ्यासेन
पातालादिषु लोकेषु योविघ्नाभेदलक्षणः इत्यभियुक्तवचनोक्तरीत्या
पातालादिरूपेणापिण्डपदरूपरूपातीतस्थानानि कन्दहृदयलला
टब्रह्मरन्ध्राणि भेदलक्षणानि भिन्नानि तदूर्ध्वं तदतीतविन्यस्याद्वयानन्द
विश्रान्तिर्निवास इत्यर्थः एतेन सर्वमपि वाह्यपूजानन्तरं कुर्यादिति
एलक्ष्यते अन्तर्यागदेहस्यैव यागगृहत्वात् तदन्तर्विघ्नान्निरस्यैव
हिर्यागगतानां विघ्नानामुत्सारणं कुर्यादित्याह यागमन्दिरगांश्चै
व विघ्नानुत्सार्य मन्त्रविदिति। अपसर्पन्तु ते भूता इत्यादिक्रमस्याय
कृ इति मन्त्रवित्साधको निर्गच्छतां विघ्नानां निजवामांगसंकोचना
मार्गदत्वोत्सार्यान्तःस्थितानि भोगतानि दिव्याष्टविघ्नानुत्सारयेदित्य
र्थः पार्ष्णिघातेन भौमांश्च तांस्तोचनभोगतान् अस्त्रमन्त्रेण रक्षणाय वि
चदिव्यान्विघ्नान्व्यपोहयेदिति व्यपोह्य निस्सारयेत् निर्गच्छतां
विघ्नानां पुनरप्रवेशाय वह्निप्राकारभावनामाह दिक्षु चोर्ध्वत
तो वह्निप्राकारेण परिभावयेदिति। संविदग्नौ महासारे विमर्शैक
शरीरिणि भेदाभासमिदं सर्वं जुहोम्येष तनूद्भवमित्यभियुक्तव
चनोक्तरीत्या सर्वतः स्फुरितपरसंविदेव महावह्निः स एव प्रका
शैकवेद्यत्वात्सर्वतोदितपरिस्फुरदद्वयपरसंविदात्मकमहाव
ह्निप्राकारपरिकल्पनभावनया भेदप्रतीतिलक्षणानां विघ्नाना
मप्रवेश इत्यर्थः सूर्यपूजामाह सामान्यार्घ्येण देवेशि मार्तण्डंप
रिपूजयेत् प्रकाशशक्तिसहितमिति। सामान्यार्घ्यविशेषार्घ्यो
वक्ष्यते प्रकाशशक्तिसहितः प्रकाशः परमः शिवः शीक्त विमर्श
ख्यातया सहितः नित्यसमवेतः शिव एव भास्करः तद्विमर्शो विभा
वो मरीचयो यः सभासयति वेद्यमण्डलम् तस्य पूजनमरहस्त्वयाम
तिरिमस्तुरुकरीत्या सर्वं सामान्यार्घ्येण स्वात्माहंभावभावनात्म
लक्षणया पूजया भावयेदित्यर्थः वाह्यार्थः स्पष्ट एव अस्यैव गुणा
धिक्यमाह अनुग्राकल्पमतुलम् गुह्यादिपरिवारं च विस्तृतो

योग.
टी.
४९
५१

जोवभासकमिति। स्वसंविद्रूपा देवी लौहित्यं तद्विमर्शनमिति प्रा
माणिकवचनोक्तरीत्या विमर्शविस्तारणं उज्ज्वलमुद्यास्तमयरहितं ग्र
हादिपरिवारं च विषयान् गृह्णन्तीति ग्रहा इन्द्रियाणि तेषामादिमन
स्तत्परिवारं च विविधविषयग्रहणलक्षणं संकल्पप्रसरप्रवाहप्रव
र्तकमित्यर्थः। अत्रोपनिषत् धियो यो नः प्रचोदयादिति विश्वं तेजोऽव
भासकं तं देवान्तरं ज्योतिषां ज्योतिरिति श्रुत्युक्तरीत्या बाह्यतेजोगण
प्रतीतिकारणनिजस्फुरणम्। बाह्यार्थस्तु सोमादयो ग्रहाः सूर्य
स्य प्रधानत्वात् आदिशब्देन षडंगानि गृह्यन्ते सप्तममतं वा एवं च
क्रोडीकारमाह सौम्याग्नेययुतैर्दिवि रोचनागुरुकुंकुमैः मूलमुच्चारयन्नास्य
णालिखेच्चक्रराजकमिति। सौम्यं कर्पूरं सौम्यनामवाचकत्वात् आ
ग्नेयं काश्मीरं कश्मीरजन्मा अग्निशिखे स्मरः रोचना गोरोचना अगुरुः
कालागुरुः कुंकुमं घुसृणं एतैः सचन्दनैर्वा पंकीकृत्य तेन स्वर्णादि
मयपट्टे हेमसूच्या वा लिखेन्मूलं सौभाग्यविद्यामुच्चारयन् परेण च सा
कं लेखयेदिति स्वयं वा लिखेदिति तदाश्रयं च चक्रराजं चक्रराज्ञात्मायमय
त्वात् तत्सर्वं पूजाचक्रेभ्योप्यत्र मंत्रसप्तकस्य मध्ये त्रिकोणशक्त्यग्रसम
रेखं मनोहरमित्यभियुक्तवचनोक्तरीत्या भावयेत् लिखेल्लेखयेच्च त
दुक्तमभियुक्तैः कस्तूरीघुसृणेन्दुसाराभिश्चक्रराजं लिखेदिति यो
गिनीमूलमंत्रेण विलिप्य पुष्पाञ्जलितत इति। योगिनीनां प्रकटादी
नां मूलमंत्रेण समस्तप्रकटं स्यादि पूर्वोक्तेन पुष्पाञ्जलिं ततः पुरश्री
चक्रे निक्षिपेत् पुष्पाणामभावे मणिमुक्ताप्रवाला वा विलोममूल
विद्यया। अपूर्वं सर्वथा कुर्यादिति विलोमं प्रतिलोमपुष्पारिनया
सौभाग्यविद्यया वा शर्कःकाकाहिविउभयतस्संपुटस्ते अपूर्वं परहितं
सर्वथा एकेनापि प्रकारेण कुर्यात् पुष्पाणामभावे मण्यादिभिर्यो
गिनीमूलमंत्रेण सौभाग्यविद्यया वा सर्वथा अपूर्वं च कुंकुमजयेदि
त्यर्थः तथाकरणे निष्फलमाह पूजाविघ्ना अनेकधा इति। मण्या
दिभिः पूजेमति श्रीचक्रे अनेकधा विघ्नाः बहवो विघ्नाः सपर्यान्तरा

याः संभवेयुः सामान्यार्घ्यविधानमाह श्रीचक्रस्यात्मनश्चैव मध्ये व
र्घ्यं प्रतिष्ठापयेदिति । चक्रस्य पूर्वोक्तरीत्योद्धृतस्य साधकस्य मध्ये
अर्घ्यं वक्ष्यमाणरीत्या प्रतिष्ठापयेत् अर्घ्यप्रतिष्ठापनप्रकारमाह
चतुरश्रान्तरालस्य कोणषट्के महेश्वरि षडासनानि संपूज्येति ।
आनन्दभैरवायेति वौषडन्तेन तर्पयेदिमन्त्रेण चतुरश्रान्तरालस्य
कोणषट्के आद्यौ चतुरश्रलिविन्यासादन्तर्हन्तेन तदन्तः षट्कोणेन तन्म
ध्ये त्रिकोणमिति मण्डलं गोमयालिप्तभूतले मध्ये तस्य वृत्तयाविलि
खेदिति सामान्यार्घ्यलक्षणम् तदुक्तं श्रीपराक्रमे ततो गोमयसंलि
प्ते चतुरश्रे भुवः स्थले प्रवाहात्तार्घ्यहस्तेन कृतया मत्स्यमुद्रया दि
ग्गत्यचतुरंगुलं विलिखेदर्घ्यमण्डलम् वेदाश्रवत्तषट्कोणत्रि
कोणान्मन्तरेन्तर इति चतुरश्रवृत्तान्तरालस्य कोणषट्के षडास
नानि संपूज्येति अमृतार्णवपोतं भुजनआत्मचक्रसर्वमन्त्रसाध्यसि
द्धासनानि संपूज्य त्रिकोणस्यान्तरे पुनः पीठानि चतुरो देवि का
मरूपाद्यौ इति क्रमात् प्रपूजयित्वेति । षट्कोणान्तरस्य त्रिकोणमध्ये
कामगिरिपीठं पूर्णगिरिपीठं जालन्धरपीठं उड्डियानपीठं चक्रमा
न विचक्षरान् वीक्षाचतुरे वा त्रिकोणकोणेन त्रयं मध्ये चैकं मर्चा
यित्वा तत्राधारं प्रतिष्ठाप्य अर्घ्यपादे तत्र वह्नेर्दशकलायजेदिति ।
अर्घ्यपादे आधारे तत्पात्रं प्रतिष्ठाप्याभ्यर्च्याधारं तन्मध्ये वह्निबिं
बं समभ्यर्च्य तत्परितः कलाश्चाभ्यर्च्येत तदुक्तं स्वच्छन्दसंग्रहे षट्कोणेन
त्रिकोणेन वह्निबिंबं कलायुतम् आधाराधारतो देवि पूजयेन्म
त्रवित्तम इति वामाद्याद्क्षान्तदशवर्णपूर्वं तस्यैव वह्नेर्दशकलापू
र्वाविधायायजेत तदुक्तं स्वच्छन्दे यादिक्षान्तानि वर्णानि कला व
ह्नेः महेश्वरि एताः कलाः समभ्यर्च्य स्वस्ववर्णैर्यथाविधि धूम्रा
द्याश्चतुर्थ्यन्तनामसमन्वितमोन्तिमाः धूम्रादिवह्निकलामन्त्रना
मानि स्वर्णशाप्रतम् धूम्रार्चिर्नीलरक्ता च कपिला विस्फुलिंगि
नी ज्वालामालिनि सविष्मतीन हंर्धं हव्यवाहनी सूक्ष्मी हव्यवाहाव

यो॰ह॰
टी॰
५॰
80

रौद्रीं महाहारिणी नतत्र इति तत्र पात्रं प्रतिष्ठाप्य तत्र सूर्यकलायजेत् पात्रे
सूर्यकलाश्चैव कभादि द्वादशार्चयेदिति । पात्रमभ्यर्च्य तत्र मध्ये सूर्य
मभ्यर्च्य तदुक्तं स्वच्छन्दे अस्त्रप्रक्षालितं शंखं स्थापयित्वा तथोपरि स्थ
यात् सूर्यबिंबं च समावाह्य स्वमंत्रतः अस्त्रं संपूजयेदिति अथ सूर्यक
लाः पूजयेत् कादिडान्तं च वर्णजातं क्रमात् क्रमात् ठंयठंयश्रयोक्तम्
कलाश्च तदनन्तरमित्यस्तदुक्तं शीला कठादिक कारादि ठकारान्तव
र्णभ्रामयुक्तं द्वादशादित्यकलाः क्रमात् तपिण्याद्या द्वादशार्चयेत् त
दुक्तं स्वच्छन्दे कादिठान्ता हरादेविमूर्तिनाम्ना समीरिताः तपिनी तापि
नी चैव शोषिणी मोषिणी तथा भ्रमिणी क्लेदिनी चैव वरेण्या कर्षिणी तथा
सुषुम्णा पुष्टिवाहा च ज्येष्ठा चैव वह्निरूपिणी एताः सौरकलाश्चैव मूलंके
मातृदिमानिमा इति कठादिकथनाद्या कारादयो वह्निकला दश अ
कारादयः षोडश कलाः सोमकला इति गम्यते तत्र पात्रे लवंगादि
भिः सुगन्धिकुसुमैर्वासितं सलिलमापूर्य तस्मिन्निन्दुमण्डलमभ्य
र्च्य तदुक्तं स्वच्छन्दे एलालवंगकक्कोलजातीफलसमन्वितात् सु
गन्धिकुसुमैर्दिव्यैः सह तस्मिन् जलं क्षिपेदिति नवयोनिं समालिख्य
पूर्वं जलमध्यतः विशुद्धितः समावाह्य चतुरस्रं समर्चयेदिति च वि
शुद्धेत तत्पूर्णमंडलं षोडशेन्दुकलायजेदिति । तस्मिन्विपूर्ते तद्‌द्रव्यं हंसं
विशेषात्मकं हंसं च द्रव्यमयत्वमेव हि विशेषार्घ्यस्य तदुक्तं स्वच्छ
न्दे अतो हि विशेषार्घ्यस्य साधनं प्रोच्यते धुना आधारपात्रं सोमश्चैव
तथैव द्रव्यकपूजनम् सामान्यार्घ्येण क्रमात्रेण कृतपूजितपूजके पा
त्रे वामं सर्वमापूर्य शिरो मंत्रेण पूर्ववदिति षोडशेन्दुकलाः क्रमात् का
रादि षोडश स्वरादिका अमृताद्याः षोडशेन्दुकलाः समेत तदुक्तं स्व
च्छन्दे स्वरादिकाद्यन्तगाः सौम्याः कलाः षोडश कीर्तिताः तासां नाम
निवक्ष्यामि श्रृणु सर्वांगसुन्दरि अमृता मानदा पुष्टिस्तुष्टिः प्रीति
र्मेधा धारिः रेवती ह्रीः सती देवि श्रीः कान्तिः स्वधा तथा ततः ज्योत्स्ना है
मवती चैव छाया संपूरिणी तथा वामा नाम कला नाचनामा स्वता

निवलमइति अस्मतेशीचतन्मध्येभावयेच्छ नवात्मनेति अ १८
अस्मतेशीसमुहृत्यमगुः स्वतंकलया पिनाकिनेचवविदास्य
जगज्जालिनंतथा योजयित्वाक्रमेणैव कार्यकारणमल्लकम्
अधिष्ठायजेदेनेननवात्मायंसमुहृतंरतिस्वच्छन्दसंपदाहृतंभवा
त्मानंतन्मध्येनेनमंत्रेणाममृतेशीश्रस्तनास्तनरश्मेणास्मन्नर्पित।
वगावरम भवानिभवशान्तेत्वांभावयाम्यमृतेश्वरीमितयभि
युक्तोनयामृतस्याविणीभावयेत् नवात्मनानतोगोरिनर्पयेदा
नंदेवताइति यातदेवताउाकिमायाः श्रेत्रेवोक्तंविशुद्धोहृदयेना
भोहायित्वानेचमूलके आज्ञायांयातनाथाश्चसल्लमागादि
वताइतिनवात्मनापूर्वोक्तेनआनन्दभैरवायेतितोषडन्तेनतर्प
येत् आनन्दभैरवंचैववोषडन्तेनतर्पयेदिति। आनन्दभैर
वंचैवमेवकारेणनवात्मनेवानन्दभैरवंतर्पयेत् नवात्मानमुच्चा
र्यानन्दभैरवायवोषडितितर्पयेदित्यर्थः सामान्यप्रकारंवि
शेषार्थेतिदिशति नैवेकार्थविशेषणस्यापयेत्स्वायकौलमइति
सामान्यार्थप्रकारमेवविशेषार्थस्यस्थापनमितिस्यश्लोक एव
मर्घ्यशुद्धिंकृत्वानन्तरम् गुरुपादालिमारस्यभैरवायदद्यादिता
दिति। गुरूणांपरमशिवादिस्वगुरुपर्यन्तानांपादावलीपरंप
रांदिव्यसिद्धमानवौघत्रयवतीमारभ्यस्वशिरस्यर्घोदकान्तदु
क्तमेवभैरवस्पर्शेशोधितमर्घ्यमाललाटेसमुहृत्यमहापद्मवनान्त
स्थपंपादारविन्दगुरुरूपिणोपूर्वोक्तनिर्विचनायदद्यान्निवे
दयेत्ततस्ततः तदाज्ञाप्रेरितंतत्स्वगुरुरूपंसकौलनिवेदयेदिति। तस्य
गुरुरूपिणोभैरवस्याज्ञयाप्रेरितमनुज्ञातंतत्स्वगुरुरूपंसकानि
वेदयेत् प्रसादग्रहणमाह तदीयशेषमादायकामाग्नौविस्वत
स्त्रिवि पादुकांमूलविद्यांचजपहोमसमाचरेदिति। तदीयशे
षगुरुदेवतायाः प्रतिशेषंद्रव्यमादायतत्ववतन्त्रयशोयनमन्तः
कामोद्देवस्यकाहत्वादितस्याउक्तरीत्याविश्वस्यस्मरकलायतौ।

यो॰स्व॰
टी॰
५१
51

कामेश्वर्यामेसर्वप्राणिष्वात्मत्वेनाग्रेविश्वनस्तिविधिविश्वग्रसनशीलो
नङ्क्षंपतेजोमयंततत्स्मात्तावतारोऽक्रीत्याविश्वहस्मारकलानाले
पाउकांश्वगुरुपाउकांश्चीभाग्यमूलविद्याजपंहोमंमेदेव्युनदेपा
नलक्षणंचप्रमावेरेतततदुक्तंश्रीपराक्रमेनिवेद्याममस्तकेस्वीयगुरो
रर्थीतदानयुक्तकल्पान्तकृतभुककल्पचिदग्नौविश्वचस्मरेज्जेयरा
शिमयंहम्बवामनामेपदंदशकम् एतेषांगणेशाख्यंकुंजपेदा
त्मानमामृशाम्नितिति नतुकः कामाग्निः सउक्तत्रेनिवसति किंवा
हविरस्यतत्राह महाप्रकाशोविधमोस्यसंहारवमनेयते मरी
विश्वतीर्हकुर्यान्मनसाकुण्डलीमुविक्षति । व्यवस्थितइतिशेषः
अत्रश्रुतिः नस्याः शिखायामध्येतुपरमात्माव्यवस्थितइतिम
हाप्रकाशेनिरिन्धनदीप्तेनिर्वाणदीप्तेश्रमातरिवह्नौविश्वस्यसं
हारवमनेयतेविश्वस्यशिवादेः भूम्यन्तस्यसंहारेनिजकारणता
वनात्राव्यवस्थितेवमनेमर्जनेचेयते शिवस्येवेच्छा स्वेच्छयैव
जगत्सर्वनिर्गिरत्यादिरस्यपिइतिमनसासार्धमरीचिर्श्चतीर्हकु
र्यात श्रान्तरस्यविदनूलस्यमरीचयोहनिवहाः अर्थेभूतेषांसा
वादिकाहृतयः नतुक्तंविज्ञानभैरवे तत्रतत्रान्तमार्गेणचैतन्य
अव्यक्तेप्रभोरितिकोऽर्थः कुण्डलिन्याः शिखायांमहाशून्येव्यव
स्थिते सर्वप्राणिषात्मप्रकाशलक्षणेकामाग्नौभ्रात्मनामनसा
संयुज्यतेइत्यादितंत्रान्तरोऽक्रीत्यावह्निरर्थेभ्रुवस्तवविनमरीचि
रूपाहृतिलक्षणंहविस्तेनेवमार्गेणान्तर्मुखेनयामनसाजु
कुर्यादित्यर्थः नतुक्तंश्रीविज्ञानभैरवभट्टारकेः महाशून्यालये
वह्नौभूतानविषयादिकम् हूयतेमनसासार्धंसहोमश्चेतनास्तु
चेति महामहिमशालीवायमेवान्तरोहोमः नतुक्तंपठतिशु
यमीयर्म्मस्यनेदीप्तेश्वात्माग्नौमनसास्रुचा सुखेणवर्त्मनानित्य
महवृत्तीर्जुहोम्यहमिति श्रन्तरामेवपूर्णाकृतिमाह श्रहन्तेद
न्तयोरेकाग्रत्मनीन्दुविकल्पितम् मयनोरेकसंभूतंवस्तुरू

यं महाहविः कृत्वा कृत्वा स्वयं चैव मोहज्ञानन्दविग्रह इति । सोऽदनो
स्मिषणोः मध्य शिवशुद्धिरमृतात्मभिः समाहृत्वा करोमीदं विश्वह
अवधूत निमिषमिशुक्रवचनोक्तरीत्या अहन्तेदन्तयोरैक्यं अहन्ता
प्रमाता इदन्ता प्रमेयं तयोरैक्यं प्रमाणं तत्त्रितयसामरस्यरूपं वि
श्वात्मि मवर प्रमेयस्य भगाग्नौ महाभूमौ वैविश्वोत्तीर्णमहाप्रमा
तृवपुषः शक्तिं तन्नैसर्गिकौ प्रामाण्यप्रणयेन शक्तिविचिताम
धृष्टवत्ता दिशोरिविमर्शकमभिद्धवक्त्रभरतो मया प्रिमन्तारण।
मिमिषमिशुक्रवचनोक्तरीत्यामंत्रारणिमथनोद्रेकसम्भूतं तत्त्रितय
सामरस्यरूपं वस्तु रूपं वस्तु मयं तदुक्तं शुल्यामनायक्रमे स्वीकुर्यात्स
तं तव स्वयमदानन्दस्वस्वसंवेदिति महाहविर्यस्मिन्नु तेस्तु प्रमेय
लक्षणे हविर्विषियास्मिन्कृते सप्रमेयलक्षणे हविषि प्रमातृलक्षण
ज्योति निरन्तरप्रज्वलति तन्महाहविःपूर्णाहुतिः सो मेऽनसमास्व
विकल्पितं उन्मनीनाम एवोक्तलक्षणमास्थूलास्वपन्ते तस्या
स्वचित्तमयेनामृतेन पूर्णाहुतिं कुर्यात् एवं रूपं हविर्दत्वाग्ना
नन्दब्रह्मणोरूपं तस्मिं देहे प्रतिष्ठितम् तस्याभिव्यञ्जकं मध्यंयो
गिभिस्तेनपीयत इति प्रमाणवचनोक्तरीत्यायावदानन्दादिलयो भ
वति तावदिति वीप्सार्थः स्वयं चैव महज्ञानन्दविग्रहः तदुक्तं विज्ञान
भैरवे नक्षिपमानकृतो लाभरमानन्दविग्रं भणाम भावयेदुरिता
वस्थामहानन्दस्ततो भवेत् मध्यमायाघनभवेन कृत्रिमानन्दज
मणात् महानन्दाद्ममध्यानाद्यनमयो भवेदिति कोऽर्थः मकारणिम
धनसंभूतमिदन्ताहन्तासामरस्यमयवस्तुरूपं च तत्पूर्णाहुतिं व
कृशोकृत्वा परिस्फुरत्परमानन्दो भवेदिति इयमेवान्तरपूर्णाहु
तिः अत एव प्रविष्टउद्यं श्रीगुम्फितेमेदनिर्हरणात्मिकाहैर्यमनश्च
मत्कारं विनाविषयसंगमादिनिक्षेपाद्योक्तरीत्यामनैश्चर्यंजा
यते वा एवकार्यं इंनं कुर्यादित्याह स्वप्रख्याप्रसराकारं प्रीचकं पूज
येच्चथीरिति । स्वधीः श्रीयपानेन नात्मविषयासक्तः स्वसंविन्मा

त्रेस्थितमनाः मनसि स्थिते मतिः धीरपि स्थिरा तस्यां स्थिरायां तत्र प्रत्य-
येकतानता ध्यानमिति योगपातञ्जलशास्त्रोक्तरीत्या प्रत्ययैकता-
नतालक्षणं ध्यानं संभवति संभावनातिशयाय ध्यानपूजाविधिः कृ-
ता भवति अथ यादावस्वीकृतहृत्सु शिवादिभ्यो गुरुभ्यश्च निवेद्य
स्वात्माग्रे कृत्वा प्रज्वलत्परमानन्दस्य स्थिरधीर्भूयादित्यर्थः स्वप्र-
काशप्रसराकारस्वप्रथा स्वसंवित्तस्या बहिरर्थेषु इन्द्रियद्वारप्रसरो
व्यापारस्तत्र आत्मनः स्फुरणं तत्तत्तदाकारं श्रीचक्रं पूजयेत् ना-
ऽत्किञ्चिदपि वस्तु संविदेवतायाः परं रूपान्तःकरणचतुष्ट-
याख्यमहदहंकृतितन्मात्रदशेन्द्रियतद्विषयतत्त्वषट्कषोड-
शविकारयात्मप्रपञ्चरूपं च श्रीचक्रात्मना स्फुरतीति एतच्छ्रीच-
क्रपूजामाह गणेशमित्यादि चक्रपूजाविधायेत्यमिसन्तेन गणे-
शं हृदन्तचैव दवेदेशं हृतिकान्तदेति । श्रीचक्रद्वारशाखयोः गणेशा-
त्मखक्षिहृतदीदेवेशं वटुकाख्यं तच्छक्तिं हृतिकां च यजेत् तदुक्तं
संकेतपद्धत्यां द्वैताद्वैतमहामोहशर्वरीतपणतपः भास्वानिव
जयसेकोणगणेशो हृतरीयुतः प्रतिभायाः परोल्लासो निशाकरइवाप-
रः इति शुक्रमसजनवर्तिर्वटुकस्ताण्डवान्वितइति बालहोरे यजेद्देवि
देवीक्षस्वस्तिकादिकाः इति । श्रीचक्रबाह्यद्वारप्रदेशे स्वस्तिकाद्या
देव्यः सरस्वती श्रीदुर्गा भद्रकाल्यश्च तत्स्वः स्वस्तिकाद्यस्तामिति
समासः स्वाहा शुभंकरी गौरी वागीश्वर्यश्च पञ्चैता ह्यास्त्र दश देवीना-
यिका यजेत् तत्र सिद्धपद्धतिश्च ततस्त्वान्तस्त्रिकोणेपि गुरुपंक्तिस्त्रि-
धा स्थितामिति । ततस्तस्य श्रीचक्रस्यान्तस्त्रिकोणे त्रिधा स्थिता
दिव्यसिद्धमानवौघत्रयवती गुरुपंक्तिः शिवादिस्वगुरुपर्यन्तानां
गुरूणां पंक्तिः परंपरा तामपि शास्त्राद्यजेदित्यनुषंगः गुरुपरंपरा
गुरुमुखादेव ज्ञातव्या न लोकतो न च पुस्तकेषु लिखितात्यन्तरहस्य-
त्वात् तदन्तश्च महादेवीं तामावाह्य यजेत्ततः महापद्मवनान्तस्था
कारणानन्दविग्रहाम् मद्कोपाश्रयां देवीं मिच्छाकामफलप्रदामिति ।

तद्दन्तः श्रीचक्रमध्यत्रिकोणमध्ये बिन्दुवाख्यैकचक्रे तां महापद्मवनान्तः
स्थां महापद्मवनान्तःस्थो वाग्भवो गुरुपादुकामित्युपपादितरूपकल्ला
यो मुख्यसहस्रदलकमलमहापद्मवनमध्यस्थां मध्यकोणाश्रया मना
श्रितस्वरस्य प्रकाशात्मनो मर्मकस्थाकारणानन्दविग्रहं कारणं देव
देवमस्यैवैव वसति तेत्राणां पतये मंगवलिं कुर्वीत देवेनेति द्रव्यपाने
नय श्चानन्दः सपवविग्रहं श्चाकारोध्यस्ता कोथः शोधितामृतीमृ
तद्रव्यपानपरिस्फुरत्परमानन्दशरीरामित्यर्थः भवतीमनाश्रिता
म् देवी विमर्शात्मिका इच्छाकामफलप्रदा इच्छायत्कामस्तेफल
मेवकेनतस्य दात्रीम् महापद्मवनान्तस्थे कारणानन्दविग्रहे सर्व
भूतहिते मातरेह्येहि परमेश्वरीति मन्त्रेणावाहयेत् ननु महापद्म
वनान्तस्य मित्यनेनैवानाश्रितो देवो नाश्रिता देवीत द्वचक्रसमावा
त्यका मेश्वर कामेश्वरी रूपेण प्रसृपावितिकथमवगम्यत इति चेत् उ
च्यते महापद्मवनान्तस्थः सकलागमशास्त्राणां वक्ता देवो नाश्रितप
वनस्य शक्तिरनाश्रिता न चानयोर्महापद्मवनान्तस्थामध्यकोणाश्र
यां भवतीं [illegible] मिति वचनेन घटते तथापि वादीनां तत्पद्यागम
शास्त्र वचनमस्ति तथापि महापद्मवनान्तस्थत्वं नास्तीत्युक्तं स्वच्छ
न्दसंग्रहे अनाश्रितस्य मध्यस्थे व्योमपद्मे सुविस्तरम् असंख्ये योजनैः
तेजस्तत्सिंहासन स्थितम् अनाश्रितमेश्वरस्य मध्यस्थः परमेश्वरः
सूर्यकोटिप्रतीकाशः शशांककृतशेखरः पंचवक्त्रो दशभुजस्त्रिपञ्च
नयनः प्रभुः सर्वावयवसंपूर्णो बृहन्मूर्तिः सनातनः सर्वतः सर्ववक्त्रा
तीच सर्वाङ्ग ग्रहणेनतः सर्वरत्नसमाकीर्णः सर्वाभरणभूषितः
अनाश्रितकलादेवी तस्योत्संगगसदास्थिता पंचवक्त्रा त्रिनेत्रा च दश
बाहुरिन्दुशेखरा ध्यापिप्यादिवत्तत्कं मतादृशायां परिकीर्तितम् पूर्वादु
त्तरपर्यन्तं दिग्गताः सर्वगाः शिवे रुद्रकोट्यो भ्यानीकैः स्वस्वरूपस्व
शक्तिभिः संसेविता लोकपालेश्वरादीनिकरोतिसा अनाश्रितो यं
भगवान्पञ्चवक्त्रस्त्रिदृक्तथा दशबाहुश्चन्द्रचूडः ऽविवाकृष्टकवा

क्रकः कोलागमादिवक्ता सीदेवमेव सदाशिवः परापरविभागेन प्रोवा-
चासौ त्वमागमम् उत्तरपदे पूर्णक्रमम् श्रीमांस्तु जगद्धस्तोऽस्मिन्न केसरस-
कुले तत्रासीन्नमः शिवदेव सम्पूर्णकलनात्मिकेति भवतीत्वन्मयैरेव।
नैवेद्यादिभिरर्चयेत् इति। भवतीमित्यत्रान्वयेति भवतीरूपं सविलक्ष-
णां त्वन्मयैरेव पञ्चभूतमयं विश्वं तन्मयीं त्वं सदा न च त्वन्मयी मूलवि-
द्या च तथा च कथ्यामितः इति पूर्वोक्तरीत्या पञ्चभूतानि भवद्विश्वा-
विर्भूतानि पञ्चरूपिणामात्मानं देव्याः पञ्चोपचारैकैः अर्चयेत् ग-
न्धाद्येन पृथिवीं कुसुमेन खम् धूपेन वायुं दीपेन तेजोऽस्मेन रसपुनः
रिति प्रामाणिकवचनोक्तरीत्या तैरेव नैवेद्यादिभिरर्चयेत् नैवेद्याद-
योऽगन्धपुष्पधूपदीपाः कोऽर्थः गन्धस्य तत्पदार्थानुभवेन प्रत्यग्रूपत्व-
तया प्रमातरि विश्रान्तिर्गन्धसमर्पणं तथा स्पर्शानुभवेन प्रत्यग्रू-
पत्वतया प्रमातरि विश्रान्तिः पुष्पसमर्पणं स्पर्शवत्पदार्थानुभवेन प्र-
त्यग्रूपत्वतया प्रमातरि विश्रान्तिर्धूपसमर्पणं रूपवत्पदार्थानुभ-
वेन प्रत्यग्रूपत्वतया प्रमातरि विश्रान्तिर्दीपसमर्पणं रसरूपं रसव-
त्पदार्थानुभवेन प्रत्यग्रूपत्वतया प्रमातरि विश्रान्तिर्नैवेद्यसमर्प-
णमित्यर्थः तदुक्तं स्वच्छन्दाम्नायरहस्ये इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यै-
रात्मदेवताम् स्वभावेन समाराध्य ज्ञाता सोऽयं महामख इति बहिरा-
पि गन्धपुष्पधूपदीपनैवेद्यानि पृथिवीवाय्वाकाशतेजःसलिलभ-
वत्वात्तैः समर्पयेदिति उपनिषत्तत्र त्रिकोणतत्स्फुरत्तायाः प्रतिबि-
म्बाकृती पुनः तत्तत्तिथिमयीनित्याः कामकलारूपिणीरिति। त्रि-
कोणश्रीचक्रस्य त्रिकोणरेखात्रयीत्वत्स्फुरत्तायाः प्रतिबिम्बाकृतेः गु-
णाः पञ्चदशषोडशात्मतां तन्मयीषोडश इत्यत्रैव पूर्वोक्तरीत्या भूत-
गुणात्मिकाया पंचदशाक्षरशालिनी श्रीविद्यायाः तत्स्फुरणास्य-
ञ्चदशप्रतिबिम्बरूपात्मा तत्तिथिमयीस्ताः तत्त्वाप्रतिपादिततिथ्या-
त्मिकाः कामकलारूपिणी तच्चक्रमध्ययोगासौ महाभावप्रभा दिशि-
ह्यद इति संकेतपद्धत्युक्तरीत्या कामकलाचक्रार्चनं कामकलेतररूपा-

कारवर्णादिसहरूपधारिण्या ३ सत्तिविनापारद्धिन्न्यात्मिमः ततः कामेश्व
रीनित्यानित्या च भगमालिनीनित्यक्लिन्नापि च तथा भेरुण्डा वह्निवा
सिनी महाविद्येश्वरी दूती त्वरिता कुलसुन्दरी नित्या नीलपताका च
विजया सर्वमंगला ज्वालामालिनी चित्रा चेत्येवं नित्यास्तु षोडशेति
वत्तः शतीशास्त्रोक्ताः १ नः शब्दार्थयोदिसन्तुंघनः तत्र प्रकटयोगि
न्यष्टकं त्रैलोक्यमोहनेस्थिति । तत्र श्रीचक्रे त्रैलोक्यमोहनचक्रे पूर्वो
क्तनिर्वचनेन चतुरस्रत्रयलक्षणोपकृतयोगिन्याय ष्ठ व्याख्यातरस्थि
तेत्यान्वयः प्रकटपदनिर्वचनमाह मातृकास्थूलरूपत्वात्वगादि
व्यापकत्वतः योगिन्यः प्रकटाज्ञेयाः स्थूलविश्वप्रयात्मनि । मातृकायाः
परापश्यन्तीमध्यमावैखरीत्वायाः स्थूलमकारादिक्षकारान्तपञ्च
शद्वर्णमयवैखरीरूपं तदुक्तं स्वच्छन्दे स्थूलं पञ्चाशदक्षरमिति तद्रू
पत्वात् मातृकास्थूलरूपवैखरीवर्णात्मकमयत्वात् सिद्धीनां ब्रा
ह्म्यादीनां च तदुक्तं च तत्त्रिशतीशास्त्रे वर्णात्मकमयोगेन यस्यामात्रा
त्मकं स्थितम् वन्दे तामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीमिति त्वगा
दिव्यापकत्वतः त्वगसृङ्मांसमेदोस्थिमज्जाशुक्रोजसः आदिनाद
यन्तेन व्यापकत्वात् त्वगाधारभूमध्यरक्तनितंबस्तनमांसनाभि
स्नायुहृदयांगुष्ठास्थिक एवं मज्जाशुक्रनासाग्रदक्षुर्ललाटचक्रेषु
स्थितत्वात् ब्राह्म्यादीनां स्थूलविश्वप्रयात्मनि स्थूलत्वकथनात् प्रत
एव विश्वप्रकर्षेणायतते इति विश्वप्रयाविश्वमयात तदात्मनि भूपुरेहत
णात्रैलोक्यमोहनेचक्रे स्थितत्वात् मातृकास्थूलरूपत्वात् त्वगा
दिधातूनां स्थूलशरीरावयवत्वात् तद्व्यापकत्वात् त्रैलोक्यमोहन
चक्रस्य स्थूलविश्वमयात्मकत्वात् तदन्तर्गताः सिद्धयो ब्राह्म्याद्या
श्च प्रकटा ज्ञेयाः अन्या भुवनेश्वर्यादिनीनां नाम अवधृत्य अर्वाक् पातमा
ह अणिमाद्या महादेविसिद्धयोष्टौ व्यवस्थिताः तास्तु रक्ततरा वर्णे
वराभयकरास्तथा यतचिन्तामहारत्नामनीषितफलप्रदा इति ।
अणिमाप्तिमहारत्नादि वत्रैःशतीशास्त्रोक्ताश्च समस्तमहिमेव वि

यो॰हृ॰
टी॰
५४
56

तावणिमप्राकाम्यभुक्तीच्छाप्राप्तिसर्वकामाख्याः सिद्धयः नवादिशक्तिः
मन्त्राख्यायास्त्रपूहन्तेष्टाभ्यवस्थिताः अष्टौ सिद्धयो निर्वाणप्रसिद्धाः अ
त्रत्रदशोक्तितामर्थं वामतं गाममारभ्य वामादिक्रमेतेपि च सिद्ध्यष्टक
मस्तु तेष्वष्टस्यं पादतले समेदिमत्रैवोक्तत्वात् महारत्नचिन्तामणिः
पिष्टस्पष्टम् ब्राह्याद्याश्चपि तत्रैव यष्टव्याः क्रमशः प्रियेइति । ब्रा
ह्म्याद्याः वह्निपश्चिमहारइति चतुःशतीशास्त्रोक्तत्वात्तत्रैव मध्यम
वतरश्रयष्टव्याः क्रमशः क्रमेण तासां ध्यानमाह ब्राह्माणीपीतव
र्णा च चतुर्भिर्भुजैर्मितामुखैः वरदाभयहस्ता च कमण्डलुकाहस्तयु
ता माहेश्वरी श्वेतवर्णा त्रिनेत्रा शूलधारिणी कपालसेणपरशुद
शानापाणिभिः प्रिये ऐन्द्रीतु श्यामवर्णा च वज्रोत्पलसमकरा कौ
मारी पीतवर्णा च शक्तितामरधारिणी वरदाभयहस्ता च ध्याता च
सुरेश्वरि वैष्णवी श्यामवर्णा च शंखचक्रगदाब्जकान् हस्तपद्मैश्च
बिभ्राणाभूषिता दिव्यभूषणैः वाराही श्यामलच्छाया पवित्रवक्रस
मुज्वला हलं च मुसलं खड्गं खेटकं दधती मुदेरिति । कौरिति
शेषः पिष्टस्पष्टम् चामुण्डाकृष्णवर्णा च शूलं शूलं डमरुकम् ते
खाखड्गं वेतालकं चैव दधाना दक्षिणे भुजे नागखेटकघण्टाख्यं दधा
ना सेः कपालकमिति । वेतालः पिशाचविशेषः शूलडमरुखड्गवे
तालात् दक्षिणैः करैः नागखेटकघण्टाख्यकपालानि वामहस्तकरैर्दधा
नेत्यर्थः महालक्ष्मीः सुपीताभा पद्मादर्पणमेवच मातुलिंगफलं
चैव दधाना परमेश्वरीति । स्पष्टम् । ननु मुद्रादशकं किमित्यत्र
त्र श्रीपूज्यत्वेन नात्रोक्तसमन्वचतुःशतीशास्त्रे व्यवस्थितत्वात् तत्रैव द्रा
ष्टव्यमेव नाख्याताः किंतु श्रीचक्रन्यासे मूलाधारे मध्ये मुद्रादश
कन्यासपकोत्तमइति सूचिताः अतोन्त्र तत्र मुद्रादशकमपि ए
जयेदिति एवं ध्यात्वा यजेदेताश्चतेषु श्रीत्रिपुरानन्त इति । एवमुक्त
प्रकारेण एताः प्रकटयोगिनीर्ध्यात्वा चक्रेश्वरी त्रैलोक्यमोहने चक्रे
श्वरी त्रिपुरां यजेत् विद्यादेवतयोरभेदविवक्षया चात्रैलोक्यमोहन

चक्रे शीविद्यानिर्वचनमाह कर्मेन्द्रियाणां वेमलत्वात्करशुद्धिकरेस्म
रेति। आत्मतत्त्वगतयोरशुद्धयोरत्र कर्मकरणात्मनोर्द्वयोः शुद्धत
त्वलयभावनामयीशुद्धिरात्मकरयोः परामते स्मस्तु कुर्वीतात्मतत्त्व
स्याशुद्धत्वात्कर्मेन्द्रियाणामात्मतत्त्वान्तःपातित्वात्करयोश्च कर्मे
न्द्रियत्वादशुद्धयोः करयोः कार्ययोः स्वकारणे शुद्धतत्त्वे शिवाद्वै
तलयभावना करशुद्धिस्तत्करोति यस्मात्तानिरुक्ता करशुद्धिमत्याशु
द्धिरणिमा चात्र संस्थितेति। कारणात्मपरामृष्ट कार्यरूपाङ्गुलि
स्थितामम करोमि चिन्मयीशुद्धिं करयोः स्पर्शशोधिनी मित्यभिप्रा
य एवचनो क्रियाकार्यस्य शुद्धिर्नामकारणात्मना वत्त्या तत्त्या पर्यव
सानम् अथवा अणोरणीयानिति श्रुतेः अणिमासिकारणे विद्यमा
नस्यात्मनो अणिमासिद्धातीतिसिद्धिः साचात्रैव त्रैलोक्यमोहनचक्रेस्थि
तेतितात्पर्यम् द्वितीयचक्रे सर्वाशापरिपूरकमाह षोडशस्पन्दसन्दोह
चमत्कृतिमयीः कलाः प्राणादिषोडशानां तत्प्राणानां प्राणात्मि
काः बीजभूतस्वरात्मकाकलनात्मका बीजरूपकाः अन्तरंगतयाश्रय
योगिमः संस्थितामतः कामाकर्षिण्यरूपाद्याः सृष्टिप्रायामतः प्रिये
सर्वाशापूरणाख्ये तच्चक्रे वामेन पूजयेत्। स्पन्दो नाम परायाः स
त्वरूपेण प्रसारः तदुक्तं पराप्रवेशिकायां सिसृक्षोः प्रथमः स्पन्दः
शिवतत्त्वं तदुच्यते प्रभास्वरमिति तेन षोडशस्पन्दा षोडशविका
राः भूतेन्द्रियमनांसि तेषां सन्दोहः समूहस्तस्य चमत्कारो नाम तत्स्थितिवृ
द्रुतिः शयोदयः तदुक्तं क्रमोदये ऐश्वर्यमेव चमत्कारो विनाविषय
संगतिमिति तन्मयी भूतेन्द्रियमनः स्वचिदनुप्रविष्टाः कलाः षो
डशधा स्फुरन्ति तदात्मिका इत्यर्थः कलाः षोडश कलासंख्याः क
लाभिधानतस्य प्राणः प्रादिर्येषां प्राणापानव्यानोदानसमान नाग
कूर्मकृकरदेवदत्तधनञ्जय दश वायव स्तेषु पञ्चानां मान्त्रे शुमृगणा
मेषां प्राणात्मिकाः प्राणादयोपि तेन ये तेषां प्राणादीनामपि प्रा
णात्मिका इत्यर्थः बीजभूतानि विन्दुयुक्तत्वात्स्वराः षोडशकारादि

विसर्गान्तास्तदात्मकत्वात् कलनात्मकमात्मबिन्दुकस्वरग्रामत्वात्
कलनाबीजरूपकाः सस्वबीजः स्वरः स्वरूपान्तरंगतयाषोडशविका
राणांत्वगादियातुर्वर्णदशप्रकृटत्वात् तन्मध्येयोगिन्योगुप्ताः संस्थिताः अ
न्तरंगतयाऽनन्तरंगमन्तरिन्द्रियं बुद्धिस्तस्य मनस्कारमयत्वादेवास्याप्य
न्तरंगास्तत एवगुप्ताः सर्वाशापूरणाख्ये चयोगिन्यः तत्र स्थान्दसञ्ज्ञा
द्वितीयार्थे प्रदर्शयमाह कामाकर्षिणीरूपाद्याः कामाकर्षिणीरूपाः इत्या
दिवत्तुः शतीशास्त्रोक्ताः सृष्टिप्राधान्यतः सृष्टावामाचक्रस्यैव प्राधान्या
मात्रस्य चक्रस्य सृष्टिरूपत्वात् तस्या योगिनीर्वामेन पूजयेत् वा
मावर्तक्रमेणार्चयेत् विकारषोडशविलासभूताः प्राणादिदशवायू
नां जगत्त्राणनादिशक्त्यात्मिकाः सबिन्दुषोडशस्वरैः प्रत्येकं तन्मयीः
अन्तरंगविदं तु प्रविष्टषोडशविकारतयागुप्ताः कामाकर्षिण्याद्याः
कलाः सर्वाशापरिपूरके चक्रे वाममार्गेण पूजयेदित्यर्थः एतासां ध्या
नमाह पाशांकुशाकरा पत्तारक्ताः रक्तावराहृतास्ताइति । तञ्चक्रदेवता
र्वेत्तेसिद्धिमाह प्राणाशुद्धिमयी सिद्धिर्लघिमा मोक्षरात्मनइति । अ
नन्तज्ञानं तस्य यायास्तत्तोर्कमतिशुभ्रमस्तु करीमा विश्वप्राणरूपया
स्वयया सद्यदेकमपानमनतिप्राणितितस्मिन्नकारणेलयः प्रा
णादीनां वायूनां शुद्धिर्नीमस्य प्राणाशक्तो वायुमात्रे पलक्षणपर
क्षेत्रवाकलयलक्षणयात्र शुद्धो मनोलयलक्षणः समाधिर्भवति
नत्तस्तेकरमभूतस्य भोक्तृरात्मनो जीवस्य च स्थूलत्वेनलघिमा सि
द्धिर्भवति त्रिपुरेशीचचक्रेशीपूज्या सर्वोपचारकैरिति । यादृशैरेवो
पचारैः सर्वगन्धादिभिर्मूलदेवी पूजिता तादृशैरेवोपचारैः सर्वगन्धा
दिभिर्मूलदेवी पूजितातादृशैरेवोपचारैस्सर्वाशापूरणचक्रेशी त्रिपु
रेशी पूजनीयेतिस्पष्टम् तृतीयचक्रेपूजां सर्वासनामाह प्रकृत्यष्ट
करूपस्यः कवर्गाद्यष्टवर्गगाः अनंगकुसुमाद्यास्तु सर्वसंक्षोभका
रके चक्रे वास्तवान्तरंगत्वाद्देतागुप्ततरामताः पाशांकुशधनुर्बाणक
रारक्ताः समर्चयेत् कौलिकानुभवाविष्टवायपूर्वपृष्ठकाश्रिताः वा

गभवाष्टकं सर्वव्याप्त्यात्मवर्गाः स्वरूपतः तासूत्पन्नत्वाः सर्वाः सर्व
संक्षोभणाद्ध्ये श्रृंगारजस्वामायास्मिति । कुलषट्त्रिंशत्तत्वम
यशरीरं तद्विषयानुभवः कौलिकानुभवः कृपोर्हं स्वस्यो हमिमादि
तेनाविष्टो जीवस्तदा प्रयतया तस्यावोधः पुर्यष्टकमितिस्थितं च
चैतन्यं चेतनाद्रूपकमेव जीवः कलावदेवेषाम् स्वपुर्यष्टकम
तमिति स्वच्छन्दसंग्रहोक्तम्ह्ल्लमसूर्यष्टकं तदाश्रितास्तन्मयतया
वाग्भवमेकाराज्ज्ञानशक्तीनां मतावामूलतां चघटेतिकोथः
मूलोभिताया इच्छाशक्तेः कुलं कुण्डलिन्याः अकुलस्थेनाकारेणं
संघट्टमतिपकारो जायते उन्मेषशक्तिरूपायास्तस्यापकाकुलसंघ
ट्टे सति ओकारो जायते योरेवाकुलसंघट्टे सत्यै कारौ कारौ जायते
इत्यर्थः तदुक्तं परापञ्चाशिकायां अनुत्तरानन्दमयीरिच्छाशक्तेरि
योनिरिति त्रिकोणमथ षट्कोणमिच्छाया रूढिमागतेत्येवोन्मेष
योगेन क्रियाशक्तेः स्फुटवपुः उक्तत्रिशक्तिसंघट्टे त्रिशूलं ठेतत्र
स्मरमिति मिश्रेच्छाभाविते रपि स्फेषणान्तरारूढाः स्फुटस्फुट
जगन्मयाः चत्वारः पुरतो वर्णाः षण्ढात्मानः प्रचोदिताः इति पंचाशि
कोक्तरीत्या अकुलेषणम्मां मिश्रेच्छाभाविताः षण्ढाः ऋऋलृ
लृवर्णास्तेरपि न श्रुत्य सत्वमेव ग्राह्यम् अत एवाकुलपकौ वर्णाः
द्वितीयवर्णा इच्छात्मकः उन्मेषोपरः परं षण्ढरूस्वर्द्धयं च वर्णकौरेका
रौकाराश्चेति नववरा भवन्ति वेद्योपरूपमायोर्णाः सतावावि
निर्वीजे तत्सादिमायान्तिमं जयत् विलासप्रत्ययाकारमेतत्तत्प
रिस्पन्दनमिति परापञ्चाशिकोक्तरीत्यावेद्यस्य षट्त्रिंशत्तत्वात्म
नः संकल्परूपाकुम्भाणः शाबसहा कुम्भाण इति तत्रान्तरेवमति
माश्रविरूपसंस्मारलक्षणं परमेष्ठी भोग्यविस्तरायतत्वनिमष्ठदूप
रमप्रेमास्पदं सर्वसहृणी परमाशिवस्वरूपप्रकाशानमेवसोऽर
धेतदेव गुणाल्लेनसंयुतात्तदेकरसतया चक्रेश्वरी सर्वसंक्षोभ
णाद्यतनीयं चक्रेश्वरीकोष्ठः विनायकशरादिविषयप्रमातृः

योहृ॰
टी॰
५८
56

देवतास्वपिण्डपदरूपरूपातीतविश्रान्तिरूपलक्षणातत्त्रितयपुरात
तीतदेकारस्यसोन्त्यस्थशालिनीत्रिपुरसुन्दरीतृतीयचक्रेश्वरीत्यर्थः
बुद्धिसिद्धिरूपा बुद्धेः शुद्धिर्नामविषयसंसर्गविहायनिर्विकल्पचिदा
त्मलयस्तद्रूपा तथैवमहिमासिद्धिरूपा बुद्धेर्विषयोपरागाश्चिदा
त्मनोमहिमामहत्त्वसिद्ध्यति तत्सिद्धिरूपा चक्रेश्वरी सर्वोपचारकैः
एवं क्रमचक्रादिभिरभ्यर्च्या चतुर्थचक्रेपूज्यां सर्वाशानामाह द्वादश
ग्रन्थिभेदेन समुल्लसितसंविदः विसर्गान्तदशावेशाख्याक्रमानु
भवपूर्वकमिति । ग्रन्थिः षट्चक्राणां प्रत्येकमूर्ध्वाधोग्रन्थिद्वयं द्वा
यमिति द्वादशग्रन्थयः अत्रैव वदति द्वादशग्रन्थिभेदेन वर्णनाद्या
नं त्रिपथ इति यदुल्लसितायाततस्तत्स्थाः संविदः कुण्डलिन्याः द्वा
दशग्रन्थिभेदेन विसर्गान्तदशावेशाद्विसर्गः षोडशस्वरस्तेन विस
र्गशब्देन षोडशसंख्या गृह्यते अतो विसर्गान्तं षोडशान्तं यत्षोडशा
कलाकारं भूतानां व्योमरंध्रं च यत्षोडशान्तमिति व्योमान्तं व्योमस्था
नेन्दुमण्डलमिति स्वच्छन्दसंग्रहोक्तरीत्या तदेव दशाविदाधारत्वा
त्तदावेशः तदापत्तिः तत्क्रमेणैव व्योमेन्दुमण्डलासक्ताश्रया स्वान्तः
स्वरूपिणीति शाक्तानुभवपूर्वकं मूलोत्थितायाः कुण्डलिन्याः षट्च
क्रग्रन्थिपञ्चपभेदक्रमेण व्योमेन्दुमण्डलामृतपरिकलनमेवशा
क्तानुभवस्तत्पूर्वकं भाविवर्णमतिरिति क्रियाविशेषणं त्रैलोक्यमो
हनादिचक्रत्रयेष्वैश्वरीमयतावासनामुल्लास सर्वसौभाग्यदायिका
दिचक्रत्रये भूतलिपिमयमामयवासनामाह उक्तेषु शक्तिप्रसरै
रिच्छाशक्तिप्रधानकैः तथैवाकुलसंघट्टरूपैर्वर्णैर्वतुष्टये वेद्या
स्वरूपमाधर्ममित्येच्छाभावितैरपि कुलशक्तिसमावेशरूपवर्णैः
याविन्तैरिति । अकुलसंघट्टरूपैः अकुलं बिलरन्ध्राधो सुविस्थित
सहस्रदलकमलं तत्रस्थाकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिव
इति संकेतपद्धत्युक्तोऽकारः परमशिवात्मकः अकुलशब्देन लक्ष्यते
तेन संघट्टः संबन्धः तद्रूपैरिच्छाशक्तिप्रधानकैरिच्छाशक्तिरकारः

उन्मेषशक्तिप्रसरैः उन्मेषशक्तिरुकारः तदुक्तं परापञ्चाशिकायां
अनुत्तरेच्छोन्मेषआनन्देषणामूलताक्रियेच्छाणामषट्केनसंव
न्धः सूक्ष्मवैखरीवर्णषड्वर्गः तदुक्तं स्वच्छन्दसंग्रहेपि स्थूलप
ञ्चाशदाकारं सूक्ष्ममष्टाष्टकमतमिति तत्स्वरूपाः स्वदात्मकत्वा
दुन्नताः सूक्ष्मवैखरीवर्णा वर्णात्मकमयत्वादेता अपिसूक्ष्मा अ
नाद्यन्तातरंगानैयायुन्नताराइत्यर्थः ताः सर्वा अनंगकुसुमाद्याः प्र
वैरन्यादिचतुःशतीशास्त्रोक्ताः सर्वसंक्षोभणाद्ये तृतीयचक्रे
ष्टदलकमले पूज्या इति तासांध्यानमाह रक्तकञ्चुकशोभिताः
वेणीकृतलसत्केशाश्चापबाणधराः शुभा इति । ततदाकारवृंहणा
त्मभोगप्रमोक्तमहेशितुः पिण्डादिपदविश्रान्तिः सौन्दर्यगुणसं
युता चक्रेश्वरी वृद्धिऋद्धिरूपा च परमेश्वरी महिमासिद्धिरूपा च
प्रस्मा सर्वोपचारकैरिति । इन्द्रियद्वारवहिर्निर्गस्य तत्तदाकारातत
दिन्द्रियार्थाकाराकारिता बुद्धिरन्तःकरणपरिणतिस्तस्या त्मनो
भोगपरा शब्दस्पर्शरूपरसगन्धास्तेषां भोक्ता प्रमाता स एव महेशि
ता भूपतिहेत्रुत्तरतियावत् तस्यपिण्डादीनां पिण्डपदरूपरूपाती
तानां स्थानानां विश्रान्तिः रूपातीतेतुरीयपदमुक्तिः अत्र प्रमाण
वचनम् पिण्डे मुक्ता पदे मुक्ता रूपे मुक्ताः षडाननरूपातीते च ये मु
क्तास्ते मुक्ता रात्र संशय इति सेवसौन्दर्यवचनात् एवंभूतः स
आदिर्यस्य हकारस्य स एव वेद्यो यद्रूपः सादिहकारः तदाद्यवर्णैः
अत्रैक आदिशब्दो व्याहार्थः हृदयाः कुलशक्तिसमावेशरूपवर्णा
ढ्यान्वितेः कुलशक्तिः कुण्डलिनी तस्याः समावेशानह्वयविश्रान्ति
स्थानहृद्यं आधारब्रह्मरन्ध्रमध्यं तद्रूपं वर्णद्वयं वकारलकारात्म
कं आधारपंकजं पीतचतुष्पत्रं सकेसरमित्यादि पार्थिवपंकजं
हितदिस्यायन्तेन स्वच्छन्दसंग्रहोक्तरीत्या आधारपंकजस्य पार्थिव
त्वाल्लकारः ब्रह्मरन्ध्रे यावदूर्ध्वे कुलपद्मम हेश्वरि श्वेतं सकेस
रं पीतं सहस्रारमधोमुखमित्यादि व्यापिनी केवला शक्तिरम्

यो.हृ.
टी.
५०
57

नोऽवप्रवर्षिणी मायेनेन स्वच्छन्दसंग्रहोक्तरीत्या मतमयोवकारप
न्दर्णोद्दशार्णान्वितः कोऽसौ: कुलशक्तेरिच्छात्मिकायाः कुण्डलिन्या उ
न्मेषात् षट्चक्रपञ्चगगनद्वादशग्रन्थिभेदक्रमेण अकुलसमाव
शात् अइउऋऌएऐओऔहयवरलइतिवर्णाश्चतुर्दशाकमुत्पद्य
ते तत्क्रमागमागारे मूलविद्योद्धारप्रसंगे पंचह्रस्वाः सन्धिवर्णा
व्योमवाय्वग्निजलभूरेतितन्मयं चतुर्दशारचक्रमित्यर्थः संप्र
दायक्रमायातसौभाग्यदायकशाक्तयोवासनामाह शक्तेःसार
मयत्वेन प्रसृतत्वान्महेश्वरि संप्रदायक्रमायाताष्टैकैः सौभाग्य
कारकैः निरन्तरप्रथारूपसौभाग्यवल्लयोगतः अन्त्यप्रमतकेदे
विशाणिमामहश्रीभ्रवाः सर्वसंक्षोभिणीपूर्वा इति । शक्तेरिच्छा
शक्तेः कुण्डलिन्याः साराः प्रसाराः पूर्वोक्तरीत्या अकुलस्थानस्थानु
त्तरशिवसंसर्गाः तन्मयत्वेन तदुत्पन्नत्वात् एते नवर्णास्तैर्वर्णैः
प्रसृतत्वात्सर्वसंक्षोभिण्यादिशक्तीनां संप्रदायक्रमायातत्वम्
संप्रदायमहावीर्यरूपो गुरुमुखैकलभ्य इति पूर्वोक्तरीत्या गुरू
गुरवोऽवगतत्वाद्वर्णास्तैः आसां च तन्मयत्वम् अतएताः संप्रदाय
क्रमायाता इत्यर्थः अणिमामहश्रीः तास्तु रक्ततरा वर्णा इति पूर्वो
क्ताणिमासिद्धिसदृशीः सर्वज्ञात्मसर्वशक्तिप्रमुखादिचतुःशक्ती
शान्तोक्ताः निरन्तरप्रथाः अन्तरपदभेदो निरन्तरप्रथा शिवाद्वै
तभावनामैव सौभाग्यं परमस्य भगपरं प्रेमास्पदं परशिवाभेद
गोचरत्वात्तदेव बलं शक्तिसंयोगः अनित्याशुचिरूपपरमउभग
सर्वज्ञत्वाभेदलक्षणसमाख्यरिपिंक्रियपरप्रेमास्पदसर्वस्वरूपेण
यपरमस्य भगपरशिवाद्वैतालक्षणसौभाग्यप्रतिपादनशक्ति
संयोगात् अथ प्रथमत्वेके अत्र कुलाद्यालम्बनात्तिनि सत्ता भवति
सौभाग्यकारके चक्रे संक्षोभये दिमनुषांगोः देहात्मत्वादि विशुद्धिदा
इति नित्यत्रिपिच प्रोक्तरूपत्रये योगादिक्लेशभेदेन सिद्धात्रि
पुरसुन्दरी एताः संक्षोभये द्विसर्वाः सर्वोपचारकैरिति । देह

षट्त्रिंशत्तत्त्वसमुदायलक्षणः तच्छरीरं न तदहन्ताभिमानी प्रमा
तालक्ष्यते अत्राणीन्द्रियाणि प्रमाणानि आदिशब्दाद्विषयाः प्रमे
यरूपाः शब्द्यन्ते तेषां शुद्धिस्थितैकविश्रान्तिः तत्सदात्रस्यां शुद्धेय
छुरीशितंवस्मात न्त्रासिद्धतिसवात्रेप्राक्तरूपेप्रमातृमानमेयल
दणेपरत्रेपेपिनिवासशीलत्वात् अत्रैव वदति मातृमानप्रमे
यानां पूरणं परिपोषिणीति योगादिक्लेशाभेदेन आत्मा मन
सा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेन इन्द्रियाणां प्रकारित्वा
नियमात्तेषामेव सन्निकृष्टेन्द्रियेणेति तज्ज्ञानरोधकरी मामा
तृमानप्रमेयभूततद्रूपेण चिन्मरीचीनां प्रसरस्तत्समवायो यो
गः स एवादिक्लेशाः अस्तंगाढया विच्छिन्नसंविदात्मतमामानसेदृ
य विषयात्मना बहिरूपरागएवक्लेशः किं बहुना तद्भेदेन प्रमातुः शु
द्धत्वात्तदैकरस्येन परप्रमातृविश्रान्तिर्भेदः तदुक्तं परापञ्चा
शिकायां सर्वसंविन्नदीभेदाभिन्नविश्रान्तिभूमयेनमः प्रमा
तृविषयेष्वपि च तन्मासिन्व वेइति लोकावस्थामपि यत्रयत्र मि
लितामरीचयस्तत्र तत्र विभुरेव जृंभत इति स्थितमास्थिताविश्व
रवासिनीपूर्वोक्तपुरत्रयविश्रान्तिरूपिणी यत्तत्र्यैचक्रेश्वरीप
राकृत्यावरणदेवताः सिद्धिचक्रेश्वरीयुताः सर्वाः सर्वोपचारै
र्गन्धादिभिः पूजयेत् पञ्चमचक्रपूजासर्वाममनामाह सदात
नानानादानां नवरन्ध्रस्थितानां नाम महासामान्यरूपेणव्याप्तः
तदर्थनिरूपिणी अस्थिरस्थिरवेशनांख्यायारूपे दर्शाणिकैः कु
लकौलिकयोगिन्यस्सर्वसिद्धिप्रदायकाः इति । सदातनानां याव
च्छरीरभाविनानां नादानामविकृतस्पन्दस्पर्शनादध्वनिबिन्दु
शक्तिबीजानि हृत्स्वराणां नवरन्ध्रस्थितानां नवरन्ध्राणि न
वाधाराणि सहजेन तन्त्रगगनरूपत्वात् आधारस्वाधिष्ठानम
णिपूरकानाहत उनहवनुपप्रकाशकालविकाविशुद्धाज्ञा
नितत्रुक्तं स्वच्छन्दे आधारं स्वाधिष्ठानं मणिपूरमनाहतम् म

योगहृ
टी.
५८
५९

ध्यंमपद्मकर्णिकेवलं विकाचविशुद्धिकाम् आज्ञाचावनवकं विद्धिप
दचक्राणि विहीनकमितिनेशुद्धिरात्मनां महासामासमरूपेणम
स्वाद्यन्तरहितनिर्विशेषध्वनिलक्षणं सामान्यं समष्टिस्तद्रूपेण।
आहननादविभक्तो दशधा ध्वनिस्तद्रूपिणी अविकृतादिनादम
यस्तत्समष्ट्यमात्ररूपिणी सर्थः अस्थिरस्थिरवेद्यानामस्थिरवे
द्यानि कर्मेन्द्रियगोचरतया क्रियारूपाणि वचनादानगमनवि
सर्गानन्दाख्यानि स्थिरवेद्यानि ज्ञानेन्द्रियगोचराः शब्दस्पर्शरू
परसगन्धाख्यास्तेषामस्थिरस्थिरवेद्यानां द्वाभ्यां रूपैः प्रतिबिम्बभूते
दशारणिके: अन्तर्वर्गद्वयदशारणैराविष्कृतानीति शेषः कुलकौलि
कयोगिमतं एव कुलस्य देहस्यावयवभूतानि दशेन्द्रियाणि कु
लशब्देनोच्यन्ते तत्संबन्धात्तत्संख्यात्वाद्दशविषयाः कौलिकश
ब्देनोच्यन्ते तयोर्योगः संबन्धः कार्यकारणलक्षणो यासां ताः कुलकौ
लिकयोगिन्यः ननु भूतलिपिक्रमेक्रमप्राप्तो कवर्गचवर्गौ कथं
अन्तर्वर्गौ वस्मिन्दशारे व्युत्क्रमेणोच्यन्ते चतुर्दशारद्वयचक्रा
णां स्थितिरूपत्वाद्भूतलिपेर्मध्यमावयवत्वात् मध्यमाया स्थि
तिरूपत्वात् स्थितिक्रमोर्यवर्गव्यत्ययः अत एव तत्कारणभूतस्त
त्समध्यमानादमयमन्त्राकथनमस्य चक्रस्य सर्वसिद्धिप्रदाय
काः सर्वस्य स्वीकृतस्य ज्ञानेन्द्रियविषयजातस्य सिद्धिः प्रतीतिः
प्रमातृविश्रान्तिस्तल्लक्षणायाः प्रतिपादिकाः आसां ध्यानमा
ह एता वराभयकराः श्वेताभरणभूषिताः इति स्पष्टम्। सर्वा
र्थसाधकचक्रो मन्त्रिमाह स्वप्रथामननत्राणयोगाद्व्यर्थम
न्त्रके सर्वसिद्धिप्रदायास्तु चक्रे सर्वार्थसाधके इति। सर्वसि
द्धिप्रदायाः सर्वसिद्धिप्रदा देवीति विवक्षुः शक्तीशास्त्रोक्ताः मंत्रा
णां स्वीकृतनिवचनानां स्वप्रथायोगात्स्वस्य शिवात्मनः स्वस्माय
कस्य प्रथाशिवाहंभावाभावनात् तदेव मननत्राणं तद्योगाद्र्थी
द्व्यर्थमन्त्रके सर्वार्थसाधकपदानुकूलार्थवत्त्वशालिनि

यो॰ टी॰ ५६

शिवाशिवाहंभावभावनालक्षणमननात्सर्वेषांसाधकानाम
शेषपरमप्रयोजनमोहंसाधयतीतियोगात् सर्वार्थसाधकेचक्रेसंस्थि
ताइतिशेषः एतामवपदार्थद्युमतिगुरुः सरमतस्यक्रेशीमाह लोक
त्रयसमष्टीनांहेतुत्वात्स्वक्रनायिका त्रिपुराश्रीमहेशानीति। लोक
यतीतिलोकोलोकातेनेनेतिचक्षुस्तस्यालोकत्रयस्यमातृमानमे
यलक्षणस्यसमष्टीनांपरिपूर्णपरप्रमातृविश्रान्तिलक्षणानां
हेतुत्वात्त्रिपुराश्रीःपंचमचक्रेश्रीरूपेसत्यर्थः मंत्रशुद्धिमवाप्नुतः
वशित्वसिद्धिराख्याताप्रताः सर्वाः समर्चयेत्। मंत्राणांशुद्धिनी
मस्यकुलेविभ्रमत्वेचेत्यादिस्वर्वाकृरीत्यान्मतीपर्यन्तकलाबीजल
क्षणोस्मारणोनचिन्त्यया नभीवर्तेताहशीमंत्रमुद्रासाधकस्य
वशित्वंजगत्सविप्रसृतंजगत्सर्जनसंहारेवस्थायतत्वंस्यातन्याति
स्यतीति ताहशीपरशिवताधामेःसाचास्मिन्चक्रेवशित्वसिद्धिवि
तिपताःसर्वाःआवरणदेवताश्चक्रेशीश्रीसिद्धियुताःसमर्चयेत्
षष्ठचक्रपूजामेवामनामाह ऊर्ध्वाधोमुखवियादेविकुण्डलिन्याप्र
काशिताः कुलेस्थयोर्वहिर्भावात्कादिवर्णप्रथामयाः निर्गर्भयो
गिनीवाच्याः स्वरूपारूपवेशके सर्वरक्षाकरेचक्रेसविशेषकरूपताः
सर्वत्तायाःस्थिताश्चेति। ऊर्ध्वाधोमुखवियायदोहमतीत्यादिचतःश
नीशाकोणेत्रिकोणरीत्या अकुलपरश[illegible]प्राप्तयेऊर्ध्वमुखवियानर
याम्नवियाविश्वस्यहृदयेमूलाधारप्रविशन्त्याकुण्डलिन्याप्रकाशिता
अभिव्यक्तिताःकारणसत्वात् कुलेस्थयाकुलमकुललक्षणमात्
मानमेयरूपतत्त्वस्थयात्रिमीणेस्थयावहिर्भावात् कादिवर्णप्रथा
मयाः प्रतिविशिष्टान्तःसर्जनरूपतत्वत्रयमयमातृमानमेयलक्षणनि
माणोस्थयाकुलस्थपरशिवाद्वहिः प्रसृतयासमस्ततत्ववर्णगर्भिणा
कुण्डलिन्याककारादिदशावर्णप्रथारूपानिर्मितेत्यर्थः निर्गर्भयो
गिनीवाच्याः निर्गर्भयोगिन्यइतिवचनात् निर्गर्भापिमहादेविशिवयु
वीमगोचरइतिपूर्वोक्तनीत्याश्रेष्ठेनप्रथालक्षणःपरप्रमातृयोगाश्चा

संयोगोऽस्मो विषयेन्द्रियसंसर्गलक्षणाद्दशेन्द्रियवृत्तयश्चिन्मरीच
योनिर्निर्भयोगिमः स्वरूपावेशरूपके स्वरूपस्य साधकात्मनः प्रमा
तुरावेशः परशिवोऽहमिति मतिः आविशाहि लोके बालराजनमोऽहमि
ति पराहन्ताप्रथा तद्रूपे तन्निरूपके अत एव सर्वावेशकरे यत्र यत्र
मनो याति तस्मादितस्ततो नामार्गेण चेतस्य मस्पते प्रभोरिति विज्ञा
नभैरवभट्टारकोक्तरीत्या सर्वत्र तदावेशस्तदभेदेन स्वस्यैव स्फु
रणं करोतीति सर्वावेशकरे चक्रे षष्ठचक्रे सर्वरक्षाकरे काकेष्वा
रक्षतामन्त्रमिति वचनात् प्रतिकूलपदार्थाद्युपहतिपरिहारे रक्षाना
म सर्वस्माद्भेदप्रपञ्चलक्षणात्परिपन्थिनो रक्षा परशिवाभेदप्रती
तिरूपा तत्करोपराः परशिवाद्वैतप्रतिपादनपरत्वादुक्तषष्ठत्वा
त् सर्वज्ञाद्याः सर्वशक्तिरित्यादिश्च ततः शक्तीशात्मकाः स्थिताः तासां
ख्यानमाह एताः सरहस्य ज्ञानमालिकारेति । पुंप्रकृतिशिष्ठ
स्पष्टं नाम कुत्सितिपरस्यं चक्रेशीमाह मातृमानप्रमेयाणां पुरा
णां परियोधिनी त्रिपुरमालिनी ख्याता चक्रेशी सर्वमोहिनीति ।
पुरचित्स्पन्दनिवासात्मनि प्रमेयाण्येव पुराणि तेषां पुराणां परिपो
षिणी सर्वेषां स्वप्रथाप्रदानेनोपबृंहिणी अत एव त्रिपुरमालिनी
ख्याता निरुक्ता चक्रेशी सर्वसंमोहिनी अत एव तत्कृतमोहः स्वप्रा
देव हि मातृमानमेयरूपाभेदप्रथा तदुक्तं परापञ्चाशिकायां स्वा
गम्भूते भुभागे भुमायातत्त्वविभेदधीरिति विद्याशक्तिविशुद्धिं चसि
द्धिशाकाम्यसंज्ञिता मम एताः सर्वोपचारेण पूजयेद्देवताः क्रमादिति ।
मान्ताः पुंरूपवाच्याधिष्ठिताः विद्याः स्त्रीरूपवाच्याधिष्ठिताः अत एव
विद्याशक्तेः सौभाग्यविद्यावर्णवाच्यायाः षट्त्रिंशत्तत्त्वमय्याः प्र
कृतिस्तदतीतपरचितलक्षणा तद्रूपा शाकाम्यसंज्ञिता सिद्धिः कामना
नुरूपलक्षणं तदुक्तं महाकविभिः देवः संघातकठिनः स्थूलः सूक्ष्मो
लघ्वीरुक् व्यक्तोऽव्यक्तो नरस्त्रीति शाकाम्यैर्विभूतिस्थितिमत्ता देव
ताः सर्वज्ञाद्याश्चक्रेयीति सिद्धिमुद्रायुताः क्रमात्स्वप्रथमसमावरणदेवताः

पश्चाद्वक्रे कृते ततः सिद्धिमिति क्रमात् सर्वोपचारेण ज्ञातावेकत्वं सर्वो
पचारैः पूजयेदित्यर्थः समस्तवक्रेषु ज्ञानमेवासनामाह निरुद्धवायुसंच
द्बुस्फुरितग्रंथिमूलतः हृदयान्तरसंवित्तिः पुष्पपंचाष्टकमिता बीजा
रूपस्वरकलास्पष्टवर्णानुसारतः रहस्ययोगिनी देवि संसारदलनो
ज्वले सर्वरोगहरे चक्रे यजेद्वाग्देवताष्टकम् वशिन्याद्या इति । निरु
द्धयोः परिलुत्तेर्वा राचारयोर्वाह्योः प्राणापानयोः संघट्टात् कंदमाक्र
मवक्रपाः प्राणापानौ संयोज्य समभियुक्तवचनो क्रमेणैतत्पामूलादुत्थि
तायाः कुण्डलिन्यास्तेनां हृदयपर्यान्तं स्फुरन्ती संविदाकलामि
त्यभियुक्तवचनात् हृदयान्तरस्फुरन्त्या संविदैते निष्क्रामतः चित्तिः
स्थितिं वेवेतस्यै चेतनेन्द्रियकर्मत्वजीवः कलावदेवेशिसत्सरूप्य
ष्टकमिति स्वच्छन्दसंग्रहोक्तरीत्या सूक्ष्मपुर्यष्टकानां सूक्ष्मतयाऽगु
लेहत्वात् पुष्पमित्युच्यते हृत्पुण्डरीकपुरमध्यसंस्थितमिति ।
प्रकृत्याप्युक्तं शरीरविदष्टकरूपं सूक्ष्मशरीरं पुर्यष्टकं त
देवमनानां रूपेण पंचाष्टकं तु हि यं मातृकादेवी बीजयोग्या
त्मना स्थितेति परापंचाशिकोक्तरीत्या बीजरूपा आदिस्वरात्मका
रादि विसर्गान्ताः षोडशस्वराः कलास्ताभिः स्पष्टा अवर्गेण युता
वर्गाश्चकटतपयशास्तेषामनुसारः अवर्गः प्रथमो देवि वशिनीत
त्र संस्थितेत्यादिरीत्या स्वस्ववर्गस्वाद्यक्षरेणाथमं रेफमित्यादि वत्तः
शतीशास्त्रोक्तस्वस्वबीजानुसारतः क्रमात् स्वस्ववर्गान्ते स्वस्व
बीजमुच्चार्य पूजयेदित्यर्थः ननु च तद्दशकोणादिषु पूर्वोक्तचक्रेषु
देवतानां भूतलिपिमातृकास्वरनवकहादि पञ्च कचटतपवर्गा
मयत्वमुक्तं अष्टकोणादिदेवतानां किमिति पिष्टवर्गपाषसमय
त्वेनोक्तं उच्यते तत्तद्दशकोणादि चक्रेषु देवतानामकारादिभूत
लिपिवर्गमयता कथं ते नैव पिष्टवर्गपाषसमयत्वमष्टकोणादे
वता बीजमनुक्त्वमष्टवर्गान्तं बीजरूपस्वरकलास्पष्टवर्णानुसा
रतः इति तु वशिन्यादि देवतास्तु नामैव कथ्यं ते रहस्ययोगिनीस्त्व

यो॰ हृ॰
टी॰
८॰
60

मन्त्रारहंसंपुटषट्कं तेन सह योगः संबन्धः कार्यकारणलक्षणो यासां ता-
ताः वशिन्याद्या योगिन्य अतएव सर्वपापानि मायाशुचिविक्लेशरूपसंसारो-
रोगास्तत्संहरणात् तत्समतया षट्कमयत्वाद्धोमनीयाः संसाररल
नेत्रवले अनिमाशुचिविक्लेशरूपभेदः संसारस्तत्समुद्दलनेन हरणोनीत्व
लेपरप्रकाशत्वात्मत्वात् अतएव सर्वरोगहरे चक्रे सर्वपापानि मायाशु-
चिक्लेशरूपसंसाररोगास्तत्संहरणोद्युक्तः प्रभावशालिनि सप्तमचक्रे
संस्थिता वशिन्याद्याः अष्टौ प्रथमो देवि वशिनीत्यर्थः संस्थितेति ततः
शतीशाद्याः आकाराः पूजयेदिमन्त्रवर्गः तासां ध्यानमाह रक्तवर्णा वरा-
दाभयस्फुरिताः पुस्तकजपमालाश्च दधाना सिद्धियोगिनीरिति । सि-
द्धः परशिवस्तेन योगः संबन्धः षट्कात्मतया तत्र जीवस्य जीवता
पादनलक्षणात्मकत्वात् शिष्टस्य शुद्धविद्याविशुद्धिं चतुर्का सिद्धिं
महेश्वरि ईश्वरीत्रिपुरासिद्धिं पूजयेद्धि तत्परोरिति अर्हन्तोदन्तयोरे-
कमिति विद्यानियतामिति पराप व्याप्तिकोणा करीत्याशिवाद्धे नव
ध्यात्लक्षणायाः शुद्धविद्यायाः विशुद्धिः ज्ञानेन ज्ञानमालोकयप्रश्ना
ज्ञानं परिसमेप्सुरिति वचनप्रतिपादितरीत्या ज्ञातृज्ञानविभागशून्या
निर्विकल्पबोधलक्षणा परशिवसमावेशलक्षणरूपिणी अतएव भुक्ति
सिद्धिं विश्वंभरादिभूम्यन्तचमत्कारसारमयम् महीयसे महाभो
क्तमहेशाय निवेदयेदिति सम्भिष्टुक्तोऽकरीत्या महाभुक्तिविश्वविध
यिणी स्वसाधकस्य सिद्ध्यति तां चेश्वरीं सप्तमचक्रे ईश्वरी त्रिपुरासि-
द्धिमातृमानमेयरूपिणीं त्रिपुराणामुत्तीर्णपिवालयलक्षणां सि-
द्धिं चित्स्वरूपिणीं साक्षात्कृतेमेः पूजयेदिति अष्टमचक्रे पीठपूजां स-
वासनामाह शक्तित्रयात्मिकाविविद्धामप्रसराः पराः संवित्तिप्र
कलारूपाः परमातिरहस्यगाः पूर्णापूर्णस्वरूपायाः सिद्धिहेतुरुपश्चवि
सर्वसिद्धिमयात्मके चक्रे त्वाधूयभूषिते स्थिताः कामेश्वरीपूर्वाश्चतः
सः पीठदेवताः इति । शक्तित्रयात्मिका इच्छाज्ञानक्रियात्मिकाः वि-
द्धामप्रसराः विदः संविदः अविकादीक्षादिधाम्नाकिरणानां वामामा

पूर्णोदरोल्लासात्मकानां पूर्णेशीवषठीचमित्रीचाख्यानां प्रसराः स्पन्दभूताः
सर्वावरणप्रधानभूतत्वात् संवर्ताग्निकलारूपाः संवर्ताग्निर्विश्वव
स्मरः परशिवस्वरः तस्य कला हकारस्तद्रूपाः तदात्मिकाः शान्ताश
त्मावयवभूतत्वात्परमातिरहस्यताः परमः सर्वावरणदेवताभ्यः
सर्वावरणप्रधानरूपत्वात् अतिरहस्यामनोत्थत्वं हकाराधामव
यपरिस्फुरत्परविद्याधारभूतत्वादत्यन्तगोपनीयाः पूर्णापूर्णास्व
रूपायाः पूर्णापरमशिवसमावेशरूपत्वात् पूर्णास्वरूपायाः पूर्णेता
त्मन विश्वविषयात्सिद्धिस्ताहश्याः सिद्धिहेतुः तदात्मिकायाः स
वेश्यत्वात् शिवान्तस्य परशिवविश्रान्तिलक्षणायाः सिद्धिर्वी
मन्तु किर्हन्तत या सर्वसिद्धिमयात्मेनिरुक्त सर्वसिद्धिमयताभिप्रा
ग्रथभूषिते कामेकामेश्वरयः आयुधैः शरचापपाशाङ्कुशैरुपमि
मिथुनीकृतेः पश्चिमोत्तमयोरस्य दक्षिणाशाक्रमेणाग्नित्यादि वतः
शातीशास्त्रोक्तरीत्यालंकृते तेन आयुधानां कामेश्वर्याकारणा
न्तःपातित्वात् सिद्धिचक्रेष्टमे स्थिताः कामेश्वरीपूर्वाः कामेश्व
रीमत्रकोणाइत्यादिवतः शातीशास्त्रोक्तास्तत्रस्थैः पीठदेवतास्त
पीठानि कामरूपजालन्धरपूर्णगिर्योड्डियानाख्यानि मनोज्ञत्वं हकारचि
तलक्षणानि तेषु संस्कारान्तादेवताः परप्रकाशावयवभूताः वाम
मेषरोद्रु विकामित्रीशावहीशाद्रुमीशचर्यानाथषष्ठीशा कश्याः
उड्डियानावयवभूते श्चाज्ञानक्रियाशान्ता मयकामेश्वरी
वज्रेश्वरी भगमालिनी महाविद्वरस्त्र न्द्ययत्र तस्य इति वववक्र
देवतया सह संकलनादष्टमचक्रेत्विति स्वपवकामेश्वर्याद्याः सा
मुद्राः आयुधदेवतानां ध्यानमाह आयुधात्रपिनकामाः स्वायु
योज्वलमस्तकाः वरदाभयहस्ताश्च हस्ताध्यानफलप्रदाः त्वदी
याश्च मदीयांश्च शीवश्च विधायिन इति । आयुधाः आयुधादि
देवताः ज्ञानस्वतानेलिङ्गप्रयोगः स्वायुधोज्वलमस्तकाः स्वापि
छत्रायुधपरिकल्पितमस्तकाः महापद्मवनान्तः स्थाकारणान

योगि॰
टी॰
८१

61

न्दविग्रहाम् मन्दकोणप्रयां देवीमिच्छाकामफलप्रदाम् भवतीमि
ति पूर्वेणैकरीत्या महापद्मवनान्तःस्थानाश्रितेश्वरस्य विश्वगुरोर्मित्रेशा
ख्यायाश्च नाश्रितकलायास्तत्संबन्धिनो बाणाः धनुः पाशांकुशाः श्री
वषण्विद्यामिन्यर्थः । तदुक्तं चतुःशतीशास्त्रे मदनैर्मदनो भूत्वा
पाशांकुशधनुःशरैः क्षोभयेत्स्वर्गभूलोकपातालतलयोषितः । तथै
व शाक्तैर्दैवैः शिवविग्रहीकृतविग्रहः क्षोभयेद्देवगन्धर्वसिद्धविद्याधरा
नपि इति स्पष्टमत् पूर्वं चतुःशतीशास्त्रे नोक्तत्वाच्छक्तिबीजा
न्युद्धरति वाग्भवं मांसमेदोस्थिमज्जाणान्तः सुरेश्वरि द्वितीयस्व
रसंयुक्तापतं बाणाख्यं तृतीयकमिति । श्रीकण्ठादिमातृपरिपाट्यां त्व
गादीनां पञ्चानां धातूनां च वर्णादयः पञ्चपेते द्वितीयस्वरसंयुक्ता
बाणाश्चाकारो द्वितीयःस्वरः सामर्थ्याद्विन्दुरपि लभ्यते तृतीयबा
णास्तत्संबन्धिनो बाणबीजानि तत्र यकारस्त्वगात्मको रेफो
रक्तात्मकः लकारो मांसात्मकः वकारो मेदःस्वरूपः अस्थिमज्जा
शकोस्थिमज्जयोरुपरिस्थितेन शुक्रात्मकेन सकारेणापीति व
न्तःशतीशास्त्रेप्युक्तानां कामेश्वरबाणबीजानामादौ वर्णेणाद्यो
संयुक्ते द्वीलक्ष्मयोरित्यादिना स्वच्छन्दसंग्रहोक्तत्वादागमान्तरे
षु प्रसिद्धत्वाच्चाद्योंकारः क्रियते वामादीनां पुराणां तु जननी
त्रिपुराम्बिका परस्तात्तन्त्ररूपत्वादिच्छासिद्धिं मे देहि ईश्वरि एताः स
र्वोपचारेण पूजयेत्तु वरानने इति । वामादीनां वामाज्येष्ठारौद्री
ख्यानां मित्रेशादिरूपाणां पुराणामिच्छाज्ञानक्रियामयविमर्श
शक्त्या च कामेश्वर्या यथाधिष्ठानत्वात् पुरुषाद्भावाख्यं तेषां त्रिपु
राणां जननी समष्टिरूपत्वाद्विकाशक्तिरेतत्रिपुराम्बिकानिरु
क्तचक्रेश्वरीत्यर्थः । स्वेच्छयैव जगत्सर्वं निगिरन्तद्गिरस्यपीमाज्ञा
वतारोकरीत्या परस्य शिवस्य विश्वमज्जनसंहारलक्षणस्वान्तमल
ताणोच्छासिद्धिरेतदर्थकसृष्टिमूर्ति अतः सेयमिच्छासिद्धिरसि
न्वेकस्थितेत्यर्थः एताश्चायुधदेवताः कामेश्वर्याद्याः चक्रेश्वरी

द्विगुताः सर्वोपचारैर्गंधादिभिः पूजयेत् नववक्रपूजां सर्वकामनामा
ह सर्वानन्दमये देवि परब्रह्मात्मके परे चक्रे संवित्तिरूपा च महात्रिपु
रसुन्दरी स्वेशाचारेणसंपूज्यत्वहन्तेदन्तयोः समा महाकामकलारूप
ति । आनन्दं ब्रह्मेति ध्यजनादिति जातस्पैवानन्दस्यचामासानन्दा
त्रिमात्रामुपजीवयन्तीति श्रुतेः सकामसर्वानन्दसमष्टिभूतपरानन्द
मयत्वात् परब्रह्मात्मकेन परेवपरे विश्वातीतोपि परशिवस्य नन्दमयत्वा
श्चक्रे नवमे संवित्तिरूपा स्वसंविधिपुराटे देवी लोहिमं तदिमम्पृश्मा
मिममिषुक्तोत्करीसावेदकवेद्ययोरहन्तेदन्तयोस्समामस्यमयस्या
संवित्तिर्महात्रिपुरसुन्दरी पूर्वोक्तनिर्वचना महाकामकलारूपाप्र
काशविमर्शसामरस्यरूपा बिन्दुत्रयमयहार्धकला महाकामक
लाप्रकाशविमर्शव्यासमासमयबिन्दुत्रयहार्धकलातद्रूपावि
न्दुमंकल्पवृक्षे चेत्यादिचतुःशतीशास्त्रोक्तरीत्या स्वेशाचारेणसंप्र
ज्ञापद्वयत्रमनस्तुष्टिर्मनस्तैर्वयायरयेत् नत्रतत्रपरानन्दस्व
रूपसंप्रकाशात् इतिविज्ञानभैरवमहातंत्रोक्तरीत्या निजेच्छा
नुरूपेरिन्द्रियप्रीणनैः द्रव्यैः परिस्फुरत्परमानन्दानुसन्धानत्व
त्वेन स्वेशाचारेण स्वसंविदेवतामाराधनीयेत्यर्थः प्राप्तिसिद्धिमाद
तोऽविद्यादिसिद्धिदा महामुद्रामयी देवी पूज्येति । काद्यजाद्येति
कमादिति पूर्वोक्ताः पीठाश्चत्वारः विद्यावाग्भवकामराजशक्तितृ
तीयबीजात्मकाश्चादिशक्तिदेवताः कामेश्वर्याद्याश्चतस्रः तेषां तु
प्रीतीतपरपरशिवविश्रान्तिलयलक्षणां सिद्धिं ददाति प्रापयती
ति प्राप्तिसिद्धिः महामुद्रामयी महामुद्रा सर्वमुद्रासमष्टिभूतत्वात्
योनिमुद्रातन्मयी पूज्येत्यर्थः पञ्चदशात्मिकात न्नतिथिमयी नित्या
नवमभैरवी परेति । पञ्चदशात्मिका पञ्चदशाक्षरी विद्या याच्या
भूतापञ्चदशभूतगुणात्मिका तन्नतिथिमयी प्रतिपदादिपञ्चदश
परस्परूपानित्या निजप्रभवमयानित्यनिरुपमाकारापरानवमी भैरवी
परामूलविद्यास्वरूपा नवमचक्रेश्वरी विद्यायाः षोडशाक्षरात्मिका

मूलदेवी नवमचक्रेश्वरीमप्युक्त्वेत्यर्थः प्रतिचक्रे तत्तन्मुद्रास्तच्चक्रसंकेत
चोदिता इति । प्रतिचक्रं त्रैलोक्यमोहनादिष्वेकैकस्मिंश्चक्रे चक्रसंके
तचोदिताः योनिः प्राचुर्यतः सैषा सर्वसंक्षोभिकाद्युनरित्यादिना चक्रसं
केतचक्रे विहिताः सर्वमुद्राः सर्वसंक्षोभिण्याद्याः तत्तच्चक्रमुद्रास्तत्त
च्चक्रे मुद्रा इति योजनम् निमित्तिकत्वादिकाम्येव काम्यकर्मानुसारतः
चतुरश्रान्तरालेवा त्रिकोणेवा यजेत्क्रमात् इति । कामेश्वरी भगमालि
न्यो वरणान्तः पातित्वान्मध्यत्रिकोणस्य वामकोणाये सिद्ध्यति रुक्ता
शिष्टा नित्यक्लिन्ना भेरुण्डा वह्निवासिनी महाविद्येश्वरी हती त्वरि
ता कुलसुन्दरी नित्या नीलपताका च विजया सर्वमंगला ज्वालामालिनी
चित्रा चेति चतुः पातीणां हीकामयोदशनित्यास्त्रिकोणे वाश्रीचक्र ।
मध्यत्रिकोणे वाश्रीचक्रमध्यत्रिकोणे का चतुरश्रान्तराले वा काम्यक
र्मानुसारतः वश्यादिकाम्यकर्मानुरूपवर्णध्यानपुष्पादिभिः यथो
क्तचक्रस्य कर्मविधानविषयत्वः चक्रपूजामुपसंहरन् कुलदीपनिवे
दनमाह अलिनापिशितेर्गन्धैः पूपैरराध्य देवता चक्रपूजां विधाय
ये स्यं कुलदीपं निवेदयेत अन्तर्बहिर्भासमानं स्वप्रकाशोज्वलं प्रिये इति ।
अलिना हेतुना पिशितपूपगन्धश्चाघः सप्तार्थः देवतास्त्रैलोक्यमोह
नादि वेदवान्तरचक्रगताः अलिपिशितगन्धपूपैराराध्य कुर्वीत
शिष्टा चक्रपूजां विधाय कुलदीपं कुलषट्त्रिंशत्तत्त्वसमुदायरूपश
रीरं तद्दीपनं ततो हृदयपद्मान्तः स्फुरन्तीं संविद्दीकलामिममभियु
क्ताक्रोशिता हृदयान्तर्भासमानं संविक्कलारूपदीपनमेवेन्द्रियद्वा
रा बहिरथेषु तद्रूपेणाप्येव स्वप्रकाशोज्वलं तत्र प्रमाणनिरपेक्षप्र
तीतिकं निर्वाणरहितं च निवेदयेत् पुनः प्रसङ्गमुक्त्वा तथा तेनैव क्र
मेणान्तः संविद्विश्रान्तिस्तन्निवेदनं नाम पुष्पाञ्जलिं ततः कृत्वा ज
पं कुर्यात्समाहित इति । संयम्येन्द्रियसंज्ञानं प्रोक्षरन्नादसान्तरम्
एष एव जपः प्रोक्तो न तु वाग्जपो जप इति । प्रमाणवचनोक्तरीत्या
समाहितो नियतेन्द्रियो नादरूपमंत्रोच्चारलक्षणं जपं कुर्यात् पि

ष्ठस्यंष्ठ जपप्रकारमाह कूटत्रयमहादेवि कुण्डलेत्रितयेपि च व
क्राणांपूर्वपूर्वविभानादरूपेणयोजनमिति । कूटत्रये कूटानां वाग्भ
वकामराजशक्तिबीजानांत्रये कुण्डलीत्रितयेपि च कुण्डली
त्रयमाधारे तत्राधारं च व्द्विन्दुस्थाने च परिकीर्तितमिति स्वच्छन्द
संग्रहोक्ते स्वाधारहृदयभ्रूमध्येषु स्थितानां बीजत्रयाणां शिवरिवर्त
कामकलान्तर्गतमध्यगार्धकलारूपाणां वह्निसूर्यसोमकुण्डली
नांत्रये च क्राणांपूर्वपूर्वविभागश्च कुलेविष्णुसंज्ञे चेतत्प्रोक्ता कुलादिवि
न्दुनत्स्थानेषु नवस्वभावितानां त्रैलोक्यमोहनादिनवचक्राणां ।
मेकैकस्मिन्वीते कुण्डलिस्मावत्रिशक्तिशोधिभक्त्ययोजितानां नाना
द्रूपेणयोजनं त्रैलोक्यमोहनादिनवचक्रस्यादित्रयस्याधारस्थ
वह्निमण्डलस्थितवाग्भवशिवरवर्तिकामकलान्तर्गतमध्यार्ध
कलारूपवह्निकुण्डलिस्मृत्यानोदितहृत्स्थकामराजबीजपर्य
न्तव्यापिनादमयताभावनया वाग्भवबीजजपः सर्वसौभाग्यप्रदा
यकादिचक्रत्रयस्यहृदयस्थितसूर्यमण्डलान्तर्गतकामरा
जशिवरवर्तिकामकलान्तर्गतहार्धकलारूपसूर्यकुण्डलि
स्मृत्यानोदितबिन्दुस्थानगतशक्तिबीजपर्यन्तव्यापिनादमयता
भावना कामराजबीजजपः सर्वरोगहरादिचक्रत्रयस्य बिन्दुस्थाने
न्दुमण्डलान्तर्गतशक्तिबीजशिवरवर्तिकामकलान्तर्गतहार्ध
कलारूपसोमकुण्डलिस्मृत्यानोदितब्रह्मरन्ध्रोपरिस्थितशि
वतत्वातीतसमनासीमपर्यन्तव्यापिनानादेनमहोन्मनाल
यभावनं शक्तिबीजजपप्रकारइत्यर्थः तदुक्तमभियुक्तैः पिण्डवा
मदविस्तरस्य महतः संस्कारशेषास्थितिर्नीत्वा सोतवदेविमू
र्ध्निसमनासीमान्तमुल्लंघयन् चण्डाकाराइतिवक्रमेणविर
मन्ननामनीयसत्वनीमाजिद्म्यरिविरश्मामनुपमांमूर्तिंप्र
णौमि समेतप्त्वैवकृत्स्नम् न तु दीपाकारोयमात्रस्खललाटेवृत्तस्थ
तस्मादिविश्व्यपि बीजेषु उन्मनीपर्यन्तउच्चारः किमिति नोक्ता

प्राणादीनुन्मनान्तानां द्वादशानां सर्वत्र साधारण्येन वर्णकं शवत्वादि-
मतत्राह तेषु प्राणाग्निमायार्णाः कलाबिन्द्वर्धचन्द्रकाः रोधिनी नादना-
दान्ताः शक्तिव्यापकयान्विताः समनाचोन्मनाचेति द्वादशान्ते स्थिता-
नाः श्रिये मूलकुण्डलिनीरूपे मध्यमेचततः पुनः स्वहृत्कुम्भे च वि-
श्वस्य स्थितिरूपेतथेश्वरि केवलनादरूपेणोन्मनारयाजनम् श-
बलाकारके द्वितीये द्वादशे कलेति । तेषु त्रिष्वपि बीजेषु स्व-
र्नेषु प्राणो हकारः अग्नी रेफः मायार्णमीकारः सर्पवकलानन्तरं क्ष-
कामकलाविलासे बिन्दुरहंकारात्मा रविरेतन्मिथुनसमरसा-
कारः कामः कमनीयतया कला वदहनेन्दुबिन्दुविग्रहौ बिन्दूर-
तिबिन्द्वादयो नवोन्मन्यन्ताः पूर्वोक्तलक्षणा एते प्राणादय उन्म-
न्यन्ताः द्वादशस्थिता मूलकुण्डलिनीरूपवाग्भवबीजे यामात्रा
त्रयस्सीलतातन्तुलसनन्तस्थितिस्पर्शिनी वाग्बीजे प्रथमे स्थिता-
नातवर्तामन्मदेतेवयम् शक्तिः कुण्डलिनीति विश्वजनन-
व्यापारबद्धोद्यमा ज्ञात्वेत्यनपुनः स्पृशन्ति जननीगर्भमर्भकत्वे
नरात्ति लब्धुस्तोत्रोकरीसा विश्वस्य हृत्कुम्भे मध्यमे कामरा-
जबीजे विश्वस्य स्थितिरूपे संहारस्य क्षोमं ध्यस्यत्वात् केवल
नादरूपेणनारायन्मन्यन्तावयवोच्चारवलनादरूपेण तरत-
रयोजनम् उच्चारक्रियाविशेषणं वाग्भवबीजशिखरवर्तिन-
नादं स्पृष्ट्वा तत् कामराजबीजपर्यन्तमुच्चरन् कामराजबीजशिख-
रवर्तिनं नादं बिन्दुस्थानगतं शक्तिबीजपर्यन्तमुच्चारेन स्पर्शः
शकलाकारके पतद्बीजद्वयनादरूपयोगादिन्मिश्ररूपे तृती-
ये शक्तिबीजे द्वादशी कलोन्मनी स्थिते त्यनुषङ्गः तेन प्राणाद-
यो द्वादशकलास्त्रपि तृतीयबीजशिखरे स्थिता उच्चार्या इति ल-
भ्यते कोऽत्र यद्यपि वाग्भवकामराजशक्तिबीजानां त्रयाणाम-
प्यन्ते प्राणाग्निमायाबिन्द्वर्धचन्द्ररोधिनी नादनादान्तशक्तिव्या-
पिका समनोन्मन्यास्सह द्वादशकलावर्णकं शाक्तान्ते तथापि वा-

।भवकामराजबीजयोः प्राणादयस्तमम न्तास्तथापि तयोः स·
स्थितिस्थितिरूपत्वात्तत्र विश्रान्तौ तौन्मनीपर्यन्तमुच्चारः अतोपि न
विरोधय इत्यर्थः जपकाले भावनामाह सूक्ष्मचक्रस्य देशानि श्रव·
स्थापञ्चकं पुनः विश्ववत्तममरूपं च भावयन्मनसा जपेदिति । प·
तानि विद्यावयववेष्टुभावानि शिविपदचित्ररूपे मण्डलेः सू·
मपञ्चक ध्यायतो नुत्तरे सूक्ष्मपरं व्योमतत्त्वमेवेदिति विज्ञा·
नेभैरवभट्टारकोत्करीमापूर्णमचक्रस्य रूपं ज्ञेयं अवस्थापञ्चकं
जाग्रत्स्वप्नसुषुप्तितुर्यातत्त्वातीतात्मकं जाग्रदादीनां स्वरूपं
वक्ष्यति विश्ववत्तममरूपं च वक्ष्यति सूक्ष्मानाख्यानानि स्वरूपाणि
क्रमेणाह अग्न्यादिद्वादशान्तेषु त्रीन्त्रीन्स्यक्षावरानन्ते सूक्ष्म
त्रयं विजानीयादेकैकान्तरतः प्रिये इति । एकैकमष्टद्वयो
द्वयोरन्तर इत्यर्थः अग्न्यादिः अग्नेरेफः तदादिद्वीन्त्वी त्र्यष्ट सकला
सूक्ष्मत्रयं षट् सूक्ष्माणि विजानीयात् कोयंः हकारमायातर·
योमध्ये रेफमायार्धचन्द्रयोर्मध्ये विन्दुमर्धचन्द्रनादयोर्मध्ये रो
धिनीनादशक्त्योर्मध्ये नादान्तशक्तिसमनयोर्मध्ये व्यापिकाख
मनोर्ध्व उन्मनानामिति षट् सत्कात्त्रेफविन्दुरोधिनीनादाः सूक्ष्मा
पिकाख्यानेषु पञ्चसु शिविपदानि विचित्ररूपे रिमादिपूर्वोक्तरी
त्या वर्हिर्वहिर्गतचन्द्रकस्तहरूपाणि पञ्च सूक्ष्माणि भावनीया·
नीमर्थः षष्ठोन्मनाख्यानेन पञ्च व्योमतत्त्वमेवेदिति विज्ञान
भैरवभट्टारकोत्करीमीव व्योमतत्त्वः सूक्ष्मो ज्ञेयमिसुमषट्षोडशः
सूक्ष्मत्रयात्परस्थाने महाशून्यं विभावयेदिति । परस्थाने महा·
शून्यं निराकारं भावयेदित्यर्थः इदानीमवस्थापञ्चकभावनाक
मोपरिवहन्त्वादेजागरितावस्थाभावनामाह प्रबोधकारणस्या
थ जागरत्वेन भावनम् वक्ष्ये देवि महाजाग्रदवस्थात्विन्द्रियवृत्यो
रिति । इन्द्रियवृत्ये ज्ञानकर्मेन्द्रियैर्दशभिः जाग्रद्व्यवहारः जागर
णं प्रबोधो जागरस्य स्फुटचपते तत्कारणस्य प्रकाशस्य जागरत्वेन

का०ह० टी० ६४
66

भावनम् अन्तःप्रकाशकेवल्पेतार्तीयबीजवर्तिनिरेफमहाजाग्र
द्वस्थामयकालिकनिद्राहयलक्षणापरप्रबोधदशाभावनीय
मर्थः स्वप्नभावनामाह अन्तैरेः करणैरेव स्वसमायावबोधनः
गलदेशेऽस्तीति। बाह्येन्द्रियविरतैरान्तैरेःकरणैर्मनोबुद्ध्यहंकारवि
ताख्यैरेवमवहारःप्रमातुःस्वस्वःसमायया तार्तीयस्थानेच तदर्थ
सरेणावगतरोधनलक्षणावस्थ मर्थःगलदेशस्वमस्य स्थानम्
सषुप्तिभावनामाह सषुप्तिस्तु लीनपूर्वसंवेदनम् अन्तःक
रणवृत्तीनां लयतो विषयस्य तु पूर्वाणां नाविलोमेन भ्रूमध्येवि
न्दुमस्थितेनेति। स्वमेविद्यमानानामन्तःकरणवृत्तीनां लयतः स
र्वेन्द्रियोपरतिः सषुप्तिरितिलक्षणं अतोहि लीनपूर्वस्पदेहा
दिप्रकोडीकृतस्य लीनस्यैवस्थितस्य स्वस्यात्मनोवेदनेप्रकाश
नेभवति अत्रैवमहमस्वाप्समितिहिपश्चात्तुरवमर्यस्यात्मरूपंप
रामृश्यते मध्यसषुप्तिःविषयस्य तु विषयतार्तीयंबीजंविश्वस्था
मिस्थानत्वात् तस्य पूर्वाणांनाविलोमेन मायाबीजमहेशाति
मादनं च क्रमसंयुतम् इन्दुबीजं केवलं तदुत्पादि संहारक्रमयोगत
शक्तिबीजंसमुद्धरेत इत्यनशातीःशातीशाद्वो क्रमसंहारक्रमो हृ
तानां शक्तिबीजवर्णानां विलोमक्रमेणापरिपाट्या भ्रूमध्येविन्दुस्था
स्थितानां भ्रूमध्यस्थानस्थितमहो लेखोर्धविन्दोः स्थितानां भावनीयेत्य
र्थः तुरीयभावनामाह तुर्यरूपं तस्यवावचनतावादस्तस्मान्महः चै
तन्याभिव्यक्तिहेतोस्तनादरूपस्य वेदनमिति। चैतन्यस्यसंविदोभि
व्यक्तेःपरामर्शस्य हेतोःनादरूपस्य पूर्वोक्तलक्षणस्य वेदनमभिव्य
क्तिस्तुरीयरूपं तस्य तुरीयरूपस्यावतार्तीयबीजेवृन्तावादेः शता
र्धमवचनश्रादिशब्दाद्योदिनोनादे गृह्यते तेनसंग्रहः तार्तीयबी
जशिरवस्थर्धचन्द्ररोधिनीनादेश्वस्यात्मचैतन्यस्याभिव्यक्तिकारण
नादलक्षणात्मकं तुरीयतुर्यभावनीयमित्यर्थः तुर्यातीतभाव
नामाह तुर्यातीतं तु अवस्थानंनादान्तादिस्थितं प्रिये अत्रैवज

पकालेनपश्चावस्थास्मरेद्धयइति । तर्थातीतंयतोवाचोनिवर्तन्ते
अप्राप्यमनसासह आनन्दोब्रह्मणोविद्वानित्युपनिषद्रुक्तरीत्यामनो
तीतपरानन्दस्वरूपंपरावस्थानंनादान्तादिस्थितंविलोमक्रमेणोवा
स्ववस्थानस्थितंनादान्तशक्तिव्यापिकासमनोन्मनान्तस्थितंत्वा
थीतीतंभावनीयमित्यर्थः अत्रैवशक्तिबीजपदपश्चावस्थानस
न्यानपूरःसरंविद्याजपकरणंवयानतिनिपुणः इदानींसर्वपुटविशु
वभावनान्तोविवदन्नादौप्राणविशुद्धभावनामाह योगप्राणात्मम
नंसाविशुद्धंप्राणमन्त्रकमिति । प्राणस्यककारात्मनः वाय्वोरात्मनो
यपूर्वमनसस्सम्योगः प्राणविशुद्धमित्युच्यतेतदुक्तंस्वरैतन्त्रेशिखा
न्मप्राणमनसासंयोगप्राणेकेविन्दुरितिमन्त्रविशुद्धभावनामाह
आधारेस्थितनादेतुलीनंतुज्ञात्मरूपकम् संयोगेनवियोगेनम
ज्ञाणोनामदेहेश्वरि अनाहतायाधारान्तनादात्मत्वविचिन्तनम् वि
शुद्धमिति । आधारान्मूलाधारादुत्थितेनवायुनानादेविन्द्वादि
शिवरवर्तिमात्मरूपकमात्मनेस्पष्टरूपसंविदात्मकंलीनंनादे
नैकरसीभूतंतुज्ञात्मज्ञाणोनावाग्भवकामराजशक्तिबीजानांवि:
योगेनमायासद्रूपेणसंयोगेनतृतीयबीजेनचानाहतमध्याधारान्ते
अनाहतंहृदयस्थानंआधाराणांसर्वेषामन्तस्थानंब्रह्मरन्ध्रंत
सर्वान्तमन्त्राणांशरूपस्वन्त्रेणोच्चारितः अनाहतायाधारान्तमि
तियावत् नादात्मत्वविचिन्तनंनादस्यपदरूपत्वविभावनेविषु
वंसंत्रस्तकमितिशेषः कोणः मूलाधारस्थितवाग्भवशिवर
वर्तिनंनादंहृदयपर्यन्तमुत्थापितत्रस्वयंलीनोभूत्वासात्मतया
तुसंस्थानंमन्त्रविशुद्धमित्यर्थः तदुक्तंप्रपञ्चतन्त्रे आत्मनोनादस
थेत्वलयंसम्पन्नंमन्त्रतः अकाराकारवर्णादिसंयोगेनवियोग
नः हृदयादिविल्वान्तंचविशुद्धमंत्रसंस्तकमिति नाडीविशुद्धभाव
नाम्नाह नादसंस्पर्शान्नाडीविशुद्धेमुच्यतेद्वादशाग्रस्थिभेदेनवर्णा
न्ताउन्तरेभ्रियइति । वर्णाद्बीजत्रयशिवरवर्तिकामकलाहरा

यो॰हृ॰ टी॰ ६५ 65

त द्वादशग्रन्थिभेदेन मूलादिषट्चक्रग्रन्थीभित्वा तेन नादस्यान्तरे सुषु
म्णामध्य मार्गेण नादं सम्स्पर्शात्त्रिबीजशिखरवर्तिनो नादस्य मूलाद्भ्रू
ल्लग्नान्तसुषुम्णातः संस्पर्शनाडी विषुवमुच्यते तदुक्तं शैववंतत्रे सुषु
म्नं मध्यत्रिशूलेन भित्वा ग्रन्थीरनुक्रमात् नादनाडीसमायोगान्नाडी
विषुवविभावनमिति प्रशान्तविषुवभावनामाह नादयोगः प्रशान्त
स्तत्प्रशान्तेन्द्रियगोचरम् वह्निमायाबकालं च चेतनामर्धचन्द्रक
म् रोधिनीनादनादान्ता शक्तौ लीना द्विभावयेदिति । वह्निरेफः ।
मायासीकारं कालं तन्मध्यवर्ती सपरार्धकलासंबन्धिरेखो ग्रचे
तना बिन्दुः वेद्यस्य संस्कारः वेदनरूपत्वात् तदुक्तं परापञ्चाशिकायां
बिन्दुर्वेद्यस्य संस्कारो विसर्गः सर्गमित्यसाविति अर्धचन्द्ररोधिनीना
दनादान्ताः पूर्वोक्तलक्षणाः शक्तौ पूर्वोक्तलक्षणायां लीनां विभावये
त यतोयं प्रशान्तो नादयोगोयं पश्चास्तदतीतशक्तिलयलक्षणः अ
तः प्रशान्तेन्द्रियगोचरं सकलेन्द्रियातीतविषयं तत्प्रशान्तविषु
वमित्यनुषङ्गः तदुक्तं शैववंतत्रे अकारोकारवर्णौ च मकारं बि
न्दुमेव च नादनादान्तसंतेतं सव्यापकालादिभिः क्रमात् सप्तमं शा
क्तिमध्ये तु शिखान्त्यानवि चिन्तयेत् प्रशान्तं तद्धि जानीयात्प्रशान्ते
न्द्रियगोचरमिति शक्तिकालविषुवयोर्भावनामाह विषुवं शा
क्तिसंज्ञं तु तदूर्ध्वं नादचिन्तनम् तदूर्ध्वं कालविषुवमुन्मनान्तम
हीयसीति । तदूर्ध्वं शक्तेरूर्ध्वं समनान्ते नादस्य चिन्तनं शक्तिवि
षुवम् तदूर्ध्वं समनाया अप्यूर्ध्वं नात्र कलाभानमिति स्वच्छन्दसं
ग्रहोक्तरीत्या कालातीतोन्मनान्तं नादस्य चिन्तनं कालविषुवं त
दुक्तं शक्तिमध्यगतो नादः समनान्तं प्रसर्पति तच्छक्तिविषुवं प्रो
क्तमुन्मना कालसंहितमिति तत्र कियता कालेन नादतत्त्वं शोद
यन्तीमाह मुनिचन्द्राष्टदशभिस्त्रुटिभिर्नादवेदनमङ्गति । स
ङ्येन रेसमासीने या वस्पन्दति लोचनमिति तस्य त्रिंशत्समो भाग
स्त्रसरः परिकीर्तितः तत्सरस्य शतांशस्तु त्रुटिरित्यभिधीयते रु

तितं त्रान्तरोक्तरीत्यानिमेषस्य विसहस्र नमोभागस्तद्विः श्रुतयः
मसचन्द्र एकः षष्ठादशांशलेपसिद्धतेनफकाराद्युन्मनान्तानां वि
द्यावयवानां सप्तदशाधिकाष्टदशोत्तरदशसहस्रत्रुटिभिरुच्चा
रेश्रकुलेविश्वसंस्तेचेसद्योक्तरीमाकृतेसतिनादस्यान्ते तत्त्वस्यैव
दर्शनमित्यर्थः तत्त्वविश्वभावनामाह चेतनस्यव्यक्तिदेतत्त्वविश्वतं
त्वसत्तकमिति। चेतनस्य स्वात्मतत्त्वस्य व्यक्तेः प्रकाशस्य हेत
स्तत्त्वविश्वव्याप्यः उन्मनोधानन्तरोक्तसत्तावत्त्रुटिभिर्नादलो
पादूर्ध्वात्मसत्त्वस्यांशं तत्त्वविश्वमित्यर्थः तदुक्तं प्रेम्वतंत्रे स्वाधिकारे
पादयामितिविश्वं तत्त्वसत्तकमिति एतस्यानन्तमहादेविनिसर्गानन्द
सुन्दरमिति। एतं सूक्ष्मांशकावस्थापञ्चकसत्तविश्ववल्कलाहला
नीतंस्थानं विश्वविश्रान्तिभूमित्वात् निसर्गानन्दसुन्दरं सर्ववि
षयानन्दसमष्टिभूतः परानन्दो निसर्गानन्दः अत एवानिषण्ण
चितुर्भेगाभेदप्रपञ्चपरिपश्यिप्राकरणपरत्वात् परानन्दल
क्षणमपरं ब्रह्मास्वदपरशिवरूपनिसर्गानन्दमित्यर्थः पूर्वोक्तभाव
नायाः फलमाह एवं चिन्तयमानस्य जपकालेषु पार्वति सिद्धयः
सकलास्तूर्णं सिद्ध्यन्ति तत्प्रसादतः इति। एवं पूर्वोक्तप्रकारेण त
पकालेषु जपाः आज्ञान्तसकलप्रोक्तं स्यात् पूर्वोक्तरीत्या सकल
निष्कलं केवलनिष्कलरूपास्त्रिविधा जपास्तेषां कालाः दीपका
द्यर्धमात्रान्तादिना पूर्वोक्तविद्यावयवानामुच्चारणकालाः तेषु
सूक्ष्मांशकादिविचिन्तयमानस्य सकालाः सिद्धयोऽणिमाद्याः पू
र्वोक्तास्तत्प्रसादतः सिद्ध्यन्ति प्रकाशानन्दमयविमर्शात्मकोऽ
त्यिप्रसन्नायानवतत्राहमागणितेनस्यभ्यनुत्तेप्रमोदितिवि
ज्ञानभैरवभट्टारकोक्तरीत्या सर्वप्रत्ययसम्यग्तामुपगता यात
वप्रसादात् स्वायत्ता भवतीत्यर्थः एवं कृतजपं देव्या वामहस्ते नि
वेदयेदिति। एवमुक्तभावनाभरः सर्वं जपमुक्तलक्षणं कृत्वा
प्रकाशविमर्शसामरस्यरूपाया वामहस्ते विश्वकवलीकार

योह्° टी° ६६

66

परेविमर्शमये निवेदयेत् पूजाविधिं कृत्वा तर्पणविधिमाह अनामा
ङ्गुष्ठयोगेन तर्पयेच्चक्रदेवता इति । अनामा प्रकृतिरंगुष्ठः शिवस्त
योर्योगेन मेलनेन शिवशक्तिमेलापनमुद्रयेत्यर्थः । चक्रदेवताः च
तुरस्रादिबैन्दवान्तचक्रनिवासिन्यः प्रकाशविमर्शस
मीरसभूताः नोद्वेन तर्पिताः सम्यक्तृप्ता भवन्तु ततस्ताभिः महाहंता
करोमीदं विश्वहव्यं वपुरहमिति अभियुक्तोऽहं परस्मिंल्लयं भाव
येदित्यर्थः तर्पणसाधनान्निवेद्यमाह हृदयं संवित्तया शुद्धमध्ये
न्नविनिवेदयेत्तत इति । शिवशक्तिमेलनमुद्रया समस्तं हृदम्भो
हृत्स्थं च निवेदमेव तर्पणमिति भावः समयस्तेन वै समं पूजयेदित्याह
कौलिकाचारसंयुक्तैर्वीरैस्तु समं पूजयेदिति । कुलसकलत
त्त्वाहृयतया ज्ञेयो येऽसौ कौलिकादक्षिणादिवामस्त्रीहिताम्नवा
माचारः गुरुभक्तिश्शान्तिश्रद्धाज्ञाकृपाक्षमावृत्तिरित्यादि स्वच्छ
न्दसंग्रहादिशास्त्रविहितेन तेन युक्तैर्वीरैरहमिदं प्रलयं कुर्वन्निदमः
प्रतियोगिनश्चितिपराप्रच्छानिकोऽकरीत्या भेदप्रतीतिसामरस्यो
द्वन्वितयोरहमिदमंशगते प्रलयप्रतिमाद्वयपरः सह पूजयेत् ते
आचारपरिभ्रष्टैः पुण्यच्छवतशालिभिः पशुभिः ह्रदकमैरप्यैः नकु
र्यादृश्य भोजनमित्यादिवचनमिति तु स्मरन्न पूजयेदित्यर्थः नैनक
स्मिन्नदेवैकस्मिन्वारे कस्मिन्वादिने पूजाकार्येत्यत आह पक्ष
मे नक्षत्रवारे च सौरे च परमे यदि गुरोर्दिने भानक्षत्रे चतुर्दश्यष्ट
मीषु च चक्रपूजां विशेषेण योगिनीनां समाचरेदिति । नित्यं स
पूजयेद्देवीमामसंतासातृत्तिक्रमादिति स्वच्छन्दसंग्रहादिशास्त्रे
षु प्रतिदिनं पूजा विहिता तथापि पक्षमेन नक्षत्रेण सह सौ
रवारे गुरुदिवसमादिने च नक्षत्रे च चतुर्दश्यष्टमीषु तिथिषु
चक्रपूजां चतुरस्रादिबैन्दवान्तचक्रगतानां देवतानां पूजां वि
शेषेण समाचरेत् नित्यपूजा तु न भवति किन्तु नैमित्तिकाया
अष्टाष्टकादियोगिनीगणपरीक्षणपूर्वकं पूजयेदित्यर्थः । च

र्यष्टाष्टकयजनं कर्तुं संपूज्य तत्स्याशाकामपत्रदलविशेषपूजामे
व विदधातीति तत्तः षष्टियतः कोटयोगिनीनां महौजसाम् चक्र
मेतत्समाश्रित्य संस्थितानां वीरवन्दिते अष्टाष्टकं तत्र कर्तव्यं वितरणा सं
विवर्जितमिति । त्रैलोक्यमोहनचक्रनिवासिनीनां ब्राह्म्यादीनां
मंशभूताः अष्टौ ... वन्तुः षष्टियोगिन्यस्तासां प्रतीकमंशभूता
नां कोटिकोटिसंख्याकानां महौजसां महाप्रभाववशालिनीनां योगि
गिनीनां कुलवृन्दानां ... तत्रः षष्टिकोसोयतः क्रमे
तत्समाश्रित्य समस्थितानां मध्यमभूतस्थानतः वत्तः षष्टिकोटियोगिनी
समष्टिभूतानां महो ब्राह्म्यादीनाम् अष्टाष्टकानाम् अष्टकवितशास्त्रवि
वर्जितं सर्वविभववस्तुनाहोमं यथा भवति तथा कर्तव्यं यदष्टं
पूजितं क्रियायोगाभिप्रेतः ननु तासां पूजनेन किं मायान्तं समेत
तत्राह त्वमेव तासां रूपेण क्रीडसि विश्वमोहिनीति । प्रकाश
त्मनो मम विश्वबोधकस्याशाभूता विमर्शरूपिणी त्वमेव
वैन्दवचक्रगता विश्वमोहिनी संसारिणो पपादनकारिणी ता
सां ब्राह्म्यादीनां महो ब्राह्म्यादीनां वर्तते रूपेण क्रीडः सप्रकाशती भ
गवती परमार्थतोपि सन्दूष्य मेवक्र विधान ... भिप्र
क्रीर्या तद्रूपेण परिणमसे तस्वदेशभूतयोगिनीयजनेन त्वमे
व प्रीणासीत्यर्थः ननु मुत्तनिवलादेवागमार्थमवगम्यत ...
तन्निषिप्त पूजादि प्रवृत्तिः स्यात्किं गुरूपदेशेनेत्याशंक्याह
अज्ञात्वा तु कुलाचारमयष्ट्वा गुरुपादुकाम यो ...
ततं त्वफलं ... मिति । स्वप्रकाशशिवमूर्तिरेकिका ...
शितन्त्रैकिकातयोः सामरस्य वपुरिष्यते परापादुकापरा ... वा
त्मनो गुरोरित्यभियुक्तरीत्या त्रिविधा महेशाद्गुरोः अविदित्वा कुला
चारं कुलकौलिकदर्शनं तत्राचारः ... संप्रदायदिशा ... विदितः
तेश ... दविज्ञाय यो ... पूर्वामपरमहितपरदेवता
यजनं परमार्थ ... प्रवर्तते तदुक्ताचारणपरो भवेत् तं

यो॰हृ॰
टी
६२

श्रेवकसाधकसाधकमांसमत्स्यादिशोधणादिरूपेण पीठयस्मिन्गृ-
हणामिष्टं वनात्र शंका अतो गुरूपदेशाविलार्थानवगम्यापि
शास्त्रे प्रवर्तितं अम्र मद्यानिष्कलं स्यादित्यर्थः एवं ज्ञात्वा वरारोहे
कौलाचारपरस्परा आवयोः शवलाकारं देवि तत्सन्निवेशं च तं
तथाप्रसराकारस्वच्छैव परिभावयेदित्यर्थः इति । वरारोहामतका
शिस्वलमावरवर्णिनीतिच्छेदः एवमुक्तप्रकारेण ज्ञात्वा गुरू-
पदेशादेव कौलाचारपरः कौलिकाः पूर्वोक्तलक्षणास्तेषां वि-
हिताः स्वच्छन्दसंग्रहादिशास्त्रेष्वाचारस्तदानन्दे तत्परः आ-
वयोः प्रकर्षविमर्शात्मनोः शवलाकारं स्वयाशक्तिः शिवो हम
मानन्दो मोदते उच्यते इत्यभियुक्तरीत्या सामरस्य पादनरूपेण तत्र
वीकरीता शोधितममृतीकृतं मद्यं निवद्यावयोरिमवयाज्ञव
तथाप्रसराकारः तेव विमर्शशक्तेः प्रथाप्रस्यन्दः तत्प्रसारः तद्दे
ताश्राकारायामामावरणदेवतानां तास्तथाविधास्तस्मैव वद्दे
सतोऽष्टायमृताः परिभावयेत् मूलोर्ध्वशक्तिचक्रं यतस्तन्म
यतां गताम् तस्मिन्नेवाधारे विलीनं परिभावयेत् इत्यभि
युक्तोक्त्या विमर्शशक्तेर्विलासभूता याकारायास्तावरणदेवता
स्तत्रैव विलीना भावयेदित्यर्थः तामिच्छाविग्रहां देवी गुरुरूपां वि
भावयेत् शोधयेत् गुरोः निवेद्यापि पश्चादात्मनि योजयेदिति । देवी
विमर्शरूपिणीं विश्वाजिह्वितागृहीतलीलाविग्रहामित्यर्थः
इच्छाविग्रहामित्यर्थः तामेव गुरुरूपां विभावयेत् तच्छेषं तत्र
पश्चाद्गुरोः निवेद्य शेषं देवता गुरुनिवेदितशेषमात्मनि योज-
येत् यावत्साधकस्ताभ्यां समरसो भवति तावच्छेषं स्वयम-
पश्चात्तीतेत्यर्थः वलिनिवेदनमाह योगिनीनां महादेवि वट
कायात्मरूपिणे तेजोऽणपतये मदवलिं कुर्वीत देवेनतिः ।
योगिनीनां पूर्वोक्तरीत्या मातृमानमेयमरीचीनामात्मारूपि
णो परमात्मस्वरूपिणे वटुकाय तेजोऽणपतये क्षेत्राणि शरी

रणि । तेषां परिजीवात्मास्मि मत्समहन्ताविष्ठायदेतेनाहमेन·
सद्वितीयेन बलिं कुर्वीत प्राणसहृदयनिरोधेन कुण्डलिनीत्रयम·
र्णनात् यज्जीवशिवयोरैक्यं तेनात्मभावान्तरो बलिरित्यस्य उक्तरी
सद्वितीयसमरसीकरणेल्लसिते मनसि ते मनासि स्वतपवप्राण·
णापानयः सञ्चारे शान्ते निरस्ते त्रिवलक्षणे मेरुशिवोहम·
स्मीति स्वान्तरो बलिरित्यर्थः ततः स्वैराचारपरो भूयादित्याह
पिबन्निव मनवाद्स्वेच्छाचारपरस्त्वयम् अहन्तेदन्तयोरैक्यं
भावयन्निवहरन्स्वभावमिति । नित्यं प्रमदंहयिवनाहृदेवतानिवे
दिमिषेधाद्वैतं तेवोदन तच्छेषं वाञ्छवमन तद्वयमपतिसाम
ध्यात्मभसस्वेच्छाचारपरः यत्र यत्र मनस्तुष्टिर्मनस्तत्रैव धारये
त् तत्र तत्र परानन्दस्वरूपं संप्रकाशते इति विज्ञानभैरवोक्ता·
सस्पयत्रेच्छा जायते तत्तदेव शास्त्रविहितं यत्र यत्र स्वेच्छा·
नजायते तत्तदेव शास्त्रनिषिद्धं अतः स्वेच्छानुकूलपदार्थान्
भावयेत् सतिकुलपदार्थास्परिमर्जेदित्यर्थः अहन्तेदन्तयोरै·
क्यं भावयन् अहन्ता ज्ञातृधर्मः इदन्ता ज्ञेयधर्मः तयोरैक्यं ।
त्रयत्रमिलिता मरीचयः इत्यादि पूर्वं प्रतिपादितं सौम्यास्तत्ते
यचैत्र मयोः समरसीकरणलक्षणं ज्ञानं तदेवाहमिति भा·
वयन्नुत्सवविहरेत्परिपूर्णज्ञानानन्दो भवेदित्यर्थः तदुक्तं वि
ज्ञानभैरवभट्टारकैः जग्धिपानकृतोल्लासरसानन्दविजृ
म्भणात् भावयेद्भरितावस्थां महानन्दस्ततो भवेदिति परम
प्रकृतमुपसंहरति एतत्तकथितं दिव्यं संकेतत्रयमुत्तमम
इति । एषु सर्वज्ञानोत्तमत्वाद्मन्त्रयोगिनीयपनीयमित्यत
आह गोपनीयं प्रयत्नेन स्वगृहमिव सज्जन इति । यथा स्वगृहं
योनिपर प्रकृष्टेभ्यो गोपयति प्रयत्नेन तथैतदपि संकेतत्रयम
नर्हेभ्यो गोपनीयमित्यर्थः नत्रु केनहीयेभ्यो गोपनीयमित्यत
आह श्रवकेज्ञानलब्धे वानप्रकाश्यं त्वया न च इति । भक्तिरी

यो॰ हृ॰
टी॰
६८
68

नोमन्त्रामन्त्रः तन्नतन्त्रं वेरेभुविद्यामात्रपाठेश्चुवकः ज्ञानलब्धो।
विद्यासाधारण्येन कामनारकादिविद्यावद्वापि ज्ञानं संपाद्यमिति
मन्वानः तयोः द्वयोरपीदं रहस्यत्वेन प्रकटीकरणीयमित्यर्थः
विच्छत्तिक्रमणाद्न्यायो न करणीय इत्यत आह अन्यायेन तन्
दातव्यं नास्तिकानां महेश्वरीति। विच्छत्तिक्रममेवान्यायः ना
स्ति परलोक इति मन्वते ये बौद्धादयस्ते नास्तिकाः नन्वत्र को
विधिरित्यत आह एवं त्वयाहमाज्ञप्तो मदिच्छारूपया प्रभोरिति
प्रभो जगत्प्रवृत्तिनियमास्वभावशालिनि अत एव शक्त्याविना।
शिवेन त्वमेनामथामनविद्यत इति चतुःशतीशास्त्रोक्तरीमात्व
याविनाहं किमपि कर्तुं वक्तुं न समर्थः उक्तदिक्षारूपया समा
लिंगितस्य रस्यागमशास्त्रं वक्तुरिच्छारूपया नाद्विसकलया आ।
ज्ञप्तः प्रेरितो ज्ञानमेव ब्रूकलत्वेणोपोक्तवानस्मि अतो भवद्दाने
व विधिरित्यर्थः अतस्तदतिक्रमे महद्विघ्नं स्यादित्याह अन्यायेन
तयोर्दयात्मापरे तोमविष्यति। अन्यायेन तत्त्वदानाविधिमुल्लंघ्य
अवक्रादिभ्यो यत्तज्ज्ञानं दयात्मापरे तोमविष्यति एतत्परिज्ञान
फलमाह संकेतं यो विजानाति योगिनीनां भवेत् प्रिय इति।
एतत्संकेतत्रयं गुरुमुखाद्देव यो विजानाति स योगिनीनां या
गः परशिवसमवायस्तद्रूपः परिविन्नरीविभूताः शक्तयस्ता।
साप्रियः परमशिवस्तस्यानन्तशक्तित्वात् तदुक्तं तन्त्रान्तरे श
क्तयोस्य जगत्सर्वं शक्तिमांस्तु महेश्वर इति अतः परशिवतादात्म्य
कः पुरुषात इत्याह सर्वेप्सितफलप्राप्तिः सर्वकाम्यफलप्र।
द इति। यतः सर्वेषां जनानां काम्यानाकाम्यमानानां फलाना
माश्रयः परशिव अतः सर्वेषां याचीप्सितानि स्पृहणीयानि फला
नि तेषां प्राप्तिः परशिवतादात्म्यपरिज्ञानाद्भवति स एव परमपुरु
षार्थ इत्यर्थः ननु मन्त्रोत्र रहस्यत इत्याह यतोपि रहस्यनेदेवीति।
यतो यत्र कापि वहिरन्तर्वा मनः रतितत्र तदनुभवरूपेण स एव

दृश्यते तस्य सर्वगतत्वात् तदुक्तं विज्ञानभैरवभट्टारकैः यत्र य
त्र मनो याति बाह्ये वाभ्यन्तरेपि वा तत्र तत्र शिवावस्था व्यापकत्वा
त्क्व यास्यतीति तत्र तत्राह मार्गेणाचेतन्यव्यञ्जतेः प्रमोदितेति तत्तु
किं सर्वेणाप्येवं न त्याह दृश्यतइत्याह कथं विज्ञो न चिन्तयेदिति य
शिवम् । सर्वं दृश्यते तथा न पश्यति न मं पश्यति कश्चिन्नेत्यपि
द्युकरीत्या प्रसन्नागोचरं देवं लोकवाप्यप्रमाथिनम् दृष्ट्वा
कृतिः शिरस्तानमनुरोदिति दुःखितइति तन्त्रान्तरोक्तरीत्या दृ
श्यमानमप्युपदेशहीना न पश्यन्ति निष्कलत्वशिवेच्छयेति
निष्कलपरशिवतादात्म्यपरोक्षानुभवशालीगुरुकटाक्षवी
क्षणेनोच्छिन्नपाशजालः परस्फुरत्परमशिवाहन्ताविज्ञानः क
थं न चिन्तयेदिति सर्वेऽतत्तद्वावं कथं न पश्येदित्यर्थः ॥
शिवेनास्वरहस्यत्वाद्विस्पष्टं तयोदितम् तद्रूपनाथवचना
ट्टिकृतं मोहमेवतत् ॥ इति श्रीमत्परम······ न्द्रपाणना
न्दशिष्यामृतानन्दनाथपरमहंसयोगिप्रवरविरचितायां यो
गिनीहृदयदीपिकायां मन्त्रसंकेतो नाम तृतीयः संकेतः ३
तिशुभम् ॥ समाप्ता चेयं योगिनीहृदयटीका शुभम्

ॐ श्रीगणेशाय नमः ॐ नमः शिवाय ॐ यथा सदसतां नैव
विशेषोस्ति निजात्मनि जडाजडानामप्येवं नास्त्यसाविति नि
श्चयः १ प्रत्यक्षेणाप्यवसत्ताद्सत्तावद्विपर्ययः नैतत्स्वरू
पं स्पृशति वस्तुनो ज्ञानमगास्पदः २ प्रत्यक्षापात्यो विषयता
प्यथ स्वात्मा न युज्यते परापेक्षतयानेकरूपत्वे सत्त्वलक्षणा
त न २ मा भूद्विशेषप्रत्यक्षादिभावाभावौ ततः पुनः सिद्धमेव विशे
षोऽतत्ता वत्ता व प्रयोजनम् ४ एवमप्यवभासानुषक्तासत्त्वा
विना भवेत् तदपेक्षां विनाभावाभावयोरविशिष्टता ५ क
थं स्याद्विशेषो त्रयावर्थार्थक्रियाहिमन् ऊर्ध्वान्नामसत्तथा

प्र ३
मा र
८९

ष्यत्तेनिर्विशेषोनिजात्मनि ६ एवमर्थक्रियाभासोकापिसंभेद
मागतः सन्नर्थःस्वात्मरूपेणनासतस्तस्यविशिष्यते ७ तत्राप्यर्
थक्रियासिद्धिस्तत्तत्कार्येनवर्णिता सममेवानयोस्तेनप्रतिष्ठा
संविदाश्रया ८ संविदप्यपरामर्शरूपाचेतदसावपि अभावेन
जडेनाथतुल्यैवप्राधदात्मनि ९ सैवंभूतात्मनात्मेनाप्यत्वथ
परिनिष्ठितः कथमस्यस्वभावस्यप्रतिष्ठास्यन्दतामियात् १०
इदमित्थंविदितःसंवित्प्रकाशोमस्यवस्तुनः प्रतिष्ठात्मतांगच्छ
देहमित्यात्मनःपुनः ११ व्यतिरेकेतराभ्यांहिनिश्चयोस्यनिजा
त्मनोः व्यवस्थितिःप्रतिष्ठाचसिद्धिर्निर्वृतिरुच्यते १२ एवमा
त्मन्यसत्कल्पाःप्रकाशस्यैवसन्त्यमी जडाःप्रकाशएवास्ति
स्वात्मनःस्वपरात्मभिः १३ नैवेवानुभवोप्यस्तिभिन्नाभिन्न
विनिश्चयम् प्रकाशमस्यप्रकाशस्यविमर्शरहितात्मनः १४
इदमित्यस्यविच्छिन्नविमर्शस्यकृतार्थता यास्वरूपेविश्रान्ति
र्विमर्शःसोहमित्ययम् १५ द्विधामस्यप्रथवात्मामितोपरिमि
तस्तथा प्राणादिनानिरुद्धोणुपरमात्मात्ववेष्टितः १६ अम
योप्ययंपर्यन्तभूमिःसर्वार्थसंविदाम् एकएवानुसन्धाताह
तोसौनोपपद्यते १७ नचाप्यव्यतिरेकात्मविमर्शात्मव्यहंवि
दि भातिपर्यन्तवर्तिमांभासनादधिकंजडम् १८ नसिद्धेप्र
थनादेवज्ञानादिसमवाय्यपि तस्माणादिप्रमेयंस्यान्नप्रमाता
न्यतोप्रमात १९ यदाप्यथस्थितिःप्राणपुर्यष्टकनियन्त्रिते
जीवेनिरुद्धातत्रापिपरमात्मनिसास्थिताः २० तदात्मनैवतत्
स्यस्यात्कथंप्राणेनयंत्रणा साधितासंभितायास्यात्तेजी
वतापरम् २१ नाथ्यवस्थाप्राणादावहंभावनिरोधतः प्रका
शस्यात्मविश्रान्तिरहंभावोहिकीर्तितः २२ उक्ताचसैवविश्रा
न्तिःसर्वापेक्षानिरोधतः स्वातन्त्र्यमथकर्तृत्वमुख्यमीश्वरता
पिच २३ मायाभिधायास्तुशक्तेरेवचास्माप्रसिद्धितः तदस्था

तिमर्थप्रत्येतज्जगन्निर्मातृतेष्यता २४ एकैवचात्रसन्त्यानात्मा
प्रोक्तासर्वसंविदाम् स्वसंवेदनपर्यायतत्त्वमनादितत् २५ भाव
भावस्थाप्यधिष्ठानस्याहंभावभागिनः व्यापित्वमत्रसन्त्यावं तत्त्व
तुस्थानयुज्यते २६ ततो भेदे तु भास्यस्फुटतेभासमानता ते
नोक्तं प्रतिभिज्ञायातदद्वयमयं जगत् २७ इतिश्रीमन्महामाहेश्व
राचार्यश्रीमदुत्पलदेवविरचिता अजडप्रमातृसिद्धिस्समाप्ता
तिशिवम् ॥ शुभंवोभवतुसाधकानाम् ॥ ओंहरि
हरमौलिचुम्बचरणो हरिहारयणो हरिहरिप्रोण हर्यमलद्युः
हरितल्लगलः श्रीरिहरिणावलो हरिद्योरणछोरहरिहरि
द्वियमाशितोद्दृढिमर्यसहितस्तुहरः नमः शिवाय ॥ ओं
शुभमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः
दोषाः प्रयान्तु शान्तिं सर्वत्र सुखिनो भवन्तु लोकः ओंन
मोशुरव शुभम् ॥ श्रीनगरे ॥ १९४७ वैक्रमे ॥